श्रीमदाचार्य पाडुरंगी

॥ अथऐतरेयोपनिषत्खंडार्थप्रारंभः ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॥ एषभगवान्संकर्षणनामा । पंथाः मार्गरूपः। स्वप्राप्तौस्वस्यैवहेतुत्वात् । एतत् एषभगवानेवानिरुद्धरूपीकर्म । कर्तृत्वान्मातृत्वाज्ज्ञातृत्वाच्च । विधेयानुसारेणैतदितिनपुंसकता । एवमुत्तरत्रापि । एतत्वासुदेवात्माभगवान्ब्रह्म गुणपूर्णत्वात् । एतत्प्रद्युम्नाख्योभगवान्सत्यं निर्दोषस्वरूप

हरिःॐ । एषपंथाएतत्कर्मैतद्ब्रह्मैतत्सत्यंतस्मान्नप्रमाद्येत्तन्नातीयान्नह्यत्यायन्पूर्वेयेत्यायंस्तेपराबभूवु
स्तदुक्तमृषिणा प्रजाहतिस्रोअत्यायमीयुर्न्य१न्याअर्कमभितोविविश्रे । बृहद्धतस्थौभुवनेष्वंतः
पवमानोहरितआविवेशेतिप्रजाहतिस्रोअत्यायमीयुरितियावैताइमाःप्रजास्तिस्रोअत्यायमायं
स्तानीमानिवयांसिवंगावगधाश्चेरपादा न्यन्याअर्कमभितोविविश्रइतिताइमाःप्रजाअर्कमभि
तोनिविष्टाइममेवाग्निं बृहद्धतस्थौभुवनेष्वंतरित्यदउएवबृहद्भुवनेष्वंतरसावादित्यःपवमानोह
रितआविवेशेतिवायुरेवपवमानोदिशोहरितआविष्टः ॥ १ ॥

त्वात् । तस्माद्भगवतोनप्रमाद्येत् । तद्विषयेप्रमादयुक्तोनभवेत् । क्वापितंनैवविस्मरेदितियावत् । तद्ब्रह्मनातीयात् । अतिक्रम्यत्यक्त्वानेतरंव्रजेत् । त्यागप्रकारश्चांतिमाध्यायेस्पष्टयिष्यते । कुतोनातीयादित्यतोऽनतिक्रमेपूर्वेषामाचारंतावत्प्रमाणयति ॥ नहीति । पूर्वेब्रह्माद्याएनंहियस्मान्नात्यायन् नतत्यजुस्तस्मान्नातीयादितिपूर्वेणान्वयः । अतिक्रमेकिंबाधकमित्य ॥ १ ॥

तआह ॥ येत्यायन्निति । येऽतिक्रांतवंतस्तेपराबभूवुः अंधेतमसिपतिताइत्यर्थः । एवमत्रत्यागफलकथनादत्यागफलमपि पूर्ववाक्येऽध्याहर्तव्यं । येपूर्वेनात्यायंस्तेब्रह्माद्याःसंसृतेर्मुक्ताः । श्रीश्चनित्यमुक्तागुणाधिकाचवर्तततइति । केतेभगवत्त्यागिनःअत्यागिनश्चकतिविधाइत्यतस्तदुत्तरत्वेनमंत्रमुदाहरिष्यन्नवतारयति ॥ तदुक्तमिति । ऋषिणामंत्रद्रष्ट्रा । तत्उक्तप्रश्नस्योत्तरंउक्तमित्यर्थः । मंत्रमुदाहरति ॥ प्रजाइति । तत्रतावत्प्रथमपादमनूद्यतिस्रः पिशाचराक्षसासुरभेदेनत्रिविधाः प्रजाअत्यायं भगवदतिक्रमं ईयुःप्रापुश्चक्रुर्हेतितदर्थमभिप्रेत्योपनिषत्स्वयमेवव्याचष्टे ॥ प्रजाइति । तिस्रस्त्रिविधाःप्रजाअत्यायमायन्भगवदतिक्रमंप्राप्ताइतियाःऋषिप्रोक्तास्ताइमावै । वक्ष्यमाणाएव । कास्ताः । वयांसिवंगावगधाईरपादाश्चेतियानीमानिभूतानितान्येव । वीत्याकाशनाम । वौआकाशेअयनाद्वयांसिपिशाचकाः । वीत्यत्रेकारलोपोनिर्वचनात् । पिशाचाहिविहायसिसंचरंति । वंगावगधाः । वंवर्तितंप्रवर्तितंनिष्पादितंगंज्ञानंयेषुतेवंगाःनरास्तैरवोऽवनंयेषांतेवंगावाः नरमांसाशनेनस्वदेहपोषणंकुर्वंतइत्यर्थः ॥ गधाःगृध्नवःविषयलोलुपाः । वंगावाश्चतेगधाश्चेतितथोक्ताःराक्षसाः । ईरस्यवायोर्धर्मज्ञानवैराग्यैश्वर्यरूपगुणचतुष्टयात्मकस्यैश्वर्यरूपैकगुणमात्रवत्त्वादीरपादाअसुराः । इतिशब्दोध्याहार्यः । ईरपादाश्चेतीमानीत्यन्वयः । एवंभगवत्त्यागिनामसतांत्रैविध्यमुक्त्वातदत्यागिनांसतामपित्रैविध्यंपादत्रयेणक्रमेणमंत्रशेषेप्रदर्श्यते । तत्रद्वितीयपादंतावदनुवदति ॥ न्यन्याइति । अन्याउक्तराक्षसादित्रिविधासत्प्रजाविलक्षणाःमनुष्योत्तमप्रजाःअर्कआसम्यग्जनैरर्चितत्वादर्कशब्दवाच्यमग्निस्थंविष्णुमभितःआभिमुख्येन निविविश्रे निविष्टाःआश्रिताः । अग्नौकर्माणिकृत्वातत्स्थंविष्णुं

मुक्तौप्राप्नुवंतीत्यर्थः । इममेवार्थमभिप्रेत्यस्वयमेवव्याचष्टे ॥ **ताइमाइति** । मानुषोत्तमरूपाःप्रजाइत्यर्थः । अर्कशब्दवा
च्यस्यविष्णोरुपास्तौस्थानंवक्तुंतंविशिनष्टि ॥ **इममेवाग्निमिति** । एतस्मिन्नग्नावेवस्थितंतन्नामकमित्यर्थः । तृतीयपादम
नुवदति ॥ **बृहदिति** । ताइमाइत्यनुवर्तते । ऋषिरूपाःप्रजाःयदेतद्भुवनेषुलोकेष्वंतः । बृहत् तेजसाबृंहितंव्याप्तंब्रह्म ।
सूर्येतस्थौ । तत्अभितोविविश्रइत्यनुवृत्त्यायोजना । इममेवार्थमभिप्रेत्यव्याचष्टे ॥ **अदउएवेति** । अदःउ । असावेववि
ष्णुःभुवनेष्वंतः । बृहत्तेजसापूर्णं । असावेवादित्यःसर्ववस्तूनामादानात् । स्ववशेस्थापनादादित्यनामा । तमिमंविष्णुमृ

उक्थमुक्थमितिवैप्रजावदंतितदिदमेवोक्थमियमेवपृथिवीतोहीदंसर्वमुत्तिष्ठतियदिदंकिंचत
स्याग्निरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुते अंतरिक्षमेवोक्थमंतरिक्षंवाअनुपतंत्यंतरिक्षमनुधाव

षयःस्वाध्यायेनाभितोनिविष्टाइतियोजना । चतुर्थपादमनुवदति ॥ **पवमानइति** । पावयतिसंसारात् । मिनोतिक्षिपति
चमहानंदइतिपवमानोवायुस्थोविष्णुःहरितोदिशःसर्वाआविवेश । सर्वदिक्षुव्याप्तः । यएवंविधस्तंविष्णुंदेवाअभितोनिविष्टाइ
तितदर्थमभिप्रेत्यव्याचष्टे ॥ **वायुरेवेति** । बलज्ञानस्वरूपत्वाद्वायुशब्दवाच्योवायुस्थोहरिरेवपवमानः । सएवहरितोदिश
आविष्टइत्यर्थः । हरितइत्यनुवादः दिशइतितद्व्याख्यानं । तथाचभगवत्त्यागिनोसंतःपिशाचराक्षसासुरभेदेनत्रिविधाः ।
तदत्यागिनस्संतोपिमनुष्योत्तमर्षिदेवभेदेनत्रिविधाइत्युक्तंभवति ॥ १ ॥ विद्यांतरमारभ्यते ॥ **उक्थमुक्थमिति** । अतएव

॥ २ ॥

नपूर्वखंडेनास्यसंगतिः । एवमुत्तरत्रापि । प्रजाःज्ञानिजनाःउक्थमुक्थं उत्थापनात्जगतःसर्जनान्निमित्तात्किंचिद्वस्तूक्थना

यंतितस्यवायुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुते ऽसावेवद्यौरुक्थममुतःप्रदानाद्धीदंसर्वमुत्तिष्ठ
तियदिदंकिंचतस्यासावादित्योर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतइत्यधिदैवतं अथाध्यात्मंपुरुषए
वोक्थमयमेवमहान्प्रजापतिरहमुक्थमस्मीतिविद्यात्तस्यमुखमेवोक्थंयथापृथिवीतथातस्यवाग
र्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुते नासिकेएवोक्थंयथांतरिक्षंतथातस्यप्राणोर्कोन्नमशीतयोन्नेन
हीदंसर्वमश्नुते तदेतद्ब्रध्नस्यविष्टपंयदेतन्नासिकायैविनतमिव ललाटमेवोक्थंयथाद्यौस्तथातस्य
चक्षुरर्कोन्नमशीतयोन्नेनहीदंसर्वमश्नुतेसमानमशीतयोध्यात्मंचाधिदैवतंचान्नमेवा न्नेनहीमानि
सर्वाणिभूतानिसमनंतीँ ३ अन्नेनेमंलोकंजयत्यन्नेनामुंतस्मात्समानमशीतयोध्यात्मंचाधिदैवतं
चान्नमेवतदिदमन्नमन्नादमियमेवपृथिवीतोहीदंसर्वमुत्तिष्ठतियदिदंकिंचयद्धकिंचेदंप्रेता ३ इ त
दसौसर्वमत्तियदुकिंचातःप्रैतीँ ३ तदियंसर्वमत्ति सेयमित्याद्यान्यत्ताहवाआद्योभवति नतस्ये
शेयंनाद्याद्यद्धैनंनाद्युः ॥ २ ॥

मकमितिवदंति । वैदिकव्यवहारप्राचुर्यज्ञापनार्थद्विरुक्तिः । वैप्रसिद्धमेतत् । तदुक्थंचेदमेवविष्णवाख्यंब्रह्मैवेत्यर्थः । तस्या

धिदैवतमध्यात्मंचरूपविशेषाणांपृथगुपास्त्यर्थमधिष्ठानंवाहनंभोग्यमन्नंचपृथक्पृथग्दर्शयति ॥ इयमेवपृथिवीत्यादिना ।
इयमेवपृथिवी इदमेवपृथिवीस्थितं प्रथितत्वात्पृथिवीनामकंउक्थं। पृथिवीस्थितस्योक्थशब्दवाच्यत्वेयुक्तिप्रदर्शनायपृथिव्या
मुक्थशब्दप्रवृत्तिनिमित्तमाह ॥ इतोहीति । इतःपृथिवीतःयदिदंकिंच प्रमाणप्रमितमिदंसर्वमंकुरादिकमुत्तिष्ठति उत्पद्यते
हियस्मात्तस्मात्तत्स्थस्योक्थशब्दवाच्यत्वंयुक्तमित्यर्थः। तस्यपृथिवीस्थितस्यविष्णोरग्निरर्कः । अत्रार्कपदेनऋगताविति धातोः
शीघ्रगतित्वतःश्येनउच्यते। तदाकारत्वाद्यज्ञेक्रियमाणाचितिरिष्टकासन्निवेशविशेषलक्षणाअर्कपदेनगौण्यावृत्त्याप्रतिपाद्यते।
साचसुपर्णप्रतिमारूपा। सएवसुपर्णोग्नावपिस्थितः। सचहरेर्वाहनमितिप्रसिद्धमेव । अतोग्निस्थितस्यैवगरुडस्यार्कपदोदितचि
तिगतत्वादग्निस्तस्यवाहनरूपोर्कइत्युच्यते । अथवाग्निरग्निस्थितोग्निशब्दवाच्योभगवद्रूपविशेषस्तस्यपृथिवीस्थस्यहरेःअर्कः ।
शीघ्रगतित्वादर्कपदोदितगरुडस्थितस्तदाकारःस्वयमेववाहनरूपइत्यर्थः । एवमुत्तरत्रवायुरर्कआदित्योर्कइत्यादौसर्वत्रार्थां
तरंव्याख्येयं । अन्नंप्रसिद्धान्नमेवतस्यविष्णोरशीतयस्तिस्रस्तृचाशीतयःतद्रूपंबृहतीसहस्राख्यंशस्त्रमितियावत्। उभयोरपित
र्पकत्वात्सोमदेवताकत्वाच्च । अन्नस्याशीतित्वंयोगेनापिदर्शयति ॥ अन्नेनेति । इदंसर्वंप्राणिजातंअन्नेन अन्नभोजनेनैवसर्वं
कामामश्नुतेप्राप्नोति । नान्यथा । दारापत्यगृहादीनिवासोलंकारभूषणं । असह्यंनाश्नतःपुंसःसह्यंभुक्तवतोध्रुवमितिवचनात् अ
तोऽश्नुतेऽनयेतिव्युत्पत्त्यासर्वकामप्राप्तिसाधनत्वादन्नमशीतिरित्युच्यते । तृचाशीतयोप्यन्नवद्भगवतस्तृप्तिहेतुतयासर्वकाम ॥ ३ ॥
प्राप्तिसाधनतुल्यत्वादुक्तनिर्वचनेनाशीतिशब्दवाच्याःअतोन्नमशीतयइतिसामानाधिकरण्येनोच्यतइतिभावः ॥ अंतरिक्षमं

तरिक्षस्थं । अंतःस्वहृदयेईक्ष्यतेऽधिकारिभिरित्यंतरिक्षनामकंचयद्भगवद्रूपंतदेवोक्थं । तस्योक्थत्वेयुक्तिमाह ॥ अंतरिक्षं
वाइति । अंतरिक्षस्थंहरिंवैएव । अनु तत्प्रेरणयेतियावत् । पतंति पक्षिणइतिशेषः । अंतरिक्षमनु तत्प्रेरणयैव । धावयंति
नरादयोश्वादिषुयानादिवाहकनरवृषभादिषुचोपविष्टास्तान्धावयंति। भगवत्प्रेरणयांतरिक्षेणावकाशेदत्तेसत्येवहिपक्षिपतना
दिकर्माणिजायंते । नान्यथेतिभावः । यथोक्तं । नभोददातिश्वसतांमार्गंयन्नियमाददइत्यादि । एतेनपक्ष्याद्युत्पतनधावना
दिरूपोत्थानहेतुत्वादुक्थत्वमंतरिक्षस्ययुक्तमेवेत्युक्तंभवति । तस्यवायुरर्कइत्यादिपूर्ववत् । असौद्यौरेव । द्युलोकस्थं द्योतनात्
द्युनामकंच । यद्ब्रह्म तदेवोक्थं । द्युस्थितस्योक्थशब्दवाच्यत्वेयुक्तिप्रदर्शनायद्युलोकेउक्थशब्दप्रवृत्तिनिमित्तमाह ॥ अमु
तइति । अमुतोदिवःप्रदानात्तत्कर्तृकवृष्टिप्रदानाद्यदिदंकिंच प्रमाणसिद्धंइदंसर्वंसस्यादिकमुत्तिष्ठतिउत्पद्यते हियस्मात्त
स्मात्तत्स्थस्योक्थशब्दवाच्यत्वंयुक्तमेवेत्यर्थः । तस्यासावादित्यइत्यादिपूर्ववत् । इत्यधिदैवतं । अधिदैवस्थितानांभगवद्रू
पाणामुक्थत्वादिकमुपवर्णितं । अथाध्यात्मं । अध्यात्मगतभगवद्रूपाणामुक्थत्वादिकमुच्यतइत्यर्थः । पुरुषशब्दवाच्यदेहस्थि
तत्वाद्देहाख्यपुरेषुसरणाद्वा यःपुरुषाख्योविष्णुःसएवोक्थं । तस्योक्थत्वेयुक्तिमाह । अयमेवमहान्सर्वोत्तमइति । महत्त्वस्यै
वोपपादनंप्रजापतिरिति । ब्रह्मादिसर्वप्रजास्वामीत्यर्थः । तथाचोच्चैःसर्वोत्कृष्टत्वेनस्थितत्वादुक्थमित्युच्यतइतिभावः । एष
चपुरुषाख्योभगवान्अहमुक्थमस्मीतिविद्यात् विद्यांज्ञानमत्तिअनुभवतीतितथोक्तः । तस्यैवसर्वोत्तमत्वादिसद्भावात्सएकए
वतादृशज्ञानयोग्योनान्यइतिभावः । एवंपुरुषाख्यहरेरुक्थत्वमुक्त्वातदंगानामप्युक्थत्वमाह । तस्यमुखमेवेत्यादिना ।

अत्रसर्वत्रैवशब्दः कावेरीविरजातोयमित्यादाविवनेदमौपचारिकमितिज्ञापनार्थोनत्वन्ययोगव्यवच्छेदार्थः । सर्वत्रोक्थत्वविधानात् । तस्यमुखंवदनमेवोक्थं । अन्नयुत्थापकत्वात् । वक्ष्यतेहि । तस्यवाचासृष्टौपृथिवीचाग्निश्चेति । निर्णयार्थंदृष्टांतेनोपपादयति ॥ यथेति । यथाधिदैवतंपृथिवीउक्थत्वेनोक्ता तथाऽध्यात्मंपुरुषमुखमेवोक्थमित्यर्थः । तस्यमुखरूपोक्थस्य । वाक्वागभिमानीवह्निरर्कः । शिष्टंपूर्ववत् । नासिकेएवोक्थं । वातोत्थापकत्वात् । वक्ष्यतेहि । प्राणेनसृष्टावंतरिक्षंचवायुश्चेति । तस्येत्यनुवर्तते । पुरुषाख्यहरेरित्यर्थः । यथांतरिक्षमित्यादिपूर्ववत् । तस्यनासिकारूपोक्थस्य । प्राणोवायुः । तत्र विशेषमाह ॥ तदेतदिति । यदेतन्नासिकायै नासिकायां नासिकामूलेनेत्रयोर्मध्येविनतमिवकिंचिन्नतस्थानंदृश्यते । तदेतत् ब्रध्नस्यसूर्यस्य विष्टपंसूर्यलोकस्थानीयंविद्यादित्यर्थः । ललाटमेवोक्थं अत्रललाटशब्देनतत्संबद्धंनेत्रमुपलक्ष्यते । यथाद्यौस्तथेत्यादिपूर्ववत् । तस्यललाटरूपोक्थस्य । चक्षुश्चक्षुरभिमानीसूर्यः । अत्रादनाघ्राणदृष्ट्याख्यभोगत्रयविभागेन तन्मुखनासिकानेत्राणांभोग्यमन्नं रसगंधरूपात्मकं तत्रतत्रत्रिस्थानेष्वपि तस्यान्नंतस्यान्नमिति पृथङ्निर्दिष्टमितिज्ञातव्यं । अत्रेदमपिबोध्यं । भागवतोजीवदेहेषुव्याप्तत्वात्तन्मुखनासिकाक्षीणि जीवमुखनासिकाक्षिषुस्थितानि । अतएवजीववाक्प्राणचक्षुष्षुविष्णुवागाद्याःस्थिताःविष्णोर्वाक्प्राणचक्षूंषिचभार्गवनारसिंहकपिलाख्यास्तद्रूपविशेषाएव । एतान्यपिमुखनासिकाक्षिवदग्निवायुसूर्याणांजनकानीत्यादि । एवमध्यात्ममधिदैवतंचषट्सुस्थानेष्वर्काणांभिन्नत्वेप्यशीतयइत्येतत्समानमेव । यतःसर्वत्रान्नमेवाशीतयइत्युक्तमितियोजना । ननुकिंतदन्नस्यमाहात्म्यं । येनसर्वेषामपिपृथिव्यादिस्थरूपाणांतदेवाशीतितयोच्यतइत्यतआह ॥ अ

न्नेनेति । इमानिसर्वाणिभूतान्यन्नेनैवअन्नस्थेनान्ननाम्नाभगवतैव । समनंति सम्यक्चेष्टंते । अन्नेनैवअन्नस्थितेनैव तेनान्नदा
तापुरुषइमंलोकं पृथिवीलोकं। जयतिप्राप्नोति । पृथिव्यामधिपतिर्भवतीतियावत् । तथान्नेनैवानेनामुंस्वर्गादिलोकंचजयति।
तस्मात्सर्वभूतचेष्टनेअन्नदातॄणांगतिप्राप्तौचभगवतान्नेस्थित्वातस्यनिमित्तीकरणात्समानमशीतयोध्यात्मंचाधिदैवतंचान्नमेवे
तियुक्तातस्यसर्वत्राशीतितयोक्तिरितिभावः । तदिदंभगवद्रूपं । अन्नं । अद्यत्वात् । अद्यत्वंचोपजीव्यत्वेनैव । उपजीव्यो
हिसर्वेषांभगवान् । नकेवलमन्नंकिंत्वन्नादंच । अन्नमत्तीति सर्वात्ताहिभगवान् । किंतद्भगवद्रूपं । यदन्नमन्नादंचेत्यतआह॥
इयमेवपृथिवीति । एतत्पृथिवीगतमेवपृथिवीनामकंस्त्रीरूपमित्यर्थः । कथंपृथिवीगतरूपस्यान्नत्वमन्नादत्वंचेत्यतस्तत्रान्न
त्वंतावदुपपादयति ॥ इतोहीति । इतः पृथिवीगतभगवच्छक्त्यैवेदंसर्वंधान्यादिकंपृथिवीतउत्तिष्ठति उत्पद्यते । सर्वमि
त्यस्यैवविवरणंयदिदंकिंचेति । एवंपृथिवीस्थस्यान्नोत्पादकत्वादन्नत्वमुपपाद्यद्युलोकस्थस्याप्यन्नत्वमन्नादत्वंचाभिप्रेत्यत
त्रान्नादत्वंतावदुपपादयति ॥ यद्धकिंचेति । यत्किंचेदंधूमादिकमचेतनंस्वर्गादिगंतृचेतनंचपृथिवीतः प्रेता २ इ प्रैतिप्र
यातिगच्छति । तत्सर्वमसौद्युलोकस्थोहरिरत्ति स्वीकरोतीत्यर्थः । एतेनपृथिवीस्थस्यद्युभोग्यधूमादिजनकत्वेनप्रकारांतरेणा
प्यन्नत्वमुपपादितं । अथपृथिवीस्थितस्यान्नादत्वमुपपादयति ॥ यदुकिंचेति । उउत । यत्किंचातःअमुतःद्युलोकात् ।प्रैती२
आगच्छति। वृष्ट्यादिकं तत्सर्वमियंपृथिवी पृथिवीस्थितोत्तीत्यर्थः। एतेनद्युलोकस्थस्यान्नत्वमप्युक्तंभवति। उपलक्षणमेतत् ।
पृथिवीस्थितस्यभगवतः। पृथिवीस्थसर्वप्राणिगतरूपेण । पृथिव्युत्पन्नान्नभोक्तृत्वात्प्रकारांतरेणाप्यन्नादत्वंद्रष्टव्यं। अत्रपृ

थिवीद्युस्थयोर्भगवद्रूपयोरन्नत्वमन्नादत्वंचस्वनिरूपितमन्यनिरूपितंचबोध्यं । तत्रस्वभोग्यत्वंस्वभोक्तृत्वंचहरेरचिंत्यैश्वर्य बलादेकस्यापिरूपभेदेनोपपन्नं । अन्यभोग्यत्वंचोपजीव्यतारूपं । अन्यभोक्तृत्वंत्वविप्रतिपन्नमेवेति । एवंपृथिवीद्युस्थयो रन्नत्वमत्तृत्वंचोपपाद्योपसंहरति ॥ **सेयमिति** । सेयंपृथिवी । तत्स्थाभगवन्मूर्तिः । इतिपूर्वोक्तप्रकारेण । आद्या अदनीयाभोग्याउपजीव्येतियावत् अत्रीभोक्रीचभवति । एवं । सोसावित्यध्याहार्यं । द्युस्थोभगवानपिअत्ताआद्यश्चभ

अथातोरेतसःसृष्टिः प्रजापतेरेतोदेवा देवानांरेतोवर्षं वर्षस्यरेतओषधय ओषधीनांरेतोन्न मन्नस्यरेतोरेतो रेतसोरेतःप्रजाः प्रजानांरेतोहृदयं हृदयस्यरेतोमनो मनसोरेतोवा ग्वाचोरेतः कर्म तदिदंकर्मकृतमयंपुरुषोब्रह्मणोलोकःसइरामयोयद्धीरामयास्तस्माद्धिरण्मयोहिरण्मयोहवा अमुष्मिंल्लोकेसंभवतिहिरण्मयःसर्वेभ्योभूतेभ्योदद्दशेयएवंवेद ॥ ३ ॥

वति । हवाइतिप्रसिद्धिद्योतकंनिपातद्वयं । अत्रायंविवेकः । यदापृथिवीआद्याभवतितदाद्यौरत्ता । यदातुसाऽत्री भवति । तदासावाद्यइति । अतएवाद्यात्रीत्यस्यअत्ताआद्यइतिव्युत्क्रमेणोक्तिरितिज्ञातव्यं ॥ नचेदमाद्यत्वंअत्तृत्वंचभगवतः केनापिशक्यनिवारणमित्याह ॥ **नतस्येति** । अयंभगवान् । यथासर्वैनाद्यात् । यद्वाएनंभगवंतमन्येयथानाद्युर्नोपजीवेयु ॥ ५ ॥ स्तस्यतथाकरणस्यकश्चन नेशे नेष्टइत्यर्थः ॥ २॥ अथानंतरं । अतःभगवन्माहात्म्यश्रवणस्यमहाफलसद्भावात् । रेतसःसृष्टिः

रेतःसंबंधिनीसृष्टिरुच्यतइतिशेषः । अत्ररेतश्शब्दोजन्योपलक्षणः । देवाःसर्वेब्रह्माद्याःप्रजापतेःसर्वजीवाधिपतेर्विष्णोरेतः । तस्माज्जाताः । देवानांवर्षरेतः । देवेभ्योवृष्टिःसंजायते । वर्षस्यरेतओषधयः । वर्षात्सर्वाओषधयोजायंते । ओषधीनांरेतोन्नं । तेभ्योन्नंजायते । अन्नस्यरेतोरेतःशुष्ममेव । प्रजानांरेतोहृदयं । अत्रहृदयशब्देनसंकल्पात्मकंमनउच्यते । तत्प्रजाभ्योजायते । हृदयस्यरेतोमनः । मनःशब्देनविकल्पात्मकंमनउच्यते । संकल्पाद्विकल्पोजायतइत्यर्थः । संकल्पविकल्पयोर्मनोवृत्तित्वेनोभयोःप्रजाजातत्वेपिसंकल्पानंतरमेवविकल्पस्यजायमानत्वात्तज्जातत्वोक्तिः । एकादश्याद्युपवासादिसंकल्पे कृते एवहिततपरित्यागंनकरिष्येइतिविकल्पोजायते । मनसोविकल्पात्मकस्यरेतोवाक् वाक्प्रचारः । अत्रहृदयस्येत्यपिग्राह्यं। संकल्पविकल्पाभ्यांविधिनिषेधविषयकमनोवृत्तिभ्यांसर्वोपिवाक्प्रचारोजायते । वाचोरेतःकर्म । वाक्प्रचाराच्चवृद्धकृतात् अव्युत्पन्नस्येदमस्यवाचकमिदंवाच्यमितिनामादिवेदनात्पुनर्वाक्प्रचारेघटमानयेत्यादिरूपेजायमानेव्युत्पन्नस्यप्रयोज्यपुरुषस्यघटानयनादिकर्मजायते । तदिदंकर्मकृतं । कुलालादिकर्मणाहिघटादिकंसर्वंजगज्जायते । अयंएतत्कर्माभिमानीपुरुषोजीवःब्रह्मणोविष्णोर्लोकआवासस्थानं । जडापेक्षयाचेतनेहिविष्णोर्विशेषतःसन्निधानं । सब्रह्मशब्दोक्तोविष्णुरिरामयः इच्छानुरूपसुखपूर्णःयद्यस्मादिरामयाः । दैर्घ्यमवधारणार्थे । इरामयएवहि । तस्माद्धिरण्मयः । हिरुक्पृथक्लौकिकानंदाद्विलक्षणं ण्यंसुखं हिरण्यंतेनाधिकत्वात्तथोक्तः । आधिक्यार्थेमयट् । हिरुक्शब्देककारस्यण्यशब्देयकारस्यलोपोनिर्वचनत्वात् । तथाचेरामयत्वादेवहिहिरण्मयइत्युच्यतइत्यर्थः । एतद्विद्यावेत्तुःफलमाह ॥ **हिरण्मयइति** । योधिकारीएवंप्रजा

पतेरेतोदेवाइत्याद्युक्तप्रकारेणनारायणंसर्वलोकैककारणंहिरण्मयादिरूपंचवेद उपास्ते अपरोक्षतोजानातिच । सोमुष्मिँल्लोके वैकुंठादौ हिरण्मयः कर्मजंप्राकृतरूपंहित्वानिजानंदैकरूपकःसंभवति । हिरण्मयःसन्नेवसर्वेभ्योभूतेभ्यः मुक्तसर्वभूतैः ददृशे दृश्यतइत्यर्थः ॥ ३ ॥ ब्रह्मवासुदेवाख्यं । तंप्रसिद्धं । ज्ञानिनांप्रथमममिमंपुरुषं । चतुराननं । प्रपदाभ्यांप्रपदयोः ।

तंप्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषं यत्प्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषंतस्मात्प्रपदेतस्मात्प्रपदेइत्याचक्षते शफाःखुराइत्यन्येषांपशूनां तदूर्ध्वमुदसर्पत्ताऊरूअभवतामुरुगृणीहीत्यब्रवीत्तदुदरमभवदुर्वैवमेकुर्वित्यब्रवीत्तदुदरोभवदुदरंब्रह्मेतिशार्कराक्षाउपासतेहृदयंब्रह्मेत्यारुणयोब्रह्माहैवता३इऊर्ध्वंत्वेवोदसर्पत्तच्छिरोश्रयतयच्छिरोश्रयतततच्छिरोभवत्तच्छिरसःशिरस्त्वं ताएताःशीर्षंच्छ्रियःश्रिताश्चक्षुःश्रोत्रंमनोवाक्प्राणःश्रयंतेस्मिंच्छ्रियोयएवमेतच्छिरसःशिरस्त्वंवेद ताअहिंसंताहमुक्थमस्म्यहमुक्थमस्मीति ताअब्रुवन्हंतास्माच्छरीरादुत्क्रामामतद्यस्मिन्नउत्क्रांतइदंशरी

प्रपदद्वयावच्छेदेन । प्रापद्यत प्राप । आदिसृष्टौ । यद्यस्माद्ब्रह्मेमंपुरुषंचतुर्मुखंप्रपदाभ्यांप्रापद्यत । तस्मात्प्रपदनात्प्रपदनावच्छेदकत्वादेव । चतुर्मुखपादोपरितनभागरूपमंगंप्रपदेइत्याचक्षतेविद्वांसः अतएवचतुर्मुखवत्पुरुषाकारवतांनरादीनांपादोपरितनभागरूपमंगंप्रवृत्तिनिमित्ताभावेपिसादृश्यमात्रेणप्रपदेप्रपदेइत्याचक्षतेइत्यावृत्त्यायोज्यं । प्रयोगबाहुल्यज्ञापनायद्विरु

क्तिः । अन्येषांतुचतुर्मुखपुरुषाकारशून्यानांपशूनामश्वगवादीनांशफाःखुराइत्येवाचक्षतेनतुप्रपदेइति । प्रवृत्तिनिमित्ताभावा त्सादृश्याभावाच्चेतिभावः । तदूर्ध्वंतदनंतरं । तत्ब्रह्म । चतुर्मुखदेहप्रपदादूर्ध्वं । वायुनासहोदसर्पत् । ऊरुंप्रत्ययात् । अतोह रेरूर्ध्वंअरणाद्गमनान्निमित्तात्तौचतुर्मुखसंबंधिनाववयवविशेषौऊरूअभवतां । तत्सादृश्याच्चान्यत्रापितच्छब्दव्यवहारइति संयोज्यं । एवमुत्तरत्रापि । ततःकिंचिदूर्ध्वंवायुनासहैवगत्वा । उरुउत्कृष्टंयथाभवतितथा । मांगृणीहीतिभगवान्वायुमब्र वीत् । सवायुर्यत्रस्थित्वाउर्वैवंगरणंचक्रे तत्स्थानमुदरमुदरनामकमभवत् । उउत्कृष्टोगरोगरणंस्तवनंयस्मिन्निति । गस्यदः । अथततोपिरूपांतरेणकिंचिदूर्ध्वंगत्वा । उरुविस्तृतमेवमेममनिवासस्थानंकुर्विंतिपुनर्वायुमब्रवीत् । वायुश्चभगवदाज्ञानुसारेणत थैवाकरोत् । ततस्तत्स्थानमुरुत्वादुरोनामकमभवत् । उरःस्थानेचमध्येहृदयमप्यकरोदित्यपिग्राह्यं । हृदयंब्रह्मेतिवक्ष्यमाणत्वात् । तत्रोदरंउदरेस्थितमुद्गतारत्वादुरुगरणविषयत्वाद्वोदरनामकं । ब्रह्मेतिशार्कराक्षाः शर्करासूक्ष्मपाषाणस्तद्वत्सूक्ष्ममक्षंदृष्टि र्येषांतेतथोक्ताः । सूक्ष्मेषिकावत्त्वात्तन्नामानोमुनयउपासते । हृदयंहृदयेस्थितंहृद्ययनात्हृदयशब्दवाच्यंब्रह्मेति । आरुण योनाममुनयउपासते । ताइ । तेउभे उदरस्थंहृद्गंच । ब्रह्मैवह । नाणुरप्यत्रभेदः । ब्रह्मेतिसंहितायांदैर्घ्यंस्यताइइतिस्वरस्पर्शविभा गस्यचकृत्यंप्रागुक्तमेव । ततःउरःस्थानादूर्ध्वंत्वेवतद्ब्रह्मोदसर्पत् । वायुनासहागमत् । तुशब्दःपूर्वोक्तस्थानेभ्योस्यविशेषद्योतकः । ऊर्ध्वगतंचतद्ब्रह्मशिरोमूर्धानमश्रयत । वायुनादेवैश्चसहतत्रस्थितमभूत् । यद्यस्माच्छिरोश्रयतब्रह्म तत्तस्मात्तदंगंशिरोनामा भवत् । तदेवशिरसःशिरस्त्वंशिरःशब्दप्रवृत्तिनिमित्तं । यद्ब्रह्मकर्तृकश्रयणकर्मत्वमित्यर्थः । ताएताःश्रियःश्रयणाच्छ्रीशब्दवा

च्याः । चक्षुःश्रोत्रंमनोवाक्प्राणइत्याद्यादेवताः । शीर्षन् चतुर्मुखशीर्ष्णिश्रिताःस्थिताः । एवंसर्वप्राणिनांशिरस्स्वप्येतादेवताःश्रि

रंपत्स्यतितदुक्थंभविष्यतीति वागुदक्रामदवदन्नश्नन्पिबन्नास्तैव चक्षुरुदक्रामदपश्यन्नश्नन्पि
बन्नास्तैवश्रोत्रमुदक्रामदशृण्वन्नश्नन्पिबन्नास्तैव मनउदक्रामन्मीलितइवाश्नन्पिबन्नास्तैव प्राण
उदक्रामत्तत्प्राणउत्क्रांतेऽपद्यत तदशीर्यताशारीर्ताँ३तच्छरीरमभवत्तच्छरीरस्यशरीरत्वं शी
र्यतेहवाअस्यद्विषन्पाप्माभ्रातृव्यःपरास्यद्विषन्पाप्माभ्रातृव्योभवतियएवंवेद ताअहिंसंतेवाह
मुक्थमस्म्यहमुक्थमस्मीति ताअब्रुवन्हंतेदंपुनःशरीरंप्रविशामतद्यस्मिन्नःप्रपन्नइदंशरीरमुत्था
स्यतितदुक्थंभविष्यतीति वाक्प्राविशदशयदेव चक्षुःप्राविशदशयदेव श्रोत्रंप्राविशदशयदेव
मनःप्राविशदशयदेव प्राणःप्राविशत्तत्प्राणेप्रपन्नउदतिष्ठत्तदुक्थमभवत्तदेतदुक्थंप्राणएवप्राण
उक्थमित्येवविद्यात्तंदेवाअब्रुवंस्त्वमुक्थमसित्वमिदंसर्वमसितववयंस्मस्त्वमस्माकमसीतितद
प्येतदृषिणोक्तं त्वमस्माकंतवस्मसीति ॥ ४ ॥

ताइत्यपिग्राह्यं । श्रिताइत्युपलक्षणं । तत्रस्थिताविष्णुमुपासतइत्यपिद्रष्टव्यं । चक्षुरादिदेवताश्चभाष्योक्तरीत्यारविचंद्रशंकराग्नि ॥ ७ ॥
वाय्वाद्याबोध्याः । एतद्विद्यावेत्तुःफलमाह । श्रयंतइति । योधिकारी एवंपरब्रह्मणाश्रितत्वमेवशिरसएतत्उक्तंशिरस्त्वंशिरः

शब्दप्रवृत्तिनिमित्तंवेद । अस्मिन्श्रियःसंपदःश्रयंतइत्यर्थः । चक्षुरादिदेवेषुप्राणस्यैवोत्तमत्वमितिप्रदर्शयितुमाख्यायिकामा
रभते । ताअहिंसंतेत्यादिना । ताःश्रियः शिरःश्रयणाच्छ्रीशब्दवाच्याश्चक्षुरादिदेवताअहिंसंत वाचाहिंसामकुर्वन् । परस्परं
व्यनिंदन्नितियावत् । किमिति । अहमुक्थंश्रेष्ठोस्मीति । द्विरुक्तिर्विवादस्यप्रातिस्विकताज्ञापनाय । तत्रनिर्णयार्थंविष्णवाज्ञ
यातादेवताअब्रुवन् । किमिति । अस्मात्चतुर्मुखसंबंधिनःशरीरात् । उत्क्रामाम । उत्क्रांताभवाम । हंतेतिहर्षे । तत्तेषांनो
स्माकंमध्ये । यस्मिन्देवेउत्क्रांतेइदंशरीरंपत्स्यतिपतिष्यति । तदुक्थंसश्रेष्ठोभविष्यतीति । एवंसमयंबद्ध्वा । तेषांमध्येप्रथमं
वाक् वागभिमानीवह्निरुदक्रामत् । ब्रह्मशरीरादुत्क्रांतः । तदायंदेहोवागभावादवदन्वचनक्रियामात्रमकुर्वन्नप्यश्नन्पिबन्ना
स्तैवआसीदेव नापतत् । एवंचक्षुरुदक्रामत् । श्रोत्रमुदक्रामत् । इतिवाक्यद्वयमपिव्याख्येयं । चक्षुःसूर्यः । श्रोत्रंचंद्रः । अ
थमनःमनोभिमानीशंकरःशेषःसुपर्णइंद्रश्चोदक्रामत् । तदामीलितइवनिमीलितनेत्रइव । प्रतिभाशून्यइवेतियावत् । ब्रह्मण
स्तादृग्भावायोगादिवेत्युक्तिः । अश्नन्पिबन्नितिसर्वत्रतदितरेंद्रियव्यापारस्याप्युपलक्षणं । अशनपानयोःप्राणव्यापारत्वात्प्रा
धान्यात्सर्वत्रतदुक्तिः । अथप्राणोवायुरुदक्रामत् । तत्शरीरंप्राणउत्क्रांतेसत्येव । अपद्यत पतितमभूत् । नकेवलंपतितंकिं
त्वशीर्यतच शैथिल्योन्मुखंचाभवत् । अतएवतद्देहस्यशरीरनामप्राप्तिरभूदित्याह ॥ अशारीति । यतइदमशारिअशीर्य
त । शॄहिंसायामितिधातोः । इतितस्मात्ततशरीरंशरीरनामकमभवत् । तदेवशरीरस्यशरीरत्वं शरीरशब्दप्रवृत्तिनिमित्तं ।
यच्छीर्यमाणत्वं । श्रृणातेःकर्मणिईरच् । एतद्वेत्तुःफलमाह ॥ शीर्यतइति । अस्यस्वोत्क्रमणेनब्रह्मदेहस्यशीर्णतापादकत्वरू

पप्राणमाहात्म्यवेत्तुर्द्विषन्द्वेषीवस्थितः । नरकाद्यनर्थहेतुत्वात् । भ्रातृव्यः भ्रातृवत्सहसंस्थितःपाप्मापापं । शीर्यतेहवै । नश्य
तिखलु । तथास्यद्विषन्पाप्मापापीभ्रातृव्यःशत्रुश्चपराभवति । नित्यनिरयप्राप्तिरूपपराभवंप्राप्नोतीत्यर्थः । एवंस्वनिर्गमेन
ब्रह्मदेहपातनाद्वायोरुत्तमत्वेसिद्धेपियादृच्छिकताशंकानिरासार्थंपुनस्तेषांपरीक्षांतरंवक्तुंप्रस्तावनायविवादक्रममाह ॥ ताइ
ति । उक्तपरीक्षयावायूत्तमत्वसिद्धौपुनर्विवादोनयुज्यते । तथाप्युक्तशंकानिरासार्थत्वाद्युज्यतएवेतिज्ञापनाय । अहिंसंतैवे
त्येवशब्दोविवादस्यात्यंतायोगव्यवच्छेदार्थः । हंतेतिखेदे । पूर्वपरीक्षायांस्वाभिलषितस्याजातत्वात् । इदंपुनरित्यादिस्पष्टं ।
पतितस्यशरीरस्यशवताशंकानिरासायाशयदित्युक्तिः । विष्णुब्रह्मणोस्तद्देहेऔदासीन्येनसत्त्वात् । यथोक्तंभाष्ये । उदासी
नौचतावास्तांकेशवश्चाब्जसंभवइत्यादि । प्राणेप्रपन्नेप्रविष्टेतच्छरीरमुदतिष्ठत् । अतःतत् सःप्राणः उक्थं उच्चैःस्थितत्वात्तथो
क्तः सर्वश्रेष्ठोभवत् । उक्थशब्दानुसारेणतदितिनपुंसकं । तदुक्थमित्येतद्विशदयति ॥ तदेतदिति । वत्स्वोत्क्रमणेनशरी
रपतनकारणं । एतत्स्वप्रवेशेनतदुत्थानकारणंच । यदुक्थमुक्तंतत्प्राणएवेत्यर्थः । अतोधिकारीप्राणउक्थमित्येवविद्यात् ।
एवंपरीक्षाद्वयानंतरंनिश्शंकास्संतोदेवाःसर्वेरुद्राद्यास्तंप्राणमब्रुवन् । किमिति । त्वमुक्थं गुणाधिकोसि । त्वमेवेदंसर्वमसि ।
अस्यसर्वस्यवचनदर्शनाद्यस्मदीयव्यापारस्यत्वमेवनियामकोसीतियावत् । वयंसर्वेपितवभृत्याःस्मस्त्वंचास्माकंपतिरसीति ।
उक्तार्थेमंत्रसंमतिमाचष्टे ॥ तदपीति । तदेतदपीतिसंबंधः । नकेवलंप्रजाहतिस्रोअत्यायमीयुरित्यादिकमेवोक्तंकिंत्वत्रप्रकृ

तप्रमेयमप्युक्तमित्यर्थः । मंत्रमुदाहरति ॥ त्वमस्माकमिति । उक्तएवार्थः ॥ ४ ॥ अथदेवाःवायुमुखाद्भगवद्गुणान्श्रुत्वा । तंवायुनोपदिष्टंनारायणंप्राणयंतशिष्यप्रशिष्यादिषुप्रकर्षेणानयन् उपदिदिशुः । तथातंवायुमपितद्गुणोक्त्याशिष्यादिषुप्राण

तंदेवाःप्राणयंतसप्रणीतःप्रातायतप्रातायर्तीँ ३ तत्प्रातरभवत्समागादिर्तीं ३ तत्सायमभवद हरेवप्राणोरात्रिरपानो वागग्निश्चक्षुरसावादित्यश्चंद्रमामनोदिशःश्रोत्रंसएषप्रहितांसंयोगो ध्यात्ममिमादेवताअदउआविरधिदैवतमित्येतत्तदुक्तंभवत्येतद्धस्मवैतद्विद्वानाहहिरण्यदन्वैदो नतस्येशेयंमह्यंनद्युरितिप्रहितांवाअहमध्यात्मंसंयोगंनिविष्टंवेदैतद्धतदनीशानानिहवाअस्मै भूतानिबलिंहरंतियएवंवेद तत्सत्यंसदितिप्राणस्तीत्यन्नंयमित्यसावादित्यस्तदेतत्रिवृत्त्रिवृदिववै चक्षुःशुक्लंकृष्णंकनीनिकेति सयदिहवाअपिमृषावदतिसत्यंहैवास्योदितंभवतियएवमेतत्सत्य स्यसत्यत्वंवेद ॥ ५ ॥

यंत । सवायुर्देवैःप्रणीतःशिष्यादिषूपदिष्टः तैर्विज्ञातगुणइतियावत् । प्रातायत तेषुप्रविश्यप्रततोबभूव । यतःप्रातायीर्तीं३प्र ततोभवत् । तत्तस्मात्प्रातर्नामकोभवत् । तथारूपांतरेणजीवस्वरूपचैतन्येन । समागात्संगतोभूत् । इतियस्मात्तत्तस्मा त्सायंशब्दवाच्योभवत् । एवमहार्यत्वादहर्नियामकत्वाच्चाहरेवप्राणः । रतिरूपत्वाद्रात्रिनियामकत्वाच्चरात्रिस्तन्नामाअपान

इत्येवंवायोरेवाध्यात्मंचत्वारिरूपाणि । एवमग्निरप्यध्यात्मंवाक्वागभिमानीवागाख्योबभूव । असावादित्यश्चचक्षुश्चक्षुरभिमानीचक्षुराख्योबभूव । चंद्रमाश्चमनः । यज्ञादिसाधनीभूतशालायूपकपालादिविषयकमनोवृत्त्यभिमानीमनोनामा । अत्र शिवशेषसुपर्णेंद्राअपिग्राह्याः । दिशःप्राच्यादिदिगभिमानिनोमित्रयमवरुणकुबेराः । श्रोत्रं श्रोत्राभिमानित्वेनतदाख्याः । अत्रचंद्रोपिग्राह्यः । विशेषस्त्वत्रभाष्योक्तरीत्याबोध्यः । सएषचाध्यात्मंदेवानांसंयोगोनान्यनिमित्तकः । किंतुप्रहितांप्रहितानामेव । नुडागमाभावश्छांदसः । विष्णुनाप्रेरितानामेवबोद्धव्यः । अतएवेमाःसर्वाःब्रह्मवाय्वाद्याःदेवताः देवतामात्राः । अदउ तद्विष्णवाख्यंपरंब्रह्मैकमेवाधिदैवतं सर्वाधिकंदैवतं । तत्रहेतुगर्भविशेषणं ॥ **आविरिति** । पूर्णज्ञानादिस्वरूपमित्यर्थः । इत्येतदेवप्रमेयंसर्ववेदादिसदागमैस्तात्पर्यादुक्तं कथितंभवति । अस्ति नान्यत् । हस्मवेतिनिपातत्रयंसुप्रसिद्धिद्योतकं । एतत् विष्णोरेवाधिदैवतत्वस्यसर्ववेदादिमहातात्पर्यविषयत्वमपिसर्वप्रमाणेषुसुप्रसिद्धमित्यर्थः । एतद्विष्णोरेवसर्वोत्तमत्वादिकं । विद्वान् जानन् । हिरण्यदन्नामवैदोवेदद्रष्टामुनिराह । किमिति । यथालोकाःमह्यंनदद्युः मदभीष्टमितिशेषः । तस्य तथाकरणस्यकश्चन नेशे नसमर्थइति । अथवा । वै तत् इतिपदच्छेदः । तदेतद्विद्वान्हिरण्यदन् । आह हस्मवैइत्येकवाक्यतयायोज्यं । तर्हिसुराअपिनसमर्थाःकिंनेतिभावेनापवादसूचनायोक्तं ॥ **अयमिति** । मानुषादिजीवइत्यर्थः । किंचप्रहितां विष्णुनाप्रहितानांप्रेरितानां । हिगतावित्यतःक्विप् । तुगागमश्च । ब्रह्मादिदेवानांअध्यात्मंनिविष्टं अध्यात्मसंबंधिनमितियावत् । ॥ ९ ॥
संयोगमहंवेदवै । तत्तस्मात्कारणात् । अस्मैउक्तसंयोगवेत्रे । मह्यं । भूतानिमदवराणि । मुक्तौबलिंहरंति । यथेष्टभोगभुगहंमुक्तौस्यामितियावत् । उपलक्षणमेतत् । स्वेच्छाविहृतिश्चाहंस्यामित्यपिग्राह्यं । हवैप्रमितमेतत् । नैवात्रसंदेहइतिभावः । ननु तवकथंमुक्तौस्वेच्छाविहारःसंभवति । कैश्चित्तद्विघातस्यापिकरणसंभवादित्यतआह ॥ **तदनीशानानीति** । भूतानीत्यनुकृष्यते । तत्तत्रमद्विहारनिषेधे । भूतान्यनीशानानिअशक्तानि । देवादीनृतेनकश्चिच्छक्तोस्तीत्यर्थः । एतद्धएतद्धि । प्रहितां वाइत्यादिकंतेनमुनिनाकथितमितिशेषः । अथवाऽनीशानानीत्येतदुत्तरवाक्येसंबध्यते । तथाचयएवंवेद । विष्णुप्रहितदेवानामध्यात्मंसंयोगमेतन्नियोक्तारंचविष्णुंजानाति । अस्मैज्ञानिने । अनीशानानिस्वस्वाम्यन्यानिस्वावराणिमुक्तानिभूतानि बलिंहरंति मुक्तावितियोजना ॥ विद्यांतरमारभ्यते ॥ **तत्सत्यमिति** । तद्ब्रह्मविष्णवाख्यंसत्यं । कथंसर्वोत्तमत्वात्सत् । पूर्णत्वात्ति । सर्वज्ञत्वाद्यं । ततःकर्मधारयः । अथसत्यशब्देनपृथक्पृथग्वाच्यंदेवतात्रयमप्याह ॥ **सदितीति** । प्राणोवायुः । शेषादिसर्वदेवोत्तमत्वात्सदितिसंप्रोक्तः । अन्नंअन्नाभिमानीसदावेदोद्गिरणादतिनादवत्त्वादन्नशब्दवाच्योब्रह्माजीवेषुपूर्णत्वात्तीति प्रोक्तः । असावादित्यःप्रकाशेनसर्वलोकयमनात्यमित्युद्दिष्टः । तदेतद्देवतात्रयंत्रित्वेनवर्ततइतित्रिवृत् । मिलितमेवेतियावत् । सत्यशब्देनोच्यते । नतुपरब्रह्मवदेकैकमित्यर्थः । एतच्चत्रिवृत्देवतात्रयं । चक्षुषिसंस्थितमित्यत्रोपस्कर्तव्यं । तत्कुतइत्यतस्तत्र लिंगमाह ॥ **त्रिवृदिवेति** । त्रिवृद्देवताधिष्ठानत्वादेव एतच्चक्षुरपिशुक्लंकृष्णंकनीनिकेतित्रिवृदिव त्रित्वसंख्योपेतमिवदृश्यतेवै इति । एतद्विद्याफलमाह । सयदीति । यएवमेतस्यसत्यस्यविष्णोर्मिलितदेवतात्रयस्यच । एतत्सत्यत्वंपृथक्मिलितत्वेनचवेद । सोधिकारी । यदिकथंचिन्मृषावदति । अपि तथापि । अस्योदितंवचनंसत्यंवैभवतिह । सत्यप्रायंभवति । असत्यभाषणप्रयुक्तदो

 षवान्नभवतीतियावदित्यर्थः ॥ ५ ॥ विद्यांतरमारभ्यते ॥ तस्येति । तस्यनारायणस्य । वाक् सर्ववेदात्मिका । तंतिर्महारज्जुरूपा ।

तस्यवाक्तंतिर्नामानिदामानितदस्येदंवाचातंत्यानामभिर्दामभिःसर्वंसितं सर्वंहीदंनामानीँ३
सर्वंवाचाभिवदति वहंतिहवाएनंतंतिसंबद्धायएवंवेदतस्योष्णिग्लोमानित्वग्गायत्रीत्रिष्टुम्मांसमनुष्टुप्स्नावान्यस्थिजगतीपंक्तिर्मज्जाप्राणोबृहती सच्छंदोभिश्छन्नोयच्छंदोभिश्छन्नस्तस्माच्छंदांसीत्याचक्षतेछादयंतिहवाएनंछंदांसिपापात्कर्मणोयस्यांकस्यांचिद्दिशिकामयतेयएवमेतच्छंदसांछंदस्त्वंवेद तदुक्तमृषिणाऽपश्यंगोपामित्येषवैगोपाएषहीदंसर्वंगोपाय त्यनिपद्यमानमितिनह्येषकदाचनसंविश त्याचपराचपथिभिश्चरंतमित्याचह्येषपराचपथिभिश्चरति ससध्रीचीःसविषूचीर्वसानइतिसध्रीचीश्चह्येषविषूचीश्चवस्तइमाएवदिश आवरीवर्तिभुवनेष्वंतरित्येषह्यंतर्भुवनेष्वावरीव र्त्यथोआवृतासोवतासोनकर्तृभिरिति सर्वंहीदंप्राणेनावृतंसोयमाकाशःप्राणेनबृहत्याविष्टब्धस्तद्यथायमाकाशःप्राणेनबृहत्याविष्टब्धएवंसर्वाणिभूतान्यापिपीलिकाभ्यःप्राणेनबृहत्याविष्टब्धानीत्येवविद्यात् ॥ ६ ॥

जगदाख्यपशुबंधइतिशेषः । तद्गतानिवेदवाग्गतानि नामानिब्रह्मरुद्रादीनिविप्रक्षत्रियादीनिचदामानिअवांतररज्जुरूपाणि ।

तदस्यनारायणस्य । वाचावेदवाग्रूपया । तंत्यामहारज्ज्वा । तद्गतैर्नामभिर्ब्रह्मरुद्रेंद्ररूपैर्विप्रक्षत्रियवैश्यादिरूपैश्चदामभिर वांतररज्जुभिरिदंसर्वंजगत्ब्रह्मादिकं सितंबद्धं । कीदृशोयंबंधोनामभिर्वाचाचेत्यतआह ॥ **सर्वंहीदमिति** । इदंसर्वंजगत् । नामनींऽनाम्न्येववर्ततेहि । सर्वेपिनामवंतइतियावत् । सर्वमपिवाचावेदवाचाविष्णुरभिवदति । सर्वेषामपिवेदोक्तान्येवनामा निविष्णुःसंकेतितवानितियावत् । एतद्विद्यावेत्तुःफलमाह ॥ **वहंतीति** । यएवंवेदएनंवेत्तारंप्रति । तंतिसंबद्धावेदोदिताः सर्वेदेवाद्याः । वहंति । संसारेमुक्तौच बलिमितिशेषः । अथवा । तंतिसंबद्धाःपंचभूताभिमानिनोविघ्नेशाद्यादेवाअश्वरूपा भूत्वारथस्थमेनंवहंतीत्यर्थः । अस्यांचविद्यायांयोग्योब्रह्मपदयोग्योयःसएव । अतउक्तंफलंतस्ययुक्तमितिबोध्यं । एवंतस्ये त्यादिकं तस्यवायोर्वाचातंत्यानामभिर्दामभिःसर्वंसुपर्णशेषगिरिशशक्रसूर्यादिकंजगद्बद्धमित्यादिवायुपरतयापिव्याख्येयं । पुनर्विद्यांतरमारभ्यते ॥ **तस्योष्णिगिति** । तस्यहरेर्विमुक्तवायोश्च । लोमानि । लोमसु । सप्तसुप्रथमेतिसूत्रात् । उष्णिक् तन्नामकच्छंदस्कोमंत्रगणआश्रितइत्यर्थः । अथवातस्यलोमानिउष्णिक् उष्णिगाश्रयत्वादुष्णस्वरूपत्वाच्चतच्छब्दवाच्यानि । यस्माद्यज्जायतेचांगादितिवचनात् । यद्वाब्राह्मणोस्यमुखमासीदित्यादिवदौपचारिकोयमभेदव्यपदेशइतिज्ञातव्यं । एवमु त्तरत्रापित्रेधाव्याख्येयं । गानत्राणकर्तृत्वाद्गायतांत्रायकत्वाद्वागायत्री । त्रिभिर्वेदैःस्तुतत्वात्त्रिष्टुप् । अनुआनुकूल्येनस्तूय मानत्वादनुष्टुप् । जातस्यगतित्वाज्जगती । पंचरूपत्वात्पङ्क्तिः । बृहत्त्वात्बृहती । सभगवान्वायुश्चछंदोभिरुष्णिगादिभिः छन्नस्तनुःकवचैरिव । यद्यस्मादेवंभगवान्छंदोभिश्छन्नस्तस्माद्भगवदाश्रितत्वेनतदाच्छादकत्वादेवतानिछंदांसीत्याचक्षतेवि

द्वांसः । छदेरसुन्नुमागमश्च । एतद्विद्यावेत्तुःफलमाह ॥ छादयंतीति । योधिकारीछंदसामेतत्विष्णुच्छादकतारूपंछंद
स्त्वं छंदश्शब्दप्रवृत्तिनिमित्तंवेद । सयदि । यस्यांकस्यांचिद्दिशि । वस्तुंकामयते । तर्हितस्यांदिशिवसंतमेनंछंदांसितत्त
द्दिग्वासप्राप्तात् । कर्मणः । ल्यब्लोपनिमित्तापंचमी । पापंकर्मनिवार्य छादयंति गोपायंतीत्यर्थः । अत्रछंदःस्थितछंदोनाम
कहरेरेवमुख्यतःपापाद्रक्षकत्वं छंदसांतुतत्संबंधादेवेतिज्ञातव्यं । इदंचफलमुपासनायोग्यानांभृग्वादीनांदेवतानांचैवमुख्य
मितिज्ञेयं । अत्रमंत्रसंमतिमाह ॥ तदुक्तमिति । अपश्यंगोपामनिपद्यमानमाचपराचपथिभिश्चरंतं । ससध्रीचीःसविषू
चीर्वसानआवरीवर्तिभुवनेष्वंतरितिमंत्रेण । तत्अस्मदुक्तंप्रमेयंऋषिणामंत्रद्रष्ट्रोक्तंकथितमित्यर्थः । मंत्रस्यदुर्गमार्थत्वात्स्व
यमेवक्रमेणमंत्रभागाननूद्यव्याचष्टे ॥ अपश्यंगोपामित्यादिना । एषःछंदस्संस्थितवायुस्थोभगवान् । गोपाःवै । कुतः
हियस्मादेषःसर्वछंदोविद्यावेत्तृजनंगोपायतिपापाद्रक्षति । अनिपद्यमानमित्यस्यार्थोनह्येषइति । एषवायुःवायुस्थश्चहरिःकदा
चननसंविशतिनतूष्णींतिष्ठति । सदासर्वप्रवृत्तिमान्भवतीतियावत् । आचेतिद्वितीयपादस्यव्याख्या ॥ आचह्येषइति ।
एषवायुःतत्स्थोहरिश्च । आसमंतात् । सर्वत्रच । पंचभूतानामंतरितियावत् । परापराकूबहिश्च । पंचभूतेभ्यइतिशेषः । प
थिभिःस्वाभिमतमार्गैश्चरति । ससध्रीचीरितितृतीयपादस्यार्थः ॥ सध्रीचीरिति । एषहिवायुर्वायुस्थश्चहरिः । सध्रीचीःस
ध्रीचीनाः । द्वितीयासप्तम्यर्थे । सध्रीचीनासु । अवकासुप्राच्यादिचतुर्दिक्ष्वितियावत् । विषूचीर्विषूचिषुवक्रासु । आग्नेया
दिचतुष्कोणदिक्ष्वितियावत् । चशब्दौमिथःसमुच्चये । वस्तेवसति । मंत्रेविशेष्यपदाभावात्कास्ताःसध्रीचीनाविषूचीनाश्चे

त्यतोविशेष्यंदर्शयति ॥ इमाएवेति । दिशएवेमाःसध्रीच्यादिपदवाच्याइत्यर्थः । आवरीवर्तीतितुरीयपादस्यार्थः एष
हीति । वायुर्वायुस्थोहरिश्च । भुवनेषुसर्वलोकेषु । आवरीवर्ति आसम्यक्सर्वदाचवर्तते । लोकसाक्षीसन्वर्ततइत्यर्थः ।
तथाचायंमंत्रार्थउक्तोभवति । गोपांछंदोविद्यावेत्तृणांपापाद्रक्षकं । अनिपद्यमानं कदाचिदप्येकत्रतूष्णींसंवेशनरहितं । सदा
सर्वप्रवृत्तिमंतमितियावत् । आचपराचपथिभिश्चरंतं । सर्वत्रसंचारिणं । छंदःस्थितवायुं वायुस्थंचभगवंतं । अहंअपश्य
मिति। मंत्रद्रष्टुर्मुनेर्वचनमिदं । सएषवायुर्भगवांश्च। सध्रीचीःसध्रीचीषुऋज्वीषुपूर्वादिदिक्षु। वसानोभवति । सएवविषूचीर्विषू
चीषुकोणदिक्षुचवसानोभवति । एषएवहिभुवनेष्वंतरावरीवर्ति सर्वलोकसाक्षितयावर्ततइति । सर्वंहीदंप्राणेनावृतमित्यादि
वक्ष्यमाणार्थेपि । अप्रक्षितंवसुबिभर्षिहस्तयोरषाळ्हंसहस्तन्विश्रुतोदधे । आवृतासोऽवतासोनकर्तृभिस्तनूषुतेक्रतवइंद्रभूरय
इतिमंत्रःसमाख्यारूपोस्तीतिभावेनतमुदाहर्तुमाह ॥ अथोइति । अथोछादयंतिहवाएनंछंदांसीत्युक्तार्थेसंमततयाअपश्यं
गोपामितिमंत्रोदाहरणानंतरं । सर्वंहीदमितिवक्ष्यमाणार्थेपिमंत्रउदाहरिष्यतइतिशेषः । तत्रतृतीयपादमात्रमुदाहरति॥ आ
वृतासइति । प्रकृतानुपयोगादितरेषांपादानामनुदाहरणं । समग्रमंत्रार्थस्तु । हेइंद्रपरमेश्वरवायोवा । अप्रक्षितं प्रक्षय
शून्यं । नित्याक्षीणं वसु हस्तयोस्त्वंबिभर्षि । अषाळ्हमसह्यंसोढुमशक्यमनंतमितियावत् । सहोबलं । तन्विस्वतनौ
श्रुतःप्रसिद्धस्त्वंदधे धृतवानसि । कर्तृभिर्धनसंग्रहकारिभिरवतासोन । अवताःकनकावटास्तेयथाआच्छाद्यंतेतथाभूर
योनंताःक्रतवोज्ञानरूपाःजीवास्तेतव । तनुषुआवृतासःआवृताःगोपिताइति । एवंसमाख्यामंत्रमादावेवोदाहृत्येदानींस

माख्येयमभिधित्सितमर्थं निरूपयति ॥ सर्वंहीति । प्राणेनभगवतावायुनाच । उपलक्षणमेतत् । आकाशेनचेत्यपिग्राह्यं । सोयमाकाशइतिवक्ष्यमाणत्वात् । आकाशपदवाच्यप्रकृत्याच । इदंसर्वंचेतनजातं । महदाद्यचेतनजातंचावृतंस्वदेहेगोपितं । हिप्रसिद्धमित्यर्थः । सोयमाकाशःप्रकृतिः । उपलक्षणमेतत् । वायुश्च बृहत्या बृहत्त्वाद्बृहतीशब्दवाच्येनप्राणेनभगवता । विष्टब्धोविधृतः । उक्तार्थमेवदार्ढ्यार्थंपुनर्दृष्टांतमुखेनोपपादयन्नेतज्ज्ञानस्यैवमोक्षसाधनताज्ञापनायास्यार्थस्यावश्यवेद्यतां

अथातोविभूतयोस्यपुरुषस्यतस्यवाचासृष्टौपृथिवीचाग्निश्चास्यामोषधयोजायंतेग्निरेनास्वादयतीदमाहरतेदमाहरतेत्येवमेतौवाचंपितरंपरिचरतःपृथिवीचाग्निश्चयावदनुपृथिवीयावदन्वग्निस्तावानस्यलोकोभवतिनास्यतावल्लोकोजीर्यतेयावदेतयोर्नजीर्यतेपृथिव्याश्चाग्नेश्चयएवमेतांवाचोविभूतिंवेद प्राणेनसृष्टावंतरिक्षंचवायुश्चांतरिक्षंवाअनुचरंत्यंतरिक्षमनुश्रृण्वंतिवायुरस्मैपुण्यंगंधमावहत्येवमेतौप्राणं

विधत्ते ॥ तद्यथेति । तत्तत्रवक्ष्यमाणार्थेपूर्वोक्तमेतदेवनिदर्शनं । यथायमाकाशःप्रकृतिः । उपलक्षणयावायुश्च । बृहत्याप्राणेनविष्णुनाविष्टब्धएवमापिपीलिकाभ्यः । पिपीलिकाआरभ्यसर्वाणिभूतानि । बृहत्याप्राणेन । मुख्यतोबृहतीप्राणशब्दवाच्येनविष्णुना । अमुख्यतस्तद्वाच्येनवायुनाच । प्रकृत्याचेत्यपिग्राह्यं । विष्टब्धानिविधृतानीत्येवविद्यादित्यर्थः ॥ ६ ॥ अथएतद्विद्यानिरूपणानंतरं । अतःमहाफलसद्भावादस्यपुरुषस्यभगवतोविभूतयोगमहिमानोनिरूप्यंते । ॥ १२ ॥

तत्रादौमुखमहिमानंनिरूपयति ॥ तस्येति । तस्यविष्णोर्वाचा । मुखोपलक्षणमेतत् । मुखेन । पृथिवीचाग्निश्चेत्युभौसृष्टौ ।

पितरंपरिचरतोंतरिक्षंचवायुश्चयावदन्वंतरिक्षंयावदनुवायुस्तावानस्यलोकोभवतिनास्यताव
ल्लोकोजीर्यतेयावदेतयोर्नजीर्यतेंतरिक्षस्यचवायोश्चयएवमेतांप्राणस्यविभूतिंवेद चक्षुषासृष्टौद्यौ
श्चादित्यश्चद्यौर्हास्मैवृष्टिमन्नाद्यंसंप्रयच्छत्यादित्योस्यज्योतिःप्रकाशंकरोत्येवमेतौचक्षुःपितरंप
रिचरतोद्यौश्चादित्यश्चयावदनुद्यौर्यावदन्वादित्यस्तावानस्यलोकोभवतिनास्यतावल्लोकोजीर्य
तेयावदेतयोर्नजीर्यतेदिवश्चादित्यस्यचयएवमेतांचक्षुषोविभूतिंवेद श्रोत्रेणसृष्टादिशश्चचंद्रमा
श्चदिग्भ्योहैनमायंतीँ ३ दिग्भ्योविशृणोतिचंद्रमाअस्मैपूर्वपक्षापरपक्षान्विचिनोति पुण्यायक
र्मणेएवमेतेश्रोत्रंपितरंपरिचरंतिदिशश्चचंद्रमाश्चयावदनुदिशोयावदनुचंद्रमास्तावानस्यलोको
भवतिनास्यतावल्लोकोजीर्यतेयावदेतेषांनजीर्यतेदिशांचचंद्रमसश्चयएवमेतांश्रोत्रस्यविभूतिं
वेद मनसासृष्टाआपश्चवरुणश्चापोहास्मैश्रद्धांसन्नमंतेपुण्यायकर्मणेवरुणोस्यप्रजांधर्मेणदाधारै
वमेतेमनःपितरंपरिचरंत्यापश्चवरुणश्चयावदन्वापोयावदनुवरुणस्तावानस्यलोकोभवतिनास्य
तावल्लोकोजीर्यतेयावदेतेषांनजीर्यतेऽपांचवरुणस्यचयएवमेतांमनसोविभूतिंवेद ॥ ७ ॥

अस्यांपृथिव्यांओषधयोव्रीह्यादयोजायंते । भगवत्सेवार्थंपृथिवीओषधीर्जनयतीतियावत् । अग्निश्चैनाःपृथिवीजाताःओ

षधीः । स्वादयति पाकेनस्वादुतायुक्ताःकरोति । एतच्चाग्निर्नौदासीन्येनकरोतिकिंतुभक्त्युद्रेकेणोद्युक्तएवकरोतीतिभावे
नाह । इदमाहरतेति । इदंपचनीयंतंडुलादिकंआहरत । इदंशाकफलादिकमाहरतेतिजनान्प्रत्युक्त्वातैराहृताआहृताःसर्वाः
ओषधीःस्वादयतीत्यन्वयः । एवंपृथिवीचाग्निश्चेत्येतौपितरं स्वजनकत्वात्पितृरूपांवाचं । परिचरतः सेवाते । मुखभोग्यम
न्नंनिष्पाद्यसर्वेषांमुखेस्थितस्यविष्णुमुखस्यसमर्पयतइतिभावः । एतद्विद्यावेत्तुःफलमाह ॥ **यावदिति** । योधिकारी । एवं
वाचोविष्णुमुखस्य । विभूतिं पृथिव्यग्निस्रष्टृत्वतत्सेव्यत्वरूपां । वेदअस्य । यावत्यावतिदेशेपृथिवी यावच्चाग्निस्तावान्
लोकोभवति । कथं । अनुअनुतांतंचानुसृत्यैव । ताभ्यांसमन्वितस्तत्समव्याप्तिश्चभवतीतिभावःयावदेतयोःपृथिव्याश्चाग्ने
श्चलोकोनजीर्यतेतावत्कालमस्यापिलोकोनजीर्यते । पृथिव्यग्निवन्मुक्तःसन्विष्णुसमीपेवैकुंठादौकदाप्यनष्टलोकःसन्नसौवस
तीतिभावः । इदंचफलंपृथिव्यग्निपदयोग्यजीवानामेव । अन्येषांतुपृथिव्यग्निलोकेमुक्तौतत्स्थानेसंचरणमात्रमितिज्ञातव्यं ॥
प्राणेनेति । अत्रप्राणशब्देनभगवदीयोघ्राणस्तदधिष्ठाताभगवत्प्राणवायुश्चोच्यते । तस्यपुरुषस्येतिवर्तते ॥ **अंतरिक्ष
मिति** । तदभिमानीविघ्नेशःवायुर्मुख्यः । तयोःसेवाप्रकारमाह ॥ **अंतरिक्षमिति** । भूताकाशाभिमानिनंविघ्नेशमनुवै ।
तत्प्रेरणयेतियावत् । चरंति सर्वाणिभूतानिविष्णुप्रीत्यर्थंतीर्थक्षेत्राद्यटनंकुर्वंति । अंतरिक्षमनु तत्प्रेरणयैव । भगवत्कर्माणि
श्रोत्रेणश्रृण्वंति । अंतरिक्षाभिमानीविघ्नेशःस्वजनकविष्णुप्राणसेवार्थंप्राणिनांविष्णुप्रीतिजनकयात्रादिप्राणव्यापारसिद्ध्यर्थ
मवकाशंददाति । तत्प्राणकृतानांजगत्सर्जनादिव्यापाराणांश्रवणार्थंश्रोत्रस्योपचायकोभूत्वाश्रवणशक्तिप्रदश्चभवतीतिया
वत् । एतदुभयंचजीवप्राणाधिष्ठातृविष्णुप्राणप्रीतिहेतुत्वात्तत्सेवारूपंभवत्येवेतिहृदयं । वायुश्चास्मैविष्णुघ्राणाय । पुण्यंशुभं
गंधमावहति । एवमेतावित्यादिपूर्ववद्व्याख्येयं ॥ **चक्षुषेति** । द्यौर्द्युलोकाभिमानिनीदेवता । अस्मै अस्यभगवतःप्रीतिजनकक
र्मसिद्धये । प्राणिनांवृष्टिं तयाचान्नाद्यं अन्नपानीयश्रीतुलसीगंधपुष्पादिसर्वपूजासाधनद्रव्यंसंप्रयच्छति । आदित्यश्चास्यै
तत्कर्मसिद्धयेज्योतिःप्रकाशं स्वज्योतिषाद्रव्यप्रकाशनंकरोति । एवमेतावितिपूर्ववत् । एतत्कर्मणोश्चक्षुःसेवारूपत्वंप्रागुक्त
मेवबोध्यं ॥ **श्रोत्रेणेति** । दिशोदिगभिमानिनोमित्रयमवरुणकुबेराः दिशांश्रोत्रसेवाप्रकारमाह ॥ **दिग्भ्यइति** । एनं
जीवश्रोत्रस्थितंभगवंतं । सर्वेवीणावेणुमुरजमृदंगादिशब्दाःदिग्भ्यएवायंति । उपसर्पंतिह । दिग्देवताःहि सुशब्दान् ।
स्वस्वाधिष्ठितप्राच्यादिदिग्भ्यउपानीयजीवश्रोत्रनिष्ठायभगवतेसमर्पयंतीतियावत् । ततःकिमित्यतआह ॥ **दिग्भ्यइति** ।
दिग्भ्योदिग्देवताभ्यस्तत्प्रेरणयाभगवदन्योजीवस्तांच्छब्दान्श्रृणोति । भगवांस्तुदिग्भ्यःदिशोविहायतत्प्रेरणांविनैवेतियाव
त् । विश्रृणोति विशेषेणतानेवशब्दान्जीवश्रोत्रगस्वश्रोत्रेणश्रृणोति । जीवानांवीणादिशब्दश्रवणजंसुखंचभुंक्ते । अतइदं
भगवत्परिचरणरूपंभवतीतिभावः । चंद्रमाश्चास्मैपुण्यायकर्मणे । एतंभगवंतमुद्दिश्यजीवानांपुण्यंकर्मकर्तुंस्वकलावृद्धि
क्षयाभ्यां । पूर्वपक्षापरपक्षान्विचिनोति विवेचयति । चंद्रमसाशुक्लपक्षकृष्णपक्षविवेचनेकृतएवहितत्रतत्रदेवपित्रधिष्ठान
भेदेनविष्णुस्तुत्यादिकर्माणिप्रवर्तंते । ततस्तानिस्तुत्यादीनिकर्माणिभगवान्स्वश्रोत्रेणश्रृणोति । अतइदंतत्परिचरणरूपंभव
त्येवेतिभावः । शिष्टंपूर्ववत् ॥ **मनसेति** । अत्रापइत्यबभिमानिनोब्रह्मवायुशेषाद्याःसर्वदेवाउच्यंते । वरुणःप्रसिद्धएव ।

तत्रापांसेवाप्रकारमाह ॥ आपोहेति । अस्मैपुण्यायकर्मणे एतमुद्दिश्यजीवानांपुण्यंकर्मकर्तुमापोब्रह्माद्याःदेवाःश्रद्धांसंन
मंते प्रयच्छंति । तत्रविवेकस्तुविष्णोर्विषयधर्मेष्वित्यादिनाभाष्योक्तरीत्यानुसंधेयः । वरुणश्चास्यप्रजाःमनोनिष्ठभगवन्मन
सोर्थे तत्प्रीत्यर्थमितियावत् । धर्मेण पूर्तनिर्माणरूपकर्मणा । तत्रप्राणिनांश्रद्धोत्पादनेनप्रजां । दाधार दधार । श्रद्धापूर्वक
पूर्तनिर्माणपुण्यवतश्चकारेतियावत् । अथवाअस्मैपुण्यायकर्मणेश्रद्धांसंनमतइत्येतदत्रापियोज्यं । तथाचवरुणोस्मैएतमुद्दि

आपाः ३ इत्यापइति तदिदमापएवेदंवैमूलमदस्तूलमयंपितैतेपुत्रायत्रहक्वचपुत्रस्यतत्पितुर्यत्रवा
पितुस्तद्वापुत्रस्येत्येतत्तदुक्तंभव त्येतद्धस्मवैतद्विद्वानाहमहिदासऐतरेयआहंमांदेवेभ्योवेद ओम
द्देवान्वेदेतःप्रदानाद्ध्येतइतःसंभृताइति सएषगिरिश्चक्षुश्श्रोत्रंमनोवाक्प्राणस्तंब्रह्मगिरिरित्याच
क्षतेगिरतिहवैद्विषंतंपाप्मानंभ्रातृव्यंपरास्यद्विषन्पाप्माभ्रातृव्योभवतियएवंवेद सएषोसुः

श्यपूर्तनिर्माणरूपपुण्यकर्मकर्तुंजीवानांश्रद्धांसंनमते । अस्यभगवतःप्रजांचराजत्वादिधर्मेणदधार । तत्रासौराजासत्यानृते
विविंचतीतिश्रुतेः । प्रजाधारणोपयोगिवापीकूपतटाकादिनिर्माणेश्रद्धोत्पादनद्वारेणतन्निर्माणरूपधर्मेणचदधारेत्यर्थः ।
एवमेतेइत्यादिपूर्ववत् ॥ ७ ॥ एवंभगवतामहिदासेनोपदिष्टारमास्वयंसर्वज्ञापिलोकानुग्रहायपरकीयंसंशयंस्वयमाहृत्यभगवं
तंपृच्छति । आपाः ३ इति । मनसासृष्टाआपश्चवरुणश्चेत्यपूशब्दवाच्यतासर्वेषांब्रह्मादिदेवानामभिहिता नचतत्रकिमपि

॥ १४ ॥

निमित्तमुक्तं । अतस्तेषांआपइतिनाम कथमुपपद्यतइत्यर्थः । भगवानुत्तरंवक्ष्यन्प्रथमतःप्रतिजानीते ॥ आपइतीति ।
एषांदेवानामापइतिनामोपपन्नमेवेत्यर्थः । वक्ष्यमाणानुसारेणनिमित्तसद्भावादितिभावः । तत्रनिमित्तंवक्तुमुपोद्घातमाह ॥
तदिदमापइति । इदंमदाख्यंयद्ब्रह्मतत्तावदापएव अप्शब्दाभिधेयंभवत्येत्र । सर्वगुणैरापूर्णत्वात् । इदंचाप्शब्दवाच्यं
ब्रह्म सर्वस्यापिजगतोमूलं कारणं । वैप्रसिद्धं । अदस्तदन्यत्सर्वंचतुर्मुखादिकं । तूलं कार्यरूपं । नचायंकार्यकारणभावोवृ
क्षबीजयोरिवोपादेयोपादानत्वरूपोमंतव्यः किंतुअयंभगवान्पिता । एतेचब्रह्मादयोदेवाःपुत्राइत्यर्थः । अस्त्वेवंकिंप्रकृतइत्य
तआह ॥ यत्रहेति । यत्रक्वच । यत्किंचित्पुत्रस्यनामादितत्पितुरपिभवत्येव । पितुर्वायत्नामादिकं । तत्पुत्रस्यापिभव
त्येव । वाशब्दोप्यर्थः । इतिहेतोः । हेरमे । एतत्त्वत्प्रश्नस्योत्तरमुक्तंभवति । अयमाशयः । पुत्रस्ययन्नामधनादिकंवा ।
तत्तावत्पितुरपिभवेदेव । पितामहादीनामपिपितरइतिलोकवेदयोःप्रसिद्धेः । पुत्रसंपादितेधनादौचममेदंधनमितिपितुरबा
धितव्यवहाराच्च । पुत्रस्यपित्रधीनत्वात् । एवंपितृनामादिकमपिपुत्रस्यामुख्यतयाभवत्येव । यदवोरघवःकुरवइत्यादिव्यव
हारस्यतद्वंशजातेषुदर्शनात् । पितृधनादेःपुत्रेणानुभूयमानत्वाच्च । प्रकृतेचब्रह्मादीनांसर्वेषांविष्णुपुत्रत्वात्तदीयमापइतिना
मतेष्वमुख्ययावृत्त्याप्रयुज्यतइति । प्रकारांतरेणापिदेवानामापइतिनामयुक्तमेवेतिवक्ति ॥ एतद्धस्मेति । एतत्भगवन्ना
म्नोदेवेषुवृत्तौवक्ष्यमाणंचनिमित्तंविद्वान्नित्योदितज्ञानत्वादेवजानन् ऐतरेयोमहिदासोभगवान् । एतद्वक्ष्यमाणंवचनंरमांप्र
खं० ६८ त्याह । हस्मवेतिनिपातत्रयमस्यार्थस्यसुप्रसिद्धिद्योतकं । किमाहेत्यतआह ॥ आहमिति । अहं आदेवेभ्योदेवपर्यंतं

मांवेदवेद्मि । उ उत । आ मत् । मत्पर्यंतंदेवांश्चाहंवेद । अहंदेवेषुव्याप्तोदेवाश्चमयिस्थिताइतियावत् । नचैतदप्रामाणिकं ।
॥ १५ ॥ मत्प्रत्यक्षसिद्धत्वादित्यभिप्रेत्याहंवेदेत्युक्तं । तथाचयथाक्षीरनीरयोर्मिश्रत्वेनीरेपिक्षीरशब्दव्यवहारः । एवंममदेवानांचमि
थोव्याप्तत्वान्मन्नामव्यवहारस्तेषुयुक्तइतिभावः । किंचैतेदेवाइतोमत्तएवप्रदानाः पदप्रदानवंतः । मत्प्रदत्तपदान्येवाधितिष्ठं
तीतियावत् । अपिचैतेदेवामत्तएवमदाज्ञामात्रेणप्रदानाः सत्ताप्रतीतिप्रवृत्तिप्रदानवंतोहियस्मात्तस्मादेतेइतोमत्तएवसं
भृताः । ज्ञानकर्मबलचेष्टादिदानेनपोषिताः । अतः सर्वप्रकारेणमदधीनत्वाद्देवानांमन्नाम्नाव्यपदेशोयुज्यते । यदधीनाय
स्यसत्तातत्तदित्येवभण्यतइत्यादेरितिभावः । एवंप्रश्नोत्तरमुक्त्वाविद्यांतरमारभ्यते ॥ **सएषइति** । सएषभगवान् । सर्वभू
तानांगिरणात्निगिरणात्गिरिः । अस्यविश्वस्यदर्शनाच्चक्षुः । सर्वश्रोतृत्वतःश्रोत्रं । सर्वमंतृत्वान्मनः । सर्ववक्तृत्वाद्वाक् ।
सर्वप्रणयनात्प्राणश्च । तमेनंभगवंतं । ब्रह्मगिरिरित्याचक्षतेविद्वांसः । गुणपूर्णत्वाद्ब्रह्म । अखिलस्यनिगिरणाद्गिरिः । ब्रह्म
चासौगिरिश्चेति । एवंवेत्तुःफलमाह ॥ **गिरतीति** । यएवंतंविष्णुंगिर्यादित्वेनवेद । उपास्यापरोक्षतःपश्यति सोखिलं पा
प्मानमप्रारब्धंगिरति विनाशयति । कीदृशं द्विषंतंद्वेषिणमिवानिष्टकारकंभ्रातृवत्सहसंस्थितं । नकेवलंपापमेवास्यविनश्य
ति । किंतुअस्यद्विषन् द्वेषीपाप्मा पापीभ्रातृव्यो बाह्यशत्रुरपि पराभवति तमसिपतितोभवतीत्यर्थः । पुनर्विद्यांतरमार ॥ १५ ॥
भ्यते ॥ **सएषोसुरिति** । सएषभगवानसुःसर्वस्यापिनिरसनात् । सएषप्राणःप्रकृष्टानंदरूपत्वात् । सएषभूतिर्ज्ञानैश्वर्यादि
रूपस्तद्दाताच । सएषोऽभूतिश्चअज्ञानाद्यभूतिदत्वात् । तमेतंविष्णुं । भूतिरिति भूतिस्वरूपोभूतिदाताचेति । देवावाय्वा

द्याउपासांचक्रिरे । उपासयाचतेदेवाबभूवुः । सुखसज्ज्ञानादिपूर्णगुणरूपभूतिमंतइतिशेषः । भूतिरितिदेवाउपासतइत्येत
त्प्रत्यक्षनिदर्शनेनोपपादयति ॥ **तस्मादिति** । देवानांभूतिरितिविष्णूपासकत्वादेव । एतर्ह्यपिइदानीमपि । सुप्तःसुप्तस्थः
सर्वदेवोत्तमोवायुर्भूर्भूरित्येवप्रश्वसिति । श्वासरूपेणविष्णुंशंसति तथान्येपिदेवाएवमेवविष्णुंभूतित्वेनोपासतइतिज्ञातव्यं ।
यद्यदाचरतिश्रेष्ठइतिन्यायादितिभावः । अत्रभूशब्दार्थोपिभूतिरित्येव । अतोनासंगतिःशंकनीया । असुराश्चाभूतिरिति ।
तमुपासांचक्रिरइत्यनुषज्यते । अस्माकमभूतिकारकःस्वयमैश्वर्यादिगुणोज्झितश्चेत्यर्थः । तेचासुराःपराबभूवुः । पराभूतिं

**सएषप्राणःसएषभूतिश्चाभूतिश्चतंभूतिरितिदेवाउपासांचक्रिरेतेबभूवुस्तस्माद्धाप्येतर्हिसुप्तोभूर्भू
रित्येवप्रश्वसित्यभूतिरित्यसुरास्तेहपराबभूवुर्भवत्यात्मनापरास्यद्विषन्पाप्माभ्रातृव्योभवतिय
एवंवेद सएषमृत्युश्चैवामृतंचतदुक्तमृषिणाऽपाङ्प्राङेतिस्वधयागृभीतइत्यपानेनह्ययंयतःप्राणोन**

प्राप्ताः । ज्ञानैश्वर्यादिहीनाअंधेतमस्यधःपेतुरित्यर्थः । एतद्विद्याफलमाह ॥ **भवतीति** । यः पुमान् । एवंविष्णुंभूतिरूपि
णंभूतिदंचवेद । तथाभूतित्वाभूतित्वोपासनाभ्यांदेवानांदैत्यानांचभावाभावलक्षणंफलंचवेद । सआत्मना परमात्मप्रसादे
नभवति । ज्ञानैश्वर्यादिमान्जायते । अस्यद्विषन्भ्रातृव्यवत्स्थितःपाप्माबाह्यआभ्यंतरश्चशत्रुरात्मनापरमात्मप्रसादेन ।
पराभवतितमसिपतितोभवतीत्यर्थः । पुनर्विद्यांतरमारभ्यते ॥ **सएषइति** । भगवान्मृत्युर्मृत्युदःसंसारदाता । अमृतंमो

क्षदः । मिथःसमुच्चयेचशब्दौ । एवशब्दःसएषएवेतिसंबध्यते । अथवामृत्युर्मृतिप्रदः । अमृतंजीवनप्रदश्चेत्यर्थः । अत्रेदं
बोध्यं । यदाऽयमपानेनसंयुतंप्राणमस्मिंच्छरीरेनियमयातितदाजीवनप्रदोभवति । यदातुप्राणापानौशरीराद्बहिर्निस्सार
यति । तदामृत्युप्रदइति । अत्रार्थेमंत्रसंमतिमाह ॥ तदुक्तमिति । तत्प्राणापानौनिमित्तीकृत्यभगवतोजीवजीवनकरत्वा
दिकमृषिणामंत्रद्रष्ट्रोक्तमित्यर्थः । अपाङ्प्राङेतिस्वधयागृभीतोअमर्त्योमर्त्येनासयोनिः । ताशश्वंताविषूचीनावियंतान्यन्यं
चिक्युर्ननिचिक्युरन्यमितिमंत्रे आद्यपादंतावदनूद्य वायुःस्वधयासुखेनसुखरूपिणाहरिणागृभीतोगृहीतःप्रेरितःसन् । अपा
ङ्अवाङ् । एतिगच्छति । अपानरूपेणाधोगच्छति । प्राङ्प्राकूऊर्ध्वंचैति । प्राणरूपेणोर्ध्वंगच्छतीति तदर्थमभिप्रेत्यस्वय

पराङ्भवत्यमर्त्योमर्त्यैनासयोनिरित्येतेनहीदंसर्वंसयोनिमर्त्यानिहीमानिशरीराणीँ३अमृतैषा

मेवव्याचष्टे ॥ अपाङिति । अपानेनसंयुतोऽयंप्राणोहरिणाहियस्मात्यतो नियतः प्रेरितस्तस्मात् । हरिप्रेरणादेवेतिया
वत् । पराङ्देहाद्बहिर्नभवति । तत्रैवस्थित्वादेहिनांकॢप्तकालपर्यंतंजीवनहेतुर्भवतीत्यर्थः । द्वितीयपादमनूद्य स्वधयाआ
नंदरूपहरिप्रसादेनअमर्त्योऽविलुप्तज्ञानोवायुर्मर्त्यैर्नाशशीलैःप्राणिनांदेहैःसयोनिःसाधिष्ठानः । तैःसहस्थितइतियावदितित
दर्थमभिप्रेत्यव्याचष्टे ॥ अमर्त्यइति । एतेनप्राणेनहीदंसर्वंशरीरजातं । सयोनियोनित्वेनोपेतं । प्राणस्याधिष्ठानरूपमिति ॥ १६ ॥
यावदित्यर्थः । अत्रमर्त्यामर्त्यशब्दौशरीरप्राणपरावित्यभिप्रेतंतद्व्यनक्ति ॥ मर्त्यानिहीति । एषादेवताप्राणाख्या । अथो

त्तरार्धमनूद्य । ता तौ । देहवायू । शश्वंता शश्वंतौ शाश्वतौ । तत्रस्थूलदेहाःजीवानांमोक्षपर्यंतंप्रवाहतःसंत्येवेतिशाश्वताः। सूक्ष्मदेहस्तुसाक्षादेवानादितःसंबद्धइतिशाश्वतः । वायुरपितत्तत्कल्पीयोऽनादिकालात्प्रवाहतोनियामकतयास्त्येवेतिशाश्व तइत्युच्यतइतिविवेकः । विषूचीना विषूचीनौ विष्वगंचमानौ नानागतीइतियावत् । तत्रवायोःपरमचेतनकेशवप्राप्तिः । शरीरस्यपंचत्वरूपजडताप्राप्तिरितिगत्योर्नानात्वंज्ञेयं । वियंता वियंतौविरुद्धगमनौ । वायोरूर्ध्वगमनात् । देहस्याधःक्षिप्तौ पतनात् । अत्रसर्वत्रसुपांसुलुगितिस्मरणादाकारादेशः । सखायेत्यादिवत् । तत्रान्यंदेहंनिचिक्युः । जनाःपश्यंति । अन्यं

देवता ताशश्वंताविषूचीनावियंतान्यन्यंचिक्युर्ननिचिक्युरन्यमितिनिचिन्वंतिहैवेमानिशरी राणीँ ३ अमृतैवैषादेवतामृतोहवाअमुष्मिल्लोकेसंभवत्यमृतःसर्वेभ्योभूतेभ्योदद्दशेयएवंवेदय एवंवेद ॥ ८ ॥ इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेप्रथमोध्यायः ॥ २ । १ ॥

वायुंच ननिचिक्युर्नपश्यंति । नह्युत्क्रांतिकालेकेपिवायुंपश्यंति । अतइमौदृश्यत्वादृश्यत्वाभ्यामपिविरुद्धधर्मवंतावितितदर्थम भिप्रेत्यव्याचष्टे ॥ निचिन्वंतीति । इमानिशरीराण्येवजनाःनिचिन्वंति पश्यंति नतुवायुं । एषावायुदेवतैवामृता नतुश रीराणि । तानितुपंचत्वादिमंत्येवेत्यर्थः । एवंविदःफलमाह ॥ अमृतइति । यएवंवायुममृतत्वादिगुणयुक्तंवेद । सोऽमृतो मुक्तःसन्अमुष्मिन्वैकुंठादौविष्णुलोके संभवतिसम्यगास्ते । अमृतःसन्नेवसर्वेभ्योभूतेभ्यःसर्वैर्भूतैर्मुक्तैर्ददृशे दृश्यतइत्यर्थः ।

यएवंवेदेति द्विरुक्तिरवधारणार्था । यथोक्तंसूत्रभाष्ये । अवधारणार्थंसर्वस्याप्युक्तस्याध्यायमूलतः । द्विरुक्तिंकुर्वतेप्राज्ञाअध्यायांतेविनिर्णयइति । वक्ष्यतेच । सर्वप्रमाणसिद्धत्वंवक्तुमाध्यायमूलतः । अध्यायांतेद्विरुक्तिःस्यात्पूर्वोक्तस्यावधारण इति ॥ ८ ॥ ॥ इतिश्रीमदानंदतीर्थभगवत्पादविरचितश्रीमन्महैतरेयोपनिषद्भाष्यभावप्रदीपेद्वितीयारण्यकेप्रथमोध्यायः ॥ २ ॥ १ ॥ ॥ अंतर्यामिणमीशंसर्वेषांसर्वशब्दसंवाच्यं । बृहतीदशशतगीतंवंदेविष्णुंरमामरुन्नाथं ॥ १ ॥ एषपरमेश्वरःश्रियावायुनाचसहेमंलोकंब्रह्मादिप्राणिशरीरजातं । पुरुषरूपेणांतर्यामिरूपेण । अभ्यार्चत्प्र

हरिः ॐ । एषइमंलोकमभ्यार्चत्पुरुषरूपेणयएषतपतिप्राणोवावतदभ्यार्चत्प्राणोह्येषयएषतपति तंशतंवर्षाण्यभ्यार्चत्तस्माच्छतंवर्षाणिपुरुषायुषोभवंतितंयच्छतंवर्षाण्यभ्यार्चत्तस्माच्छतर्चिन

विवेश । कोयंपरमेश्वरः । यएषसूर्यमंडलस्थितसूर्येस्थित्वातपति । जगत्रयंसंतापयति । प्रकाशतेचसएवेत्यर्थः । सोपिकः । येनशरीरप्रविष्टोऽमुकएवेतिनिश्चिनुमइत्यतआह ॥ प्राणोवावेति । यएषतपतिसप्राणोहि । उत्तमप्राणोभगवान्नारायणएवप्रसिद्धः । अतःप्राणोनारायणएव । तत्ब्रह्मादिशरीरजातमभ्यार्चत्प्रविवेशेत्येषोर्थःसिध्यति । वावेतिनिपातद्वयंप्रसिद्धिद्योतकं । अत्रप्राणपदेनमध्यमप्राणोवायुःश्रीश्चामुख्यतयाविवक्षिते । एवमुत्तरत्रापि । एवंविष्णोरेवसर्वदेहांतर्यामित्वमुक्त्वाअपूर्णस्यदेवदत्तादिवत्तदनुपपत्तेस्तस्यगुणपूर्णत्वंवक्तुंतत्सिद्ध्यर्थंसर्वशब्दवाच्यतामभिधास्यन्कियत्कालमिमंलोकम ॥ १७ ॥

भ्यार्चदितिशंकापरिहाररूपतयाप्रकृतसंगतत्वाच्छतर्चिशब्दवाच्यतांतावदादौदर्शयति । तंशतमिति । एषइतिवर्तते । भगवांस्तंलोकं ब्रह्मादिशरीरजातं । शतंवर्षाण्यभ्यार्चत् । पुरुषेषुशतवर्षंगतइतियावत् । तस्मादेवकारणात् । पुरुषायुषःपरिमाणंशतंवर्षाणिभवंति । तंलोकंयद्यस्माच्छतंवर्षाण्येषोभ्यार्चत्तस्मादेतंविष्णुमेव संतं शतर्चिनामार्थंसंतं शतर्चिनइत्याचक्षते विद्वांसः । शतमर्चतीतियोगेन । बहुरूपत्वाद्बहुवचनं । मधुछंदःप्रभृतींस्तुरूढार्थानप्यमुख्यतएवतच्छब्दवाच्यानाचक्षतइत्यर्थः । यद्यपिलोकेयोगरूढ्योर्मध्येरूढेरेवमुख्यत्वंझटित्युपस्थापकत्वात् । तथापिप्रकृतेकेवलरूढ्यपेक्षयाभगवतिमहायोगस्यैव

स्तस्माच्छतर्चिनइत्याचक्षतएतमेवसंतं सइदंसर्वंमध्यतोदधेयदिदंकिंचसयदिदंसर्वंमध्यतोदधे यदिदंकिंचतस्मान्माध्यमास्तस्मान्माध्यमाइत्याचक्षतएतमेवसंतं प्राणोवैगृत्सोपानोमदःसय

मुख्यत्वं । विद्वद्रूढिसहितस्यतुसुतरां । यथोक्तमनुव्याख्याने । एतमेवतथासंतंशतर्चीत्यादिकाश्रुतिः । आचक्षतइतिह्यत्रसंतमित्यवधारणात् । योगस्यरूढेःप्राबल्यंविद्वद्रूढिंचतत्रगां । बहुशोदर्शयंत्यंजस्तात्पर्यात्सनिरुक्तिकमिति । अतोभगवतिमहायोगविद्वद्रूढ्योरुभयोरपिसत्त्वात्तस्यैवमुख्यतस्तच्छब्दवाच्यत्वमितिभावः । अत्रतात्पर्यद्योतनायतस्माच्छतर्चिनस्तस्माच्छतर्चिनइतिद्विरुक्तिः ॥ सभगवान्इदंसर्वंजगत् । मध्यतोदधे । आत्मनउदरेधृतवान् । सर्वस्यमध्येअंतःस्थित्वाधृतवांश्च । यथादेवदत्तादिःकवचं । सर्वशब्दोनसंकुचितवृत्तिरित्याशयेनोक्तं ॥ यदिदंकिंचेति । तथाचस्वमध्येधारकत्वान्मध्येस्थित्वाधा

रक्तत्वाच्चमध्यमःसएवमाध्यमः । पूर्ववद्बहुरूपत्वाद्बहुवचनमित्युक्तंभवति । प्राणःप्राणस्थःप्राणनामाभगवान् । गृत्सोगृत्सनामा । अपानोपानस्थितःअपाननामाहरिर्मदोमदनामा । तस्मात्गृत्सश्चासौमदश्चेतिगृत्समदइतिव्युत्पत्त्यागृत्समदइत्याचक्षते । तस्यभगवतइदंविश्वंसर्वंमित्रंप्रियमासीत् । अनिष्टहेतुरप्रियमित्युच्यते । नहिभगवतःकिमप्यनिष्टहेतुरस्ति । तस्मा

त्प्राणोगृत्सोपानोमदस्तस्माद्गृत्समदस्तस्माद्गृत्समदइत्याचक्षतएतमेवसंतं तस्येदंविश्वंमित्रमासीद्यदिदंकिंचतद्यदस्येदंविश्वंमित्रमासीद्यदिदंकिंचतस्माद्विश्वामित्रस्तस्माद्विश्वामित्रइत्याचक्षतएतमेवसंतंतंदेवाअब्रुवन्नयंवैनःसर्वेषांवामइतितंयदेवाअब्रुवन्नयंवैनःसर्वेषांवामइतितस्माद्वामदेवस्तस्माद्वामदेवइत्याचक्षतएतमेवसंतं सइदंसर्वंपाप्मनोत्रायतयदिदंकिंचसयदिदंसर्वंपाप्मनोत्रायतयदिदंकिंचतस्मादत्रयस्तस्मादत्रयइत्याचक्षतएतमेवसंतं ॥ १ ॥

द्विश्वामित्रः । तंभगवंतंदेवाःब्रह्माद्याःअब्रुवन् । अयंभगवान्नःसर्वेषांवामोभद्रःकल्याणकारकइति । तस्माद्देवानांवामत्वाद्वामदेवइत्याचक्षते । सभगवान् । इदंसर्वंभक्तजातं । पाप्मनोत्रायत तस्मात्पापत्राणहेतुत्वादत्रयइत्याचक्षते । त्रैङ्पालने । अस्मात्किः । सुबंतादप्यडागमःछांदसः । अधिकंत्राणादत्रयइतिवा ॥ १ ॥ उउतकिंच । एषहरिरेवबिभ्रद्वाजइतितावदुच्यते । कुतःप्रजावैवाजइत्युच्यंते । ताःप्रजाःएषभगवान्बिभर्ति । तस्माद्वाजानांप्रजानांबिभ्रत्बिभ्रद्वाजइतियोगे

न । यद्यस्मादेषबिभर्ति वाजानितिशेषः । यतोबिभ्रद्वाजइतियावत् । तस्माद्भरद्वाजःवाजानांभरन्नितिव्युत्पत्त्या । वसिष्ठोवसतामुत्तमः । स्वातंत्र्येणसदासर्वत्रवासकर्ता । उपलक्षणमेतत् । सर्वर्षिनामान्यप्येवमेवमुख्यतोभगवदेकवाचकानीतिज्ञेयं । एवमृषिनामसमन्वयमभिधायशब्दनामसमन्वयमुपक्रमते । सइदंसर्वमभिप्रागादित्यादिना । सर्ववेदादिकं । अभितःप्रागात्प्रकर्षेणागायत । गाशब्दे । उच्चारितवान् । व्याख्यातवांश्च । तस्मात्प्रगाथाः । प्रपूर्वाद्गातेःकर्तरिथन् । प्रगाथा

एषउएवबिभ्रद्वाजःप्रजावैवाजस्ताएषबिभर्तियद्बिभर्तितस्माद्भरद्वाजस्तस्माद्भरद्वाजइत्याचक्ष
तएतमेवसंतं तंदेवाअब्रुवन्नयंवैनःसर्वेषांवसिष्ठइतितंयद्देवाअब्रुवन्नयंवैनःसर्वेषांवसिष्ठइतितस्मा
द्वसिष्ठस्तस्माद्वसिष्ठइत्याचक्षतएतमेवसंतं सइदंसर्वमभिप्रागाद्यदिदंकिंचसयदिदंसर्वमभिप्रा
गाद्यदिदंकिंचतस्मात्प्रगाथास्तस्मात्प्रगाथाइत्याचक्षतएतमेवसंतं सइदंसर्वमभ्यपवयतयदिदं

इतिऋग्विशेषयोःसंज्ञा । तदुक्तमनुक्रमणिकायां । अथप्रगाथाःबृहतीसतोबृहत्यौबार्हतइत्यादि । द्वादशाक्षरस्तृतीयःपादइतरेत्रयोष्टाक्षराश्चेत्साबृहती । आद्यतृतीयौद्वादशाक्षरौइतरावष्टाक्षरौचेत्सासतोबृहतीतितयोर्लक्षणमपितत्रैवव्यक्तं । तन्नाम्नःसमन्वयोयं । पावमान्यइतिकाश्चनऋचः । तन्नामनिर्वचनंदर्शयति ॥ सइदंसर्वमभ्यपवयतेति । संसारात्पावयामासेत्यर्थः । तस्मात्पावनकर्तृत्वात्पावमान्यः । स्त्रीरूपत्वात्स्त्रीलिंगं । बहुरूपत्वाद्बहुवचनंच । सभगवान् । इदंसर्वसर्ववेदप्र

सिद्धं । यत्परिपूर्णवस्तुतद्रूपोहं । यच्चक्षुद्रंयच्चमहत् । तदसानिभवानि । क्षुद्रप्राणिषुप्रविश्यसूक्ष्मरूपो महाप्राणिषुप्रविश्यमहारूपश्चभवानीतियावत् । इत्यब्रवीत् । तस्मात्क्षुद्रोसानीतिभगवतासुष्टूक्तत्वात्तेक्षुद्रप्राणिषुस्थिताभगवद्रूपसंघाःक्षुद्रसूक्तास्तन्नामानोऽभवन् । महानसानीतिसुष्टूक्तत्वान्महासूक्ताश्चतेऽभवन् । तस्मादित्यादिपूर्ववत् । तद्विष्णवाख्यंब्रह्मसूक्तं सूक्तोपलक्षितंसर्ववेदजातं । अवोचतब्रह्मादिभ्यउपदिष्टवान् । बतेत्यास्वादने । इतिहेतोस्तद्ब्रह्मसूक्तं तन्नामकमभ

किंचसयदिदंसर्वमभ्यपवयतयदिदंकिंचतस्मात्पावमान्यस्तस्मात्पावमान्यइत्याचक्षतएतमेवसं
तं सोब्रवीदहमिदंसर्वमसानियच्चक्षुद्रंयच्चमहदितितेक्षुद्रसूक्ताश्चाभवन्महासूक्ताश्चतस्मात्क्षुद्र
सूक्तास्तस्मात्क्षुद्रसूक्ताइत्याचक्षतएतमेवसंतं सूक्तंबतावोचतेतितत्सूक्तमभवत्तस्मात्सूक्तंत
स्मात्सूक्तमित्याचक्षतएतमेवसंत मेषवाऋगेषह्येभ्यःसर्वेभ्योभूतेभ्योर्चतसयदेभ्यःसर्वेभ्योभूते

वत् । सूक्तवक्तृत्वात् । यद्वातद्ब्रह्मस्वात्मनैवस्वयंसुष्टूक्तमतःसूक्ताख्यमभवदिति । अस्मिन्पक्षेअवोचतेत्यस्यननिर्वचनप्रवेशः । किंतुवेदादिकमेवमवोचतेतिप्रमाणसंमतिकथनं । एषभगवान् । ऋक् ऋक्शब्दवाच्यः । कुतःएषहिसर्वेभ्योभूतेभ्यः प्राणिभ्यः । अर्चत गतवान् । मृतिकालेम्रियमाणंप्राणिजातंपरित्यज्य । भागेनस्थलांतरंगतोभवतीतियावत् । सर्वेभ्योर्धेभ्यः प्राणिशरीररूपस्थानेभ्योर्चतगतवानित्यर्धर्चः । सर्वाणिभूतानि । पादि अपादिअपद्यत प्रापेत्यर्थः । तस्मात्सर्वभूतप्राप्तिम

त्त्वात्पदंनाम । एषभगवानक्षरमित्युच्यते । कुतःएषहिएभ्यःसर्वेभ्योभूतेभ्यःक्षरति । सर्वाभीष्टंसंततंददाति । अतःक्षरं । एनमति अतीत्यकश्चन नक्षरति । अयमेवाधिकंक्षरतीतियावत् । तथाचाधिकंक्षरमित्यक्षरमित्यर्थः । नकेवलमृष्यादीनां नामभगवतःकिंतुतावाएताःसर्वाऋचोपितस्यैवनाम । नकेवलंसर्वाऋचःकिंतुसर्वेवेदाश्चतन्नामैव । अपिचसमुद्रमेघवृक्षपतन

भ्योर्चततस्माहक्तस्माहगित्याचक्षतएतमेवसंत मेषवाअर्धर्चएषह्येभ्यःसर्वेभ्योर्धेभ्योर्चतसयदे
भ्यःसर्वेभ्योर्धेभ्योर्चततस्मादर्धर्चस्तस्मादर्धर्चइत्याचक्षतएतमेवसंत मेषवैपदमेषहीमानिसर्वा
णिभूतानिपादिसयदिमानिसर्वाणिभूतानिपादितस्मात्पदंतस्मात्पदमित्याचक्षतएतमेवसंत
मेषवाअक्षरमेषह्येभ्यःसर्वेभ्योभूतेभ्यःक्षरतिनचैनमतिक्षरं(र)तिसयदेभ्यःसर्वेभ्योभूतेभ्यःक्षर
तिनचैनमतिक्षरं(र)तितस्मादक्षरंतस्मादक्षरमित्याचक्षतएतमेवसंतं तावाएताःसर्वाऋचःसर्वे
वेदाःसर्वेघोषाएकैवव्याहृतिःप्राणाएवप्राणऋचइत्येवविद्यात् ॥ २ ॥

भेरीताडनघंटास्वर्णचंचुश्वासगर्गरगोधापिंगादिघोषाअपिस्वव्यंग्यवर्णद्वारातस्यैवनामानिकिमुचसर्वेवेदाः । एतत्सर्वमपि एकैवव्याहृतिरेकमेवव्याहरणं । निर्दोषगुणपूर्तिवाचित्वादेकप्रकारमेवनाम । एतच्चप्राणेनारायणेविषयएव । नान्यत्र । तत्राप्यृचस्तुविशेषतोभगवद्गुणप्रकाशकत्वात्प्राणेनारायणएव तत्पराएवेतिविद्यादित्यर्थः ॥ २ ॥ अन्यदेवताविषयत्वेनप्र

तीयमानाअप्यृचोमुख्यतोभगवद्विषयाएव । अमुख्यतोवायुविषयाश्च । तस्मात्तच्छंसनेनभगवान्वायुश्चातिप्रीयेतेइतिदर्श
यति । विश्वामित्रमित्यादिना । अह्नियज्ञेशंसनीयत्वादहरितिमंत्रविशेषसंज्ञा । अहःसंज्ञकमेतत्बृहतीसहस्रं । महाव्रता
ख्येयज्ञे । शंसिष्यंतं शंसितुमुद्युक्तं । हौत्रेनियुक्तंविश्वामित्रंयजमानःपुरंदरोदृष्ट्वाविष्णुवायुभ्यामाविष्टःशंसेत्युक्त्वा तस्यो
पसमीपेनिषसादनिषण्णोभूत् । सविश्वामित्रस्तवेदमतिप्रीतिहेतुत्वादन्नमिवेत्यभिव्याहृत्यबृहतीसहस्रंशशंस । तेनशंसनेन ।
इंद्रस्यइंद्राविष्टस्यवायुसंयुतस्यहरेः प्रियंधामोपेयाय । धाम्नःसमीपंप्राप । अत्रप्रियधामसमीपप्राप्तिर्नामभगवत्सालोक्यल

विश्वामित्रंह्येतदहःशंसिष्यंतमिंद्रउपनिषसाद सहान्नमित्यभिव्याहृत्यबृहतीसहस्रंशशंसतेनें
द्रस्यप्रियंधामोपेयाय तमिंद्रउवाचऋषेप्रियंवैमेधामोपागाःसवाऋषेद्वितीयंशंसेति सहान्नमित्ये
वाभिव्याहृत्यबृहतीसहस्रंशशंसतेनेंद्रस्यप्रियंधामोपेयाय तमिंद्रउवाचऋषेप्रियंवैमेधामोपागाः

क्षणफलप्राप्तिसाधनभगवत्प्रसादप्राप्तिरेव । तदैवविश्वामित्रेणभगवद्धाम्नोऽप्राप्तत्वात् । अतएवसामीप्यवाच्युपशब्दः । सा
धननिष्पत्तौफलविलंबाभावात् । तंविश्वामित्रं । इंद्रःइंद्राविष्टोविष्णुरुवाच । हेऋषे । इदानीमेकवारशंसनेनमेप्रियंधामो
पागाःसालोक्यसाधनप्रसादंप्राप्तवानसि । सएवंसिद्धसालोक्यस्त्वंद्वितीयं द्वितीयवारंशंसेति । सहान्नमित्यादिपूर्ववत् । ते
नद्वितीयवारशंसनेनेंद्रस्यप्रियंधामोपेयाय । भगवत्पुरप्राप्तिसाधनतत्प्रसादंप्राप । तमिंद्रउवाचेत्यादिपूर्ववत् । तृतीयं तृती

यवारं । तेनतृतीयवारशंसनेनेंद्रस्यप्रियंधामोपेयाय । भगवदंतःपुरप्राप्तिसाधनतत्प्रसादंप्राप । तमिंद्रोभगवानतितुष्टोभूत्वोवाच । ऋषइत्यादि । मेप्रियंधामोपागाः अंतःपुरप्राप्तिसाधनप्रसादंप्राप्तवानसि । पुनश्चतुर्थमेकंवरंतेतुभ्यंददामि । त्वदपेक्षितंवरंवृणीष्वेति । सविश्वामित्रउवाच । त्वामेवाहंजानीयामिति । अत्रायमभिप्रायोविश्वामित्रस्य । तेजोबाहुल्यादिंद्रेऽन्योपिवर्तते । कोसौ । प्रायेणानेनविष्णुनैवभवितव्यं । अन्यस्यैतादृशतेजोऽयोगात् । यदिचायंविष्णुःस्यात्तर्हिविशेषतोमयाज्ञातव्योयमिति । तथाचत्वांत्वदाविष्टंतावदहंप्रथमतोजानीयां । सविष्णुश्चेत्त्वांत्वदाविष्टंविष्णुमेवविशेषतोजानी

सवाऋषेतृतीयंशंसेतिसहान्नमित्येवाभिव्याहृत्यबृहतीसहस्रंशशंसतेनेंद्रस्यप्रियंधामोपेयाय तमिंद्रउवाचऋषेप्रियंवैमेधामोपागावरंतेददामीति सहोवाचत्वामेवजानीयामिति तमिंद्र

यामित्यर्थः । तमेवमभिप्रायद्वयेनपृष्टवंतंविश्वामित्रंप्रतींद्रइंद्राविष्टोभगवानुवाच । तत्रद्वितीयप्रश्नस्यश्रेष्ठत्वान्महामल्लभंगन्यायेनतस्यप्रथममुत्तरमभिधत्ते ॥ प्राणोवाइति । हेऋषेइंद्राविष्टोहंप्रकृष्टानंदरूपत्वात्प्राणः । प्राणशब्दवाच्योवै । तावत् । तथाऽहेयत्वादहंनामा । असनाद्दोषादिनिरसनात्मनुतेर्ज्ञानाच्चास्मिनामा । सप्राणःप्राणनामाहमेव। त्वं ततत्वाद्वेत्तृत्वाच्चत्वंनामा । सप्राणनामाहंसर्वाणि । पूर्णत्वात्सर्वनामकः । तादृशबहुरूपत्वाद्बहुवचनं । एवंभूतानीत्यप्युक्तोहं । सर्वरूपेषुप्रभूतत्वात् । पूर्णत्वात्सोहंप्राणएषःएषनामा । सर्वैश्वर्यस्वरूपत्वात् । इषऐश्वर्ये । यएषसूर्येस्थित्वालोकंतपतिसंतापयति ।

प्रकाशयतिच । अतएवतपनइत्युच्यते । सोपितपननामाहमेवेतिशेषः । नामसमन्वयप्रकरणात् । नाम्नोसंकीर्तनंतुनिर्वचन
प्रदर्शनेनैवगुणलाभात् । नामसंकीर्तनस्यापि गुणज्ञापनार्थत्वात् । सएवाहमेतेनसूर्यस्थितेनरूपेणसर्वाःदिशोविष्टःप्रविष्टो
स्मि । व्याप्तइतियावत् । तस्यैवंसर्वनामवतोमेमम । अन्नंअन्नाभिमानिनीरमामित्रंभोग्यत्वात्भार्येतियावत् । साकीदृशी ।
दक्षिणं दक्षभागस्थितत्वाद्दक्षिणाख्या । अन्नशब्दानुसारेणदक्षिणमितिनपुंसकता । किंतदन्नं । तत्रमाभिमन्यमानमन्नं
नप्रसिद्धं । किंतुवैश्वामित्रंविश्वामित्रेणदृष्टंबृहतीसहस्रमेव । एवंद्वितीयप्रश्नस्यविशेषज्ञानसिद्ध्यर्थंसर्वनामवाच्यत्वादिविधाने

उवाचप्राणोवाअहमस्म्यृषेप्राणस्त्वंप्राणःसर्वाणिभूतानिप्राणोह्येषयएषतपतिसएतेनरूपेणस
र्वादिशोविष्टोस्मितस्यमेन्नंमित्रंदक्षिणंतद्वैश्वामित्र मेषतपन्नेवास्मीतिहोवाच ॥ ३ ॥
तद्वाइदंबृहतीसहस्रंसंपन्नं तस्ययानिव्यंजनानितच्छरीरं योघोषःसआत्मा यऊष्माणःसप्राण

नपरिहारमुक्त्वाप्रथमप्रश्नस्योत्तरमाह ॥ एषइति । यएषसूर्येस्थित्वातपति । एषतपन्विष्णुरेवाहमस्मीत्युवाच । हश
ब्देनसूर्यमंडलस्थोविष्णुरितिज्ञानंगायत्र्युपासकत्वाद्विश्वामित्रस्यास्त्येवेत्येषोर्थःप्रमाणप्रमितइतिदर्शयति ॥ ३ ॥ यावती
भिर्ऋग्भिःशंसिताभिःषट्त्रिंशत्सहस्राण्यक्षराणिभवंतियस्मात्कस्मादपिछंदसस्तावत्यःशंसनीयास्तदातद्वाइदंबृहतीसहस्रंसंपन्नं ॥ २१ ॥
भवत्येव । नबृहतीछंदस्कऋक्सहस्रेणैवभाव्यमितिनियमः । तत्रबृहतीसहस्रे । यानिव्यंजनानिकादिमावसानानिस्पर्शाक्ष

राणि । तच्छरीरंतानिशरीराभिमानिस्वायंभुवमनुदेवताकानि । योघोषःयानियरलवरूपाणिघोषापरपर्यायाण्यंतस्थाक्षरा
णि । सआत्मा तानिजीवाभिमानिचतुर्मुखदेवताकानि । येउष्माणःशषसहाःसप्राणस्तेवायुदेवताकाः । स्वराक्षराणितुतत्त
दवयवभूतानितत्रैवांतर्भूतानीतिनपृथगुक्तानि । उपलक्षणमेतत् । बृहतीसहस्रवर्णानांतदभिमानिनांचनियामकस्तत्प्रतिपा
द्यश्चभगवानित्यपिग्राह्यं । अतएवफलवाक्येएतत्एतदितिपदद्वयं । एतत्मन्वादीनांबृहतीसहस्रवर्णाभिमानित्वं । पुनरेतत्
भगवतस्तत्प्रतिपाद्यत्वंतदुभयनियामकत्वंच । विद्वान्जानन् । एतादृशंविष्णुमुपास्यैवेतियावत् । वसिष्ठोवसिष्ठपदयोग्यो

एतद्धस्मवैतद्विद्वान्वसिष्ठोवसिष्ठोबभूवततएतन्नामधेयंलेभ एतदुहैवेंद्रोविश्वामित्रायप्रोवाचैत
दुहैवेंद्रोभरद्वाजायप्रोवाचतस्मात्सतेनबंधुनायज्ञेषुहूयते तद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाए

जीवोवसिष्ठोबभूव । ततश्चसर्वेषुवेदपुराणादिषु । एतन्नामधेयंवसिष्ठइतिनामलेभे । प्रसिद्धोभूदितियावत् । हस्मवेतिनिपा
तत्रयमतिप्रसिद्धिद्योतकं । एतदुहैव एतद्विद्यामेव । इंद्रोविश्वामित्रायप्रोवाच । एतदुहैवेंद्रोभरद्वाजायापिप्रोवाच । तस्मा
त् एतद्विद्याबलादेव । सइंद्रस्तेनबंधुनाविष्णुना । एतद्विद्याप्रतिपाद्यविष्णुप्रसादेन । यज्ञेषुयज्ञभागस्वीकारार्थं । होत्रादि
भिर्हूयते आहूयतइत्यर्थः । बृहतीसहस्रनिष्ठंविद्यांतरंवक्तुंपुनस्तन्निर्दिशति ॥ तद्वाइदंबृहतीसहस्रंसंपन्नमिति । तस्यवा
एतस्यबृहतीसहस्रस्यसंपन्नस्य संभूयाक्षरपरिगणनेनस्वरव्यंजनभेदेनप्रत्येकंषट्त्रिंशतमक्षराणांसहस्राणिभवंति । षट्त्रिंशतशब्दः

ऐतरे० षट्त्रिंशच्छब्दपर्यायः । द्वासप्ततिसहस्राणिभवंतीतियावत् । एवमेतदक्षरदेवतानांभगवद्रूपाणामपिस्वरव्यंजनभेदेनप्रत्येकंष खंडार्थ.
॥ २२ ॥ ट्त्रिंशत्सहस्राणिद्वासप्ततिसहस्राणिभवंति । शतसंवत्सरस्याह्नांदिनानांसहस्राण्यपितावंतिषट्त्रिंशदेवभवंति । तद्गतविष्णुरूपा २१४
णामपितावंत्येवसहस्राणिभवंति । अत्राप्यहोरात्रभेदेनदिनानांतद्गतरूपाणांचप्रत्येकंषट्त्रिंशत्सहस्रत्वमेवज्ञेयं । तत्रायंविवेकः।
बृहतीसहस्रेयानिव्यंजनगतानिरूपाणितान्येवशतसंवत्सररात्रीणांदेवताः । यानिचस्वरगतानितान्येवशतसंवत्सरीयाह्नामि
ति । ततश्चव्यंजनैरेवरात्रीराप्नुवंति । बृहतीसहस्रगतव्यंजनाक्षरदैवतैरेवषट्त्रिंशत्सहस्रैरुपासितैः तेषामुपासनयेतियावत् ।

तस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंतितावंतिशतसंवत्सरस्याह्नांस

तावत्संख्याकरात्रिदेवताआप्नुवंति । तद्ध्यानफलंलभंते । उपासकाःपुरुषाः । व्यंजनगतरूपाणामेवरात्रिदेवतात्वाद्व्यंजनगत
रूपोपासनेशतवर्षसंबंधिरात्रिषुक्रमेणभगवदुपासनेकृतेयावत्फलंतावत्फलंप्राप्नुवंतीतियावत् । एवंस्वरैरहानीत्येतदपिव्याख्ये
यं । विद्यांतरकथनायपुनर्निर्दिशति ॥ तद्वाइति । तदेवविद्यांतरंनिरूपयति ॥ तस्येति । एतस्यबृहतीसहस्रस्यसंपन्नस्यप
रस्तात् एवंज्ञानपूर्वकंबृहतीसहस्रसंपादनानंतरमेव । तच्छंसनानंतरमेव । नपुनःकर्मांतरेणशरीरारंभेतत्पातानंतरमितिया ॥ २२ ॥
वत् । प्रज्ञामयः । प्रज्ञाप्रकृष्टज्ञानं तद्रूपोविष्णुःप्रज्ञाः स्वस्मात्परेभ्यश्चमयःप्रधानोयस्य । तथायोवेत्तीतियावत् । सप्रज्ञा

मयः। सर्वोत्तमस्वरूपत्वाद्देवतारूपोविष्णुर्देवतयादेवत्वेनक्रीडादिगुणवत्त्वेनमयोयस्येतिदेवतामयः। पूर्णगुणत्वाद्ब्रह्मविष्णुः ब्रह्मत्वेनपूर्णत्वेनमयोयस्येतिब्रह्ममयः। अमृतोनित्योविष्णुःसोमृतत्वेननित्यत्वेनमयोयस्येत्यमृतमयः। एवंप्रज्ञादिमयोऽधिकारी। संभूयसम्यग्भूत्वा। अत्रसमित्यनेनबृहतीसंपादनानंतरंभगवदाधिक्यंपुनर्विशेषेणज्ञायतइत्युक्तंभवति। एवमतिशयेनभगवदाधिक्यज्ञानवान्भूत्वा। देवताःस्वोत्तमाःमारुतांताः। अपिशब्दात्मारुतमुखेनविष्णुंच। एतिक्रमेणप्राप्नोति। एतद्विद्योपासनयोग्योदेवर्ष्यन्यतमोधिकारीत्यर्थः। मारुतविष्ण्वंतादेवताअप्येतिप्राप्नोतीतिवा। अत्रप्रज्ञादेवतामृतब्रह्मशब्दैः

ह्स्राणिभवंति व्यंजनैरेवरात्रीराप्नुवंतिस्वरैरहानि तद्वाइदंबृहतीसहस्रंसंपन्नंतस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यपरस्तात्प्रज्ञामयोदेवतामयोब्रह्ममयोमृतमयःसंभूयदेवताअप्येतियएवंवेद

सामान्यतोविष्णुवाचकैरनिरुद्धप्रद्युम्नसंकर्षणवासुदेवाख्याश्चतस्रोमूर्तयोविशेषतोप्युच्यंते। अतएवचतसृणामपिपरस्परसाम्येनसर्वजीवेभ्यआधिक्यंज्ञातव्यमितिपृथक्पृथङ्मयशब्दः। अन्यथाप्रज्ञादेवताब्रह्मामृतमयइतिनिर्देशापत्तेः। यएवंवेदेत्यस्ययोधिकारी। एवंप्रज्ञादिरूपोहरिर्मेमयइतिवेद। सप्रज्ञामयोदेवतामयइत्युच्यते। ततश्चप्रज्ञादिमयःसंभूयदेवताअप्येतीत्यावृत्त्यायोजना। एवंद्वासप्ततिसहस्रभगवद्रूपाणांस्वरव्यंजनभेदेनबृहतीसहस्रगतत्वोक्त्यापुरुषसंस्थितत्वमपिलब्धं। शंसनीयबृहतीसहस्रस्यपुरुषसंस्थत्वात्। पुरुषंविनातदनभिव्यक्तेः। तथैतेषामेवरूपाणामहोरात्रगतत्वोक्त्यासूर्यगतत्वमपिलभ्यते।

अहोरात्राणांसूर्यगतत्वात्सूर्यगत्यैवाहोरात्रभेदावक्लृप्तेः।तथाच। तत् तस्मात्। उक्तरीत्यापुरुषस्थितबृहतीसहस्रगतरूपाणा
मेवसूर्यस्थिताहोरात्रगतत्वात्। योहं नराहेयत्वादहंनामा। द्वासप्ततिसहस्ररूपवान्विष्णुःपुरुषस्थः। सएवासौसूर्यसंस्थः।
नचैवमभेदेपींद्रार्जुनादिवत्कश्चिद्विशेषःशंकनीयः। किंतुयोसौसूर्यगतोविष्णुःसोहंभास्करादिभिरहेयत्वादहंनामापुरुषसंस्थइ
त्यर्थः। अत्रमंत्रसंमतिमाह॥ **तदुक्तमिति**। तत्सर्वांतर्यामिभगवद्रूपाणामैक्यमृषिणामंत्रद्रष्ट्राउक्तं। कथं। सूर्यःसूर्यगतः
सूरिगम्यत्वात्सूर्यनामाभगवान्। जगतोजंगमस्य। तस्थुषःस्थावरस्यचात्माव्यापकोंतर्यामीचेत्युक्तमित्यन्वयः। यतएवंस

तद्योहंसोसौयोसौसोहं तदुक्तमृषिणा सूर्यआत्माजगतस्तस्थुषश्चेत्येतदुहैवोपेक्षेतोपेक्षेत ॥ ४ ॥

इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेद्वितीयोध्यायः ॥ २ ॥ २ ॥ ॥ ॥

हरिःॐ। योहवाआत्मानंपंचविधमुक्थंवेदयस्मादिदंसर्वमुत्तिष्ठतिससंप्रतिवित् पृथिवीवायु

वांतर्यामि। ततएतन्नारायणाख्यंपरंब्रह्म। उपजीवसमीपगंजीवांतर्यामितयैवावस्थितमीक्षेतजानीयात्। नतुतदैक्येन।
उपलक्षणमेतत्। सर्वोत्तमत्वेनसर्वगुणसंपूर्णत्वेनचजानीयादित्यपिद्रष्टव्यं ॥ ४ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविर
चितश्रीमन्महैतरेयोपनिषद्भाष्यभावप्रदीपेद्वितीयारण्यकेद्वितीयोध्यायः ॥ २ ॥ २ ॥ ॥ अनिरुद्धादिपंचात्माबृह
त्युक्थसमीडितः। अर्धनारीनराकारोभासतांमेहरिर्हृदि ॥ १ ॥ योधिकारीनित्याततगुणत्वादात्मानमात्मशब्दवाच्यं। पर

मात्मानं पंचविधं नारायणादिरूपेण पंचधावस्थितं। उक्थंचवेद सएवपुमान्संप्रतिवित् सम्यग्ज्ञानी। कथमुक्थत्वंतस्येत्य
तआह ॥ **यस्मादिति**। यस्मात्कारणाद्यस्मादात्मनःसर्वमिदंजगदुत्तिष्ठति उत्पन्नंभवति। तस्मात्तमुक्थंवेदेत्यन्वयः। अथ
वातृचाशीतित्रयं। तस्यपूर्वमपरंचेतियत्पंचविधंबृहतीसहस्राख्यमुक्थंतस्मिन्नारायणादिपंचात्मनावस्थितत्वात्पंचविधमुक्थं
भगवंतंयोवेद ससंप्रतिविदित्यर्थः। प्रकारांतरेणापिपांचविध्यंभगवतोनिरूपयति ॥ **पृथिवीत्यादिना**। पृथुत्वात्पृथिवी
नामापृथिवीस्थितःस्त्रीरूपोनारायणः। बलज्ञानस्वरूपत्वाद्वायुनामावायुस्थितःसंकर्षणः। आसमंतात्स्थित्वाकाशनादाकाश

राकाशआपोज्योतींषीत्येषवाआत्मोक्थंपंचविध मेतस्माद्धीदंसर्वमुत्तिष्ठत्येतमेवाप्ये त्ययनं

नामावासुदेवः। आपालनादापः। अप्शब्दवाच्योप्सुस्थितःस्त्रीरूपोबहुरूपश्चानिरुद्धः। प्रकाशमानत्वाज्ज्योतिर्नामाज्यो
तिष्षुस्थितोबहुरूपःप्रद्युम्नः। इत्येवमेषवै। एषएवात्माभगवान्पंचभूतस्थितत्वादुक्थत्वाच्चपंचविधमुक्थमित्युच्यते। नन्व
स्तुपंचभूतस्थितस्यपंचविधत्वं। उक्थत्वंतुकथमित्यतआह ॥ **एतस्मादिति**। एतस्मात्पंचविधस्थिताद्धरेरेवसर्वंजगत्ब्रह्मां
डादिकमुत्तिष्ठतिउत्पद्यतेहियस्मात्तस्मादुक्थमित्यर्थः। नकेवलमुक्थंजगल्लयाधिकरणंचासौज्ञेयइत्याह ॥ **एतमेवेति**। एतं
पंचभूतस्थितंभगवंतमेवसर्वमिदंजगदप्येतिप्रविशति मुक्तौप्रलयेचेत्यर्थः। अयनंहवाइत्यनुवर्तते। एषभगवानेवायनंसर्वाश्रयो

हवै । एवंवेत्तुःफलमाह ॥ अयनंहवाइति । यएवंवेदविष्णुमुपास्तेअपरोक्षतोजानातिच समुक्तःसन् । समानानांसमजा
तीनामयनमाश्रयोभवतिभविष्यति । अत्रायंविवेकोबोध्यः । एतदुपासनेयोग्यायेब्रह्मेंद्राद्यादेवास्तेसजातीयस्वाधमनियामक
तामश्नुवते । उपासनानधिकारिणोमानुषादयस्तुज्ञानमात्रेणस्वयोग्यमाधिक्यमाप्नुवंतीति । फलंकथयन्नेवविद्यांतरंनिरूपयति॥
तस्मिन्निति । तस्मिन्भूतांतर्गतेनारायणादिरूपपंचकेयोधिकारीअन्नं सर्वलोकतर्पकत्वादन्नशब्दवाच्यंभोग्यवस्तुस्थितं । अ
न्नादं भोक्तृभूतंभोक्तृषुस्थितंभोगशक्तिप्रदंचभगवतोरूपंवेद । मिथःसमुच्चयेचशब्दौ । सोस्मिन्स्वजातियूथे।अन्नादोभोगभोक्ता

हवैसमानानांभवतियएवंवेद तस्मिन्योन्नंचान्नादंचवेदाहास्मिन्नन्नादोजायतेभवत्यस्यान्न माप
श्चपृथिवीचान्नमेतन्मयानिह्यन्नानिभवंति ज्योतिश्चवायुश्चान्नादमेताभ्यांहीदंसर्वमन्नमत्त्यावप

आ आधिक्येनजायते । हप्रसिद्धमेतत् । तथाअस्यस्वजातियूथस्यान्नमाप्यायकश्चायंभवति । नन्वेतस्मिन्रूपपंचकेकिमन्नंकिं
चान्नादमित्यतोविविच्यदर्शयति ॥ आपश्चेत्यादिना । आपः अप्सुस्थितोऽन्नामानिरुद्धः । पृथिवी पृथिवीस्थस्तन्नामानारा
यणश्चान्नं भोग्यवस्तुषुस्थित्वासर्वलोकतर्पकौ । कुतोप्पृथिवीस्थितयोःसर्वलोकतर्पकतयान्नत्वमित्यतस्तदुपपादयति ॥ एतन्म
यानीति । लोकेसर्वाण्यप्यन्नान्येतन्मयानिअप्पृथिवीमयान्येवभवंतिहि ।अतएतान्यन्नानिएतन्मयानि । अप्पृथिवीस्थितरूप
द्वयाधीनान्येवभवंति।ततश्चसर्वलोकतर्पकतयान्नत्वमनयोःसेत्स्यतीतिभावः।ज्योतिः ज्योतिःस्थितोज्योतिर्नामाप्रद्युम्नः।वायुः ॥ २४ ॥

वायुस्थोवायुनामा संकर्षणश्चान्नादं । भोक्तृषुस्थित्वाभोगशक्तिप्रदौस्वयंचभोक्तारौ । कुतोनयोरुक्तरूपमन्नादत्वमित्यतस्तदुपपा
दयति ॥ एताभ्यामिति । ज्योतिर्वायुगतप्रद्युम्नसंकर्षणाभ्यामेवेदंसर्वंप्राणिजातंअन्नमत्ति । शारीरवायुनोद्दीपितोजाठरो
जातवेदाहिभुक्तमन्नंपरिणामयतीतितावत्प्रसिद्धं । नचभगवत्प्रेरणामंतरेणज्योतिर्वायुभ्यांतत्कार्यंनिष्पद्यते । अतस्तद्गतभगव
द्रूपयोरेवतद्धेतुत्वाद्भोक्तृत्वाच्चोपपन्नमन्नादत्वमितिभावः । एवंपंचकेरूपचतुष्टयोपास्तिप्रकारमुक्त्वाऽवशिष्टवासुदेवोपास्तिप्र
कारमप्याह ॥ आवपनमाकाशइति । आकाशनामातत्स्थोवासुदेवआवपनमवकाशप्रदइत्यर्थः । तदुपपादयति ॥ आका

नमाकाशआकाशेहीदंसर्वंसमोप्यतआवपनंहवैसमानानांभवतियएवंवेद तस्मिन्योन्नंचान्ना
दंचवेदाहास्मिन्नन्नादोजायतेभवत्यस्यान्न मोषधिवनस्पतयोन्नंप्राणभृतोन्नादमोषधिवनस्पती

शेहीति । आकाशांतर्गतेहरावेव । सर्वमिदंजगत् । समोप्यते सम्यगवकाशवद्भवति । हियस्मात्तस्मादाकाशआवपनमु
च्यतइत्यर्थः । अनिरुद्धादिरूपचतुष्टयज्ञानफलस्य आहास्मिन्नन्नादोजायतइत्युक्तत्वाद्वासुदेवज्ञानफलमाह ॥ आवपन
मिति । यएवमाकाशनामकंवासुदेवमवकाशप्रदंवेद । समुक्तौ । समानानांसमजातीनामावपनमवकाशप्रदोभवतीति ।
अस्मिन्नेवपंचकेपुनःप्रकारांतरेणविद्यांतरंफलकथनपूर्वकंनिरूपयति ॥ तस्मिन्निति । तस्मिन्नेवरूपपंचकेवक्ष्यमाणप्रकारेण
योन्नमन्नादंचवेद । सोस्मिन्स्वजातियूथेअन्नादआजायतेह । अस्यस्वजातियूथस्याप्यायकत्वादन्नंचासौभवति । किंतदन्नं

किंचान्नादं यद्वेदनेनेदंफलंभविष्यतीत्यतआह ॥ **ओषधिवनस्पतयोन्नमिति** । ओषणान्निधानाच्चौषधिशब्दवाच्यौ वन
नीयपतित्वेनवनस्पतिनामकौबहुरूपौनारायणानिरुद्धौ । ओषधिवनस्पतिषुस्थावरेष्वन्नत्वेनांतर्गतौ । प्राणानांभरणात्प्राण
भृच्छब्दवाच्यौबहुरूपौसंकर्षणप्रद्युम्नौ । प्राणभृत्सुजंगमप्राणिषु । अन्नादत्वेनव्यवस्थितौ । कथमोषधिवनस्पतिस्थस्यान्नत्वं।
जंगमप्राणिगतंस्यान्नादत्वमित्यतआह ॥ **ओषधिवनस्पतीन्हीति** । तस्मादोषधिवनस्पतीनामन्नत्वं प्राणभृतामन्नाद
त्वंचतावदनुभवसिद्धं । अतस्तद्गतभगवद्रूपाणामपितत्प्रेरकत्वात्तृप्तिदत्वभोक्तृत्वाभ्यांचान्नत्वमन्नादत्वंचेतिभावः । अत्राप्या

न्हिप्राणभृतोदंति तेषांयउभयतोदंताःपुरुषस्यानुविधांविहितास्तेन्नादाअन्नमितरेपशवस्तस्मा
त्तइतरान्पशून्नधीवचरंत्यधीवह्यन्नेन्नादोभवत्य धीवहसमानानांजायतेयएवंवेद ॥ १ ॥

वपनमाकाशइतिवाक्यमनुषज्यते । आकाशःआकाशस्थितोवासुदेवःआवपनं अन्नान्नादयोरवकाशप्रदइत्यर्थः । तत्रैवपंचके
पुनर्विद्यांतरमारभते ॥ **तेषामिति** । तेषांप्राणभृतांजंगमप्राणिनांमध्ये । येउभयतोदंताः अलुक्समासोयं । ऊर्ध्वमधश्चदं
तोपेताः । पुरुषस्यपुरुषाकारस्यक्षीराब्धिशायिनोहरेर्विधांप्रकारमनुसृत्यविहितास्तदाकारेणस्थिताःदेवगंधर्वमर्त्याद्यास्तेन्ना
दाः । तेषुपुरुषाकारेणस्थितौसंकर्षणप्रद्युम्नौअन्नादौभोक्तारौभोगशक्तिप्रदौच । इतरेपुरुषभिन्नाःपशवोवृषभाश्वादयोन्नं ।
पशुषुस्थितौतदाकारौनारायणानिरुद्धावखिलतृप्तिदत्वादन्नशब्दवाच्यावित्यर्थः । पशूनांवाहनादिरूपत्वेननरादितर्पकत्वंप्र

सिद्धमेव । अतस्तदाकारेणपशुस्थितस्यभगवतोप्यखिलतर्पकत्वं । कुतःपुरुषानुविधानामन्नादत्वंपशूनामन्नत्वंचेत्यतस्तदुपपा
दयति ॥ **तस्मादिति** । यतएवंसंकर्षणप्रद्युम्नौवृषभाश्वाद्यारोढृनरादिगतौ । नारायणानिरुद्धौचारोह्येषुपशुषुस्थितौ । त
स्मादेवकारणात् । तेपुरुषाकाराःदेवाद्याः । तेषुस्थितौसंकर्षणप्रद्युम्नौ । इतरान्पशून् । तत्स्थितौनारायणानिरुद्धौ । अधि
तयोरुपरिचरंतिसंचरतः । यत्यदुपरिचरतितत्तस्यभोक्तृ । इतरच्चभोग्यमितिस्थितिः । अतएवह्यन्नेभोग्येविषये अन्नादोऽ
धिउपरिचरोधिपतिर्भवति । एवंचपुरुषाणांपश्वधिचरणादन्नादस्यचान्नाधिचरणात्पुरुषाअन्नादाःपशवश्चान्नमुच्यंतइतिभा
वः । नन्वेवंसंकर्षणप्रद्युम्नयोर्नारायणानिरुद्धोपरिचरणात्तद्भोक्तृत्वाच्चततोपिगुणवैशेष्यप्राप्त्याभगवद्रूपेषुतारतम्यप्रसंगइत्य

तस्ययआत्मानमाविस्तरांवेदा श्नुतेहाविर्भूयओषधिवनस्पतयोयच्चकिंचप्राणभृत्सआत्मानमा

तोधीवचरंतिअधीवभवतीत्युभयत्रापीवशब्दप्रयोगः । आरोढृषुस्थित्वाचरणमात्रात्तथोक्तिर्नतुगुणवैशेष्यमस्तीतिभावः । अ
त्राप्यावपनमाकाशइत्यनुषंजनीयं। आकाशोवासुदेवआरोढृणामारोह्याणांचावपनमवकाशप्रदइत्यर्थः । एतद्विद्याफलमाह ॥
अधीवेति । यएवंवेदसपुमान्मुक्तौसमानानांसमजातीनांमध्येअधि । अधिकोभवतीत्यर्थः । क्लृप्तस्यैवाधिक्यस्यमुक्तावभि
व्यक्तेरागंतुकाधिक्यालाभादिवशब्दः । ह्प्रसिद्धमेतत् ॥ १ ॥ योधिकारी । आत्मानंपरमात्मानं । आविस्तरां । आविर्भा
वतारतम्येन । तारतम्येनैवसर्वभूतेषुसंनिहितंवेद । सतस्यविष्णोरेव । तदीयएवभवति । तत्प्रीतिगोचरोभवतीतियावत् ।

ओषधिवनस्पतयोयच्चकिंचप्राणभृत्चेष्टावत्जंगमजातं । तत्सर्वंभूयः भूयस्त्वेनशिलादिभ्योविशेषेण । आविः तेषुस्थावरजं गमेष्वाविर्भूतःसन्निहितोश्नुतेप्राप्नोतिभगवान् । सएवनारायणआत्मानंस्वात्मानमाविस्तरांतारतम्येनसर्वभूतेष्वाविर्भूतंसम्य ग्वेदनान्यः । भगवत्सन्निधानतारतम्येनैवपदार्थानांतारतम्यमितिभावेनपदार्थतारतम्यमुपपादयति ॥ ओषधीत्यादिना। शिलाद्यपेक्षयाभगवद्विशेषसन्निधानपात्रत्वादेव । ओषधिवनस्पतिषुस्थावरेषुरसोदृश्यते । प्राणभृत्सुचलनवत्सुजंगमेषुचचि त्तंदृश्यते । नशिलाद्येषु । अतोवृक्षाद्याःशिलादिभ्यउत्तमाइतिभावः । तत्रापिप्राणभृत्सुजंगमेष्वेव । तुशब्दोविशेषार्थः ।

विस्तरांवेदौषधिवनस्पतिषुहिरसोदृश्यतेचित्तंप्राणभृत्सु प्राणभृत्सुत्वेवाविस्तरामात्मातेषुहि रसोपिदृश्यतेनचित्तमितरेषु पुरुषेत्वेवाविस्तरामात्मासहिप्रज्ञानेनसंपन्नतमोविज्ञातंवदतिवि

स्थावरापेक्षयागुणाधिक्यप्रकाशकतया आत्मा परमात्मा आविस्तरांउत्कर्षतारतम्येनाविर्भूतःसंनिहितः । किंतत्स्थावरापे क्षयाजंगमेषुगुणाधिक्यमित्यतआह ॥ तेषुहीति । तेषुजंगमेषु । स्थावरेष्वविद्यमानोरसोपिशब्देनतेष्वविद्यमानंचित्तंचदृ श्यतेहि । इतरेषुस्थावरेषुतुरसएकएवनचित्तं । अतोगुणद्वयसद्भावाज्जंगमानांस्थावरेभ्यउत्तमत्वमित्यर्थः । यद्यपिस्थावरा णामपिचित्तमस्त्येव । यथोक्तंसुधायां गीतात्पुष्पफलावाप्तिःस्पर्शात्काश्यंरसात्स्थितिः । अपिवृक्षस्यदृश्यंतइत्यनुव्याख्यान व्याख्यानावसरे । एवंकमनीयकांतावलोकनेनोत्कोरकत्वंतिलकवृक्षस्योपलभ्यते । तेनदर्शनकामौ । तेननयनमनसीसिध्य

॥ २६ ॥

तद्इति । तथापिजंगमप्राणिवच्चित्तकार्यप्रयत्नाद्यभावादभावव्यपदेशः । यथासन्नपिभृत्योयस्यनभृत्यपदेवर्ततेसह्यभृत्यइति व्यपदेशइति । अथतेषुजंगमेष्वपिपश्वाद्यपेक्षयापुरुषेत्वेवाविस्तरामात्मागुणाधिक्यप्रकाशकःसन्वर्तते । गुणाधिक्यमेवोपपादयति ॥ सहीति । पुरुषोहिप्रज्ञानेनप्रज्ञयासंपन्नतमःपश्वादिभ्योप्यतिशयेनयुक्तः । कथं । सपुरुषोविज्ञातमर्थंवदति । वाचाव्याहरति । विज्ञातंपश्यति । सामान्यतोविज्ञातमर्थंयुक्तिभिर्विचार्यविनिश्चिनोति । श्वस्तनंवेद । भविष्यदर्थंलिंगैरनुमिनोति । लोकालोकौ लोकालोकप्रदेशौ संसारमोक्षौवा स्वर्गनरकौवा ससाधनौवेदशास्त्रतोजानाति । पौरुषेयापौरुषेयाग

ज्ञातंपश्यतिवेद्श्वस्तनंवेदलोकालोकौमर्त्येनामृतमीप्सत्येवंसंपन्नो थेतरेषांपशूनामशनापिपासेएवाभिविज्ञानंनविज्ञातंवदंतिनविज्ञातंपश्यंतिनविदुःश्वस्तनंनलोकालोकौतएतावंतोभवंति यथाप्रज्ञंहिसंभवाः ॥ २ ॥

मौवाविजानाति । मर्त्येनशरीरेणामृतंमोक्ष मीप्सतिप्राप्तुमिच्छति । अल्पकालीनेनशरीरेणानंतकालीनमोक्षार्थसाधनमनुतिष्ठतीतियावत् । एवंसंपन्नःप्रज्ञासंपत्तिमानितिनिगमनं । अथपुरुषादितरेषांपशूनांतुनैवंविधगुणसंपत्तिः । किंत्वशनापिपासेएव । तद्विषयोपलक्षणमेतत् । अशनापिपासाविषयप्राप्तिप्रत्येवाभिविज्ञानंप्रज्ञा नान्यत्र । तदेवविशदयति ॥ **नविज्ञातंवदंतीत्यादिना** । पशवइतियोज्यं । निगमयति । तएतावंतोभवंतीति । तेपशवउक्तविधाएवभवंतीत्यर्थः । एवंहरिसंनिधानतारतम्यात्प्राणिनांतारतम्यमभिधाय सन्निधानतारतम्येपिकिमपिनिमित्तंवाच्यं । अन्यथाभगवतोवैषम्यनैर्घृण्यापत्तेरित्यतोनि

मित्तांतरंनिरूपयति ॥ यथाप्रज्ञमिति । प्रज्ञेत्युपलक्षणं । एषांप्राणिनांसंभवाःउत्पत्तयःयथाप्रज्ञंतत्तज्ज्ञानकर्माद्यनुसारेणभ वंतीति ॥ २ ॥ अत्रसएषपुरुषःसमुद्रइतिवाक्यमावर्तनीयं । योस्मिन्पुरुषेपश्वादिभ्यआधिक्येनसंनिहितोभगवान् । सएषपुरुषः पुरुषनामासमुद्रःसमुद्रिक्तः संपूर्णः । अन्येभ्यःसर्वेभ्यः । सएषपश्वादिभ्यआधिक्येनभगवत्सन्निधानपात्रभूतःपुरुषोजीवोयद्य पिभगवत्प्रसादात्समुद्रःसमुद्रिक्तःसर्वलोकाधिपोभवति । तथासर्वलोकंसर्वान्लोकान्पृथिव्यंतरिक्षादीन् । अति अतीत्य । य त्किंचयत्किंचिदलौकिकंहप्रसिद्धंमोक्षाख्यंमहाभाग्यंवैकुंठादिमोक्षस्थानंवा । अश्नुतेप्राप्नोति । तथाप्येनंपुरुषशब्दवाच्यं । प्रागा

सएषपुरुषःसमुद्रःसर्वंलोकमतियद्धकिंचाश्नुतेत्येनंमन्यते यद्यंतरिक्षलोकमश्नुतेत्येनंमन्यते यद्य मुंलोकमश्नुवीतात्येवैनंमन्येत सएषपुरुषःपंचविधस्तस्ययदुष्णंतज्ज्योतिर्यानिखानिसआकाशो

त्मशब्देनप्रस्तुतंवा । विष्णुमत्येवमन्यते । स्वात्मनःसर्वस्माच्चाधिकमेवमन्यते । मुक्तोपिनतेनसाम्यंतद्भावंवामन्यते । यद्यंत रिक्षलोकंभगवत्प्रसादादश्नुतेतदाप्येनंविष्णुमत्येवमन्यते । यद्यमुंलोकंस्वर्गंदेवलोकाधिपत्यमितियावत् । अश्नुवीतअश्नतेभगवत्प्र सादात्प्राप्नोतितद्योग्यस्तदातदपिअश्नुवीतैव भुंजीतैव । बहुगणिकादिपरिवाररूपमशुचीदंपदमित्यादिबुद्ध्या नापह्नुवीत । अथवाअश्नुतइतिपदमनुवर्त्यव्याख्येयं । यद्येवममुंलोकमश्नुवीतप्राप्तोभवति । तदाप्येनंभगवंतं । अतिमन्येतैव । सर्वथास्वतःसर्व स्माच्चाधिकमेवमन्येत । यद्वायःसर्वलोकमतीत्य । यद्धकिंचाश्नुतेसमुक्तोप्येनंयस्मादतिमन्यतेतस्मादंतरिक्षलोकाधिपत्यंप्रा

प्तोप्येनमतिमन्यतेअधिकमेवमन्येत । स्वर्गलोकाधिपत्यंप्राप्तोप्येनमतिमन्येतैवेत्यर्थः । तथाचभगवान्मुक्तैरमुक्तैश्चसर्वोत्तम त्वेनाचिंत्यइतिभावः । सएषपुरुषःपुरुषस्थःपुरुषनामाहरिःपंचविधः । पुरुषदेहस्थपंचभूतेषुपंचरूपःस्थितः । तदेवविशदयति ॥ तस्येत्यादिना । तस्यतदीयदेहस्थपंचभूतसमुदायस्यमध्ये । यदुष्णंजाठराग्न्यादिकंतत्ज्योतिस्तत्रज्योतिषिज्योतिर्नामाप्र द्युम्नःस्थितः । यानिखानियेऽवकाशाःकर्णनासादिविवररूपाःसआकाशस्तस्मिन्नाकाशनामावासुदेवः । अथयल्लोहितंश्लेष्मा रेतश्चताआपस्तासुचाम्नामास्त्रीरूपीबहुरूपोऽनिरुद्धः । यच्छरीरमस्थ्यादिरूपंकठिनं सापृथिवी । तस्यांचपृथिवीनामानारा

थयल्लोहितंश्लेष्मारेतस्ताआपोयच्छरीरंसापृथिवीयःप्राणःसवायुः सएषवायुःपंचविधःप्राणो पानोव्यानउदानःसमानस्ताएतादेवताःप्राणापानयोरेवनिविष्टाश्चक्षुःश्रोत्रंमनोवागितिप्राण

यणः । यःप्राणःसवायुस्तस्मिन्वायुनामासंकर्षणइति । एवंदेहस्थपंचभूतेषुभगवतःपंचरूपाण्युक्त्वातत्रवायौपुनःपंचरूपस्यभ गवतःस्थितिमाह । सएषवायुरिति । यःसंकर्षणाधिष्ठानभूतःसएषवायुःप्राणादिभेदेनपंचविधःस्थितः । इतरभूतेषुत्वेकैकरू पेणैवस्थितोतःखादिभ्यश्चतुर्भ्योवायुरेवविशिष्टइतिभावः । अतएवताःपूर्वोक्ताःज्योतिरादिचतुर्भूताभिमानिन्यः । एताः वक्ष्यमाणाःदेवताःप्राणापानयोःप्राणापानरूपेवायावेवनिविष्टाआश्रिताः । कास्ताः । चक्षुःश्रोत्रंमनोवागित्येताः । तत्रचक्षुः ज्योतिर्भूतात्मकं तदभिमानीरविः । श्रोत्रमाकाशरूपं तद्देवाःमित्रधर्मवरुणकुबेराश्चत्वारोदिग्देवाः । मनःपृथिव्यात्मकं

तद्देवाश्चशेषवींद्रशिवेंद्रकामानिरुद्धगुरुचंद्राः । वाक्किंचित्तेजोयुताविशेषेणत्वबात्मिका । अतोभूतद्वयात्मकत्वाद्वाचस्तद
भिमान्यग्निरुमाच । अत्रचक्षुरग्निःश्रोत्रंचंद्रोमनःपर्जन्योवाक्स्वाहेतिचक्षुराद्यभिमानीनिद्वितीयकक्षास्थितानिदेवतांतराण्य
पिग्राह्याणि । नकेवलमेतासांदेवतानांप्राणाश्रितत्वंकिंनामैतादेवताःप्राणस्यवायोरपायंदेहान्निर्गमंअनुयंतिअनुसृत्यैवनिर्ग
च्छंत्यपि । यद्यज्ञःयोयज्ञः । सएषवाचश्चित्तस्य । चक्षुःश्रोत्रयोश्चेत्यपिग्राह्यं । तदभिमानिनांदेवानामितियावत् । उत्तरोत्त
रिक्रमः । तृतीयोतिशये । उत्तरोत्तरक्रमजातः । उत्तरोत्तरंतारतम्यक्रमजातप्रेरणारूपवृत्तिजातइत्यर्थः । यज्ञोहिचक्षुःश्रोत्र

स्यह्यन्वपायमेताअपियंति सएषवाचश्चित्तस्योत्तरोत्तरिक्रमोयद्यज्ञः सएषयज्ञःपंचविधोग्निहो

मनोवाग्व्यापारसाध्यः । ताश्चतत्तदभिमानिदेवताभिःप्रेरिताएवस्वस्वव्यापारेषुप्रवर्ततइति । यतएवंविष्णुर्वायौपंचधाव
स्थितःतस्माद्वाय्वधीनदेवताप्रेरितवाक्चित्तादिव्यापारसाध्यःसएषयज्ञोग्निहोत्रादिभेदेनपंचविधः । तत्रस्थितोभगवानप्य
ग्निहोत्रादिनामकोऽनिरुद्धादिरूपकःपंचविधः । अत्रायंविवेकः । अदनाद्धवनाच्चाग्निहोत्रनामानिरुद्धोऽग्निहोत्रेस्थितः ।
दर्शनाद्दर्शः । मासोपलक्षितसर्वकालेषुपूर्णत्वात्पूर्णमासः । एवंदर्शपूर्णमासनामाद्विरूपःप्रद्युम्नोदर्शपूर्णमासनाम्नोरिष्टिविशे ॥ २८ ॥
षयोःस्थितः । चतुरत्वान्मासोपलक्षितसर्वकालगतत्वात्चातुर्मास्यत्रयनियामकत्वाच्चतन्नामासंकर्षणोबहुरूपश्चातुर्मास्याख्ये

ष्टिषुस्थितः । पालनात्सुखरूपत्वात्पशुनामावासुदेवः पशुनामकेष्टौस्थितः । सोम्यत्वादुनारुद्रेणमयालक्ष्म्याचयुक्तत्वाद्वासो मनामानारायणःसोमयागेस्थितइति । एवंसोमयागेपिपंचरूपभगवदवस्थानंवक्तुंसोमस्याग्निहोत्रादिचतुर्यज्ञेभ्योवैशिष्ट्यंताव दाह । सएषइति । यत्वयःसोमःसएषयज्ञानांमध्येसंपन्नतमःअतीवश्रेष्ठइत्यर्थः । सोमस्यपांचविध्यंचाह ॥ एतस्मिन्निति । एतस्मिन्यज्ञश्रेष्ठेसोमे । एताःपंचविधाःप्रकाराअधिगम्यंतेशास्त्रेषुप्रतिपाद्यंतेहि । कास्ताःसवनेभ्यःप्रातर्माध्यंदिनसायंसवने भ्यःप्रागनुष्ठेयोयत्वयःसोमःसएकाविधा । विधेयानुसारेणसेतिस्त्रीलिंगं । प्रकारप्रकारिणोरभेदात्सामानाधिकरण्यं । त्रीणि

त्रंदर्शपूर्णमासौचातुर्मास्यानिपशुःसोमःसएषयज्ञानांसंपन्नतमोयत्सोमएतस्मिन्ह्येताःपंचवि धाअधिगम्यंतेयत्प्राक्सवनेभ्यःसैकाविधात्रीणिसवनानियदूर्ध्वंसापंचमी ॥ ३ ॥

सवनानियानितास्तिस्रोविधाः । सवनेभ्यऊर्ध्वंयत्वयःसवनत्रयादुपरितनःसोमःसापंचमीविधेति । एवंपंचविधेएतस्मिन्सो मे । एताःवक्ष्यमाणाःअनिरुद्धादिमूर्तयःपंचविधाअधिगम्यंते । कथं यत्प्राक्सवनेभ्यःसा तस्मिन्प्रागंचनात्प्राक्शब्दवा च्याअनिरुद्धाख्यामूर्तिरेकाविधा । त्रीणिसवनानित्रिषुसवनेषुजगत्प्रसवकर्तृत्वात्सवननामकानिप्रद्युम्नसंकर्षणवासुदेवाख्या नित्रीणिरूपाणितिस्रोविधाः । यदूर्ध्वंसातस्मिन्सर्वोच्चत्वादूर्ध्वशब्दवाच्यंनारायणाख्यंरूपंपंचमीविधेति ॥ ३ ॥ योधि

कारी । यज्ञेयज्ञेषु । अध्यूह्ळंअध्यूढंअधिरूढं । यज्ञं याज्यत्वाद्यज्ञनामानं । अहनिअहस्सु । अध्यूह्ळंअहः । अहार्यत्वा दहर्नामानंदेवेषुब्रह्मादिषुअध्यूह्ळंदेवंसर्वोत्तमत्वाद्देवनामानंविष्णुं । वेद सःसंप्रतिवित्सम्यग्ज्ञानी हवै प्रसिद्धः । यज्ञाद्य धिरूढस्ययज्ञादित्वमौपचारिकंचेत्तज्ज्ञानिनःसम्यग्ज्ञानित्वमनुपपन्नंस्यात् । अतोनेदंयज्ञादित्वंविष्णोरौपचारिकंकिंतुवास्तव मेवेत्याशयेनाह । एषवैयज्ञइत्यादिना । एषविष्णुः । यज्ञेअहनिदेवेषुच । यज्ञोहर्देवश्च । यज्ञादीनांयज्ञत्वादिप्रदत्वेनय ज्ञादिनामासन्नेवाध्यूह्ळोवैइत्यर्थः ॥ यज्ञादिनामकभगवद्रूपस्यैवबृहतीसहस्रस्थितत्वमित्यभिप्रेत्याह ॥ यदेतदिति । परि

योहवैयज्ञेयज्ञंवेदाहन्यहर्देवेषुदेवमध्यूह्ळंससंप्रतिविदेषवैयज्ञेयज्ञोहन्यहर्देवेषुदेवोध्यूह्ळो यदेत न्महदुक्थंतदेतत्पंचविधं त्रिवृत्पंचदशंसप्तदशमेकविंशंपंचविंशमितिस्तोमतो गायत्रंरथंतरं

पूर्णत्वान्महत् । सर्वोत्थापनकारित्वादुक्थनामकबृहतीसहस्रस्थितत्वाच्चोक्थंयदेतद्भगवद्रूपं । एषवैयज्ञेयज्ञइत्यादिपूर्वेणसं बंधः । तदेतत्बृहतीसहस्रस्थितमुक्थनामकंभगवद्रूपंपंचविधं । स्तोमसामचितिछंदःशस्त्रेषुपंचसु । तेष्वपिप्रत्येकमनिरुद्धा दिनारायणांतंपंचविधतयास्थितमित्यर्थः । तत्रस्तोमेस्थितानिरुद्धस्यतावत्पांचविध्यंदर्शयति ॥ **त्रिवृदित्यादिना** । ति स्रोविधाःवृणोतीतित्रिवृत् । अध्यात्माधिभूताधिदैवस्थितंस्तोमगतानिरुद्धस्यानिरुद्धाख्यंरूपंत्रिवृदितिप्रोच्यते । एवंप्रद्यु म्नाख्यंरूपंपंचभूतेष्वध्यात्मादिभेदेनप्रत्येकंस्थितंपंचदशविधत्वात्पंचदशमित्युच्यते । तथासंकर्षणाख्यंरूपंषोडशकलात्मक ॥ २९ ॥

लिंगशरीरेतदीयषोडशकलासुचस्थितत्वात्सप्तदशंप्रोच्यते । वासुदेवाख्यंचरूपमध्यात्मादिभेदेनसप्तधातुषुस्थितत्वादेकविंश तिविधतयैकविंशमित्युच्यते । नारायणाख्यंतुरूपंमनोबुद्ध्यहंकारचित्तेषुसत्वादिगुणत्रयेप्रकृतौचाध्यात्मादिप्रभेदेनस्थितैश्च तुर्विंशतिरूपैर्नारायणाख्यमूलरूपेणचसहपंचविंशमितिगीयते । इतिस्तोमतःस्तोमरूपेण । स्तूयमानत्वात्स्तोमशब्दवाच्यत येतियावत् । अथवा स्तोमतः ल्यब्लोपनिमित्तापंचमी । स्तोममधिष्ठायविद्यमानमनिरुद्धाख्यंरूपंपंचविधमितिसंबंधः । अथसामगतप्रद्युम्नस्यपांचविध्यमाह ॥ **गायत्रमित्यादिना** । गायतांत्रायकत्वाद्गायत्रनामकंप्रद्युम्नस्यानिरुद्धाख्यंरूपं । एवंप्रद्युम्नाख्यंप्रद्युम्नीयंरूपंरथारूढत्वाद्रथंतरमुच्यते । तथासंकर्षणाख्यंरूपंबृहद्रूपत्वाद्बृहदित्युच्यते । वासुदेवाख्यंचरूपंभ

बृहद्भद्रंराजनमितिसामतो गायत्र्युष्णिग्बृहतीत्रिष्टुब्द्विपदेतिच्छंदस्तः शिरोदक्षिणःपक्षउत्तरः

द्रमोक्षप्रदत्वाद्भद्रमित्युच्यते । दातृत्वात्तत्तदाख्योसावितिवचनात् । नारायणाख्यंतुरूपंमुक्तानांराजनाद्राजनमित्युच्यते । इतिसामतःसामरूपेण । सर्वभूतेषुसमत्वात्सामशब्दवाच्यतयेतियावत् । अथवासामतःसामाधिष्ठायविद्यमानंप्रद्युम्नाख्यंरू पंपंचविधमितिपूर्वेणैवसंबंधः । अथछंदोगतसंकर्षणस्यपांचविध्यंदर्शयति । गायत्रीत्यादिना । त्रिषुप्रातर्मध्याह्नसायंकालेषु संध्योपास्तिंकुर्वद्भिर्गीयतइतिगायत्रीनामकंसंकर्षणस्यानिरुद्धाख्यंरूपं । एवंप्रद्युम्नाख्यंरूपमग्निसूर्यस्थितत्वेनोष्णस्वरूपत्वादु ष्णिगित्युच्यते । तथासंकर्षणाख्यंरूपंपूर्णत्वाद्बृहतीत्युच्यते । वासुदेवाख्यंचरूपंत्रिभिर्वेदैःस्तूयतइतित्रिष्टुबित्युच्यते । नारायणाख्यंतुरूपंद्वेपदेरूपेयस्येतिद्विरूपत्वाद्द्विपदेत्युच्यते । एतानिचरूपाणिपंचापियोषिदाकाराणीतिबोध्यं । इतिछंदस्तः

छंदोरूपेण । छंद्यत्वाच्छंदःशब्दवाच्यतयेतियावत् । अथवाछंदस्तःछंदोधिष्ठायविद्यमानंसंकर्षणाख्यंरूपंपंचविधमितिसंबंधः । अथचितिगतवासुदेवस्यपांचविध्यंकथयति । शिरइत्यादिना । चितेःश्येनाकारत्वात्तस्याःशिरआदिपंचावयवाःप्रसिद्धाः । अतस्तदंतर्गतवासुदेवस्यापिपंचावयवाःसंत्येव । तत्रवासुदेवस्यानिरुद्धाख्यंरूपंशिरः । प्रद्युम्नाख्यंरूपंदक्षिणःपक्षः । संकर्षणाख्यंरूपमुत्तरःपक्षः । वासुदेवरूपंपुच्छं । नारायणाख्यंतुरूपमात्मामध्यदेहः । इत्येवंवासुदेवाख्यंरूपमाख्यानंपंचरूपात्मकावयवतयाख्यायमानंभवति । कृत्यल्युटोबहुलमितिस्मरणात् कर्मणिल्युट् । अथवाइत्येवंवासुदेवरूपस्यशिरआदिपं

पक्षःपुच्छमात्मेत्याख्यानं पंचकृत्वःप्रस्तौतिपंचकृत्वउद्गायतिपंचकृत्वःप्रतिहरतिपंचकृत्वउपद्र

चावयवात्मनाआख्यानंप्रकथनंभवतीत्यर्थः । इदमेववाक्यंशस्त्रगतनारायणस्यपांचविध्यपरत्वेनापिव्याख्येयं । अत्रशस्त्रशब्देनबृहतीसहस्रस्यपंचभागोपेतस्यप्रथमभागएवग्राह्योनसमग्रः । प्रथमेपंचकाद्भागेस्थितोनारायणःस्वयमित्युक्तत्वात् । शिरःपक्षादिविभागस्यापिप्रथमारणेतत्रैवकथितत्वाच्च । तथाचशस्त्रविशेषगतस्यनारायणस्ययदनिरुद्धरूपंतच्छिरः । शिरोरूपकतिपयमंत्रजातगतं । यच्चप्रद्युम्नाख्यंरूपंतद्दक्षिणःपक्षःदक्षिणपक्षात्मकऋकुशतगतं । स्वयमपिदक्षिणपक्षरूपं । यच्चसंकर्षणनामकंरूपंतत्उत्तरःपक्षः । उत्तरपक्षात्मकऋकुशतगतं । स्वयमप्युत्तरपक्षात्मकं । यद्वासुदेवाख्यंरूपंतत्पुच्छंपुच्छरूपकतिपयमंत्रगतंस्वयमपिपुच्छरूपं । यच्चनारायणाख्यंरूपंतत्आत्मामध्यदेहरूपमंत्रजातगतं । स्वयमपिमध्यदेहरूपं । इत्येवं

नारायणाख्यरूपस्याख्यानमित्यर्थः । हरेःसोमाद्यधिष्ठातुःपांचविध्यकथनप्रसंगादन्यदपिपांचविध्यमत्रानुसंधेयमित्यभिप्रेत्याह ॥ पंचकृत्वइत्यादिना । अत्रादौप्रस्तावोद्गीथप्रतिहारोपद्रवनिधनलक्षणेषुपंचसामसुतत्तन्नामापंचरूपीहरिःप्रत्येकमनिरुद्धादिरूपेणपंचधावस्थितइत्युपस्कर्तव्यं । यतएवंप्रस्तावादिषुप्रत्येकंपंचधाभगवानवस्थितस्तस्मादेवप्रस्तोताप्रस्तावसाम्नापंचकृत्वःप्रस्तौति । प्रस्तावगतमनिरुद्धाख्यंभगवंतमितिशेषः । एवमुद्गाताप्युद्गीथगतंप्रद्युम्नाख्यंपंचकृत्वउद्गायति उद्गीथसाम्नास्तौति । प्रतिहर्तापिप्रतिहारगतंसंकर्षणाख्यंपंचकृत्वःप्रतिहरति प्रतिहारसाम्नास्तौति । एवमुपद्रवसामगानकर्तापि

वतिपंचकृत्वोनिधनमुपयंति तत्स्तोभसहस्रंभव त्येवंह्येताःपंचविधाअनुशस्यंतेयत्प्राक्तृचाशी

तद्गतंवासुदेवाख्यंपंचकृत्वउपद्रवति उपद्रवसाम्नास्तौति । निधनसामगातारोपितद्गतं निधनंनिधीयंतेसर्वेमुक्ताअस्मिन्निति तन्नामकंनारायणं । पंचकृत्वउपयंति निधनसाम्नोपगच्छंति । स्तुवंतीतियावत् । अत्रनिधनमितिकर्मोक्त्याप्रस्तौतीत्यादावपिप्रस्तावमुद्गीथंप्रतिहारमुपद्रवंचेतितत्रतत्रकर्माध्याहारोद्रष्टव्यः । जगद्रक्षकत्वेनप्रस्तूयतइतिप्रस्तावोनिरुद्धः । जगत्स्रष्टृत्वेनोच्चैर्गीयमानत्वात्जगदुद्गमनहेतुत्वाद्वोद्गीथःप्रद्युम्नः । प्रतिहरतिसंहरतिजगदितिप्रतिहारःसंकर्षणः । संसारान्मोचयित्वाभक्तानुपस्वसमीपंद्रावयतिप्रापयतीत्युपद्रवोवासुदेवइति तत्तन्नामार्थोपिभाष्योक्तरीत्याद्रष्टव्यः । एवंप्रस्तावादिसामभक्तिप्रतिपाद्यत्वमनिरुद्धादिरूपपंचकस्योक्त्वेदानींतद्गतस्तोभाक्षराण्यपिभगवदनंतरूपाभिधायीनिज्ञातव्यानीत्याह ॥ त

त्स्तोभेति । तत्तत्रप्रस्तावादिषुसामसु । स्तोभसहस्रंभवति । सहस्रशब्दोनंतवाची । अनंताःस्तोभशब्दाःसंतीतियावत् । तच्चस्तोभसहस्रंभवतिपृथक्पृथक्विष्णुप्रादुर्भावानांवाचकमितिशेषः । एवंबृहतीसहस्रमपिविष्णुरूपसहस्रवाचकमितिवक्तुं बृहतीसहस्रस्वरूपंतावदुच्यते ॥ एवंह्येताइत्यादिना । यथासाम्नःपंचविधत्वंएवंहि । एवमेवह्येताःवक्ष्यमाणाःपंचविधा अनुशंस्यंते कथ्यंते । बृहतीसहस्रस्येतिशेषः । कास्ताविधाः । तृचाशीतिभ्यःप्राक्प्रथमभागात्मकंयन्मंत्रजातंसैकाविधा । तिस्रःगायत्रीबार्हतीऔष्णिहीचेतियास्तिस्रस्तृचाशीतयस्तास्तिस्रोविधाः । अथयन्मंत्रजातमूर्ध्वंतृचाशीतिभ्यःपरंसापंचमी

तिभ्यःसैकाविधातिस्रस्तृचाशीतयोयदूर्ध्वंसापंचमी तदेतत्सहस्रंतत्सर्वंतानिदशदशेतिवैस

विधेति । एवंबृहतीसहस्रस्वरूपमुक्त्वातद्वाच्यंविष्णुरूपजातमभिधत्ते ॥ तदेतत्सहस्रमिति । एतच्चावर्तनीयं । तथाच यदेतत्पंचविधत्वेनोक्तंतदेतत्सहस्रंबृहतीसहस्रंकर्तृ । यदेतद्विश्वादिसहस्रनामवाच्यंसहस्रं विश्वादिरूपसहस्रं । तत्कर्म । पृथक्पृथक्प्रतिपादयतीतिशेषः । नकेवलंतद्बृहतीसहस्रंविश्वादिरूपसहस्रवाचकमेव । किंतुसर्वं सर्वनामात्मकं । अनंतनामवाच्यानंतरूपाभिधायिचेतियावत् । तत्कुतइत्यतस्तत्रापीदमेवोत्तरं । तत्सर्वमिति । यतएवमिदंबृहतीसहस्रंसर्वरूपाभिधायि । तत्तस्मात्सर्वरूपाभिधायकत्वादेव । सर्वंविष्णुरूपजातंतत्तेनसंस्तुतमितिशेषः । अन्यथातन्नस्यादितिभावः । किंचदशमत्स्यादिरूपाणिचतानि तत्प्रतिपाद्यानि । बृहतीसहस्रशंस्यानिभवंति । अथवातानि प्रस्तावादिसामभक्तिप्रतिपाद्यानि नके-

वलमनिरुद्धादिपंचैव । किंतुदशमत्स्यादिरूपाणिचेत्यर्थः । यद्वादशेतिसर्वनाम । तथाचतानि मत्स्यादिदशनामान्येवदश । सर्वाणिसर्वनामात्मकानि । सर्वनामार्थभूतसर्वरूपवाचकत्वादित्यर्थः । कथंदशनाम्नांसर्वरूपवाचकत्वमित्यतआह ॥ दशेतिवैसर्वमितिइति । एतानिदश मत्स्यादिरूपाणि । सर्वंवै सर्वरूपात्मकान्यपिभवंति । अतोदशावतारवाचकदशनाम्नांसर्वरूपवाचकत्वमुपपद्यतइतिभावः । कथंदशशब्दस्यसर्वार्थकतेत्यतश्चोक्तं ॥ दशेतिवैसर्वमिति । दशेत्येतत्सर्वं सर्वशब्दसमानार्थमित्येतत् । वैमुख्यतएवश्रुतिप्रसिद्धमित्यर्थः । अथवातानिदशेत्यस्यतानिबृहतीसहस्ररूपवाक्यानिदश ।

र्वमेतावतीहिसंख्या दशदशतस्तच्छतं दशशतानितत्सहस्रं तत्सर्वंतानित्रीणिच्छंदांसिभवंति त्रेधाविहितंवाइदमन्नमशनंपानंखादस्तदेतैराप्नोति ॥ ४ ॥

ददतिशंरूपंविष्णुंतद्गुणव्यंजनेनेतिदशशब्दोदितानीत्यर्थः । तानिबृहतीसहस्रवाच्यरूपाणिदश भक्तसुखदातृत्वाद्दशनामकानीतिवा । एवंदशेतिवैसर्वमित्यस्यापिसर्वंपंचविधंबृहतीसहस्रंसामभक्तिपंचकंच । पंचकद्वितयत्वात् । सर्वनामार्थभूतभगवद्रूपप्रतिपादनाच्च । दशेति । दशनामकंवै । श्रुतिप्रसिद्धमित्यर्थातरंद्रष्टव्यं । ननुकथंदशेतिसर्वमितिदशशब्दस्यसर्वशब्दपर्यायतोच्यते । अल्पसंख्यावाचकस्याधिकसंख्यावाचकताऽयोगादित्यतस्तदुपपादयति ॥ एतावतीत्यादिना । संख्या ह्येतावती । दशत्वपर्यवसन्नैव । नातोधिकास्ति । शतादयोपितत्प्रभेदाएव । कथं । दशयेदशतःदशवर्गाः । पंचदृशतौवर्गे

वेतिसूत्रात् । तत्तेशतमित्युच्यंते । शतान्यपिदशचेत्तत्तान्येवसहस्रमित्युच्यंते । उपलक्षणमेतत् । दशसहस्राणितदयुतं । दशायुतानितल्लक्षमित्यादिकमपिद्रष्टव्यं । अतोमूलसंख्यादशत्वएवपर्यवसितेतिभावः । एवंबृहतीसहस्ररूपंतत्प्रतिपाद्यंच निरूप्योपसंहरति ॥ तत्सर्वमिति । तत्तस्मात्सर्वनामार्थवाचकत्वात् । तत्बृहतीसहस्रंसर्वंसर्ववाचकंसर्वगुणशक्तिरूपनामभगवदभिधायकमित्यर्थः । अस्यचबृहतीसहस्रस्याशनादित्रिकरूपेणभगवद्भोग्यत्वमभिधातुंत्रिविधत्वंतावदाह ॥ तानीति । तद्बृहतीसहस्रंत्रीणिछंदांसिभवंति । गायत्रीबृहतीउष्णिगितिक्रमेणछंदस्त्रयावबद्धऋगात्मकंभवति । छंदांसीतिवि

तद्वाइदंबृहतीसहस्रंसंपन्नं तद्धैतदेकेनानाच्छंदसांसहस्रंप्रतिजानतेकिमन्यत्सदन्यद्ब्रूयामेतित्रि

धेयानुसारेणतानीतिबहुवचनं । एतत्त्रिविधमिदंबृहतीसहस्राख्यमन्नंभगवतोशनमोदनं । पानंपानीयं । खादःखाद्यमितित्रेधाविहितंवै । तच्चबृहतीसहस्रमेतैरशनपानखादरूपैस्त्रिभिश्छंदोभिः । तिसृभिस्तृचाशीतिभिरितियावत् । तत्विष्णवाख्यंब्रह्माप्नोति । तत्स्तावकतयातत्तृप्तिकरंभवतीति ॥ ४ ॥ तदिदंबृहतीसहस्रं । वैउक्तप्रकारेणैवसंपन्नंभवति । ननुबृहतीसहस्रसंपादनस्यैवावश्यकत्वेतत्रोक्तप्रकारेणैवेत्यवधारणंसंभवति । तदेवकुतइत्यतोस्यैवावश्यकतोपपादनायपक्षांतराणिदूषयितुंतावदनुवदति ॥ तद्धेति । तत्तत्रशंसनविषयेएके । एतत्शंसनीयंसहस्रंनानाछंदसासंबंध्येवप्रतिजानते । यत्किंचिच्छंदस्क

ऋक्सहस्रमपिशंसितव्यमेव बृहतीसहस्रसंपादनमविवक्षितमित्याहुः। कुतइत्यतस्तेषामभिप्रायंव्यनक्ति॥ किमन्यत्सदिति। यच्छंदःशंसितुमुपक्रम्यतेइतोन्यत्सत् उत्तमंछंदःकिमस्ति। सर्वेषांछंदसांसाम्येनतारतम्याभावादित्यर्थः। एकेतुत्रिष्टुप्सहस्र मेवशंसितव्यमित्याहुः। एकेतुजगतीसहस्रं। एकेत्वनुष्टुप्सहस्रमिति। एवंनियमवादिनामभिप्रायंव्यनक्ति॥ अन्यद्ब्रूयामेति। सदितिवर्तते। बृहतीसहस्रसंपादनमेवकुतः। बृहतीतोन्यत्त्रिष्टुप्छंदएवसत्। तदुत्तमंब्रूयाम। ततोप्यक्षराधिक्यादिति। एवंजगतीसहस्रवादिनोप्याहुः। अनुष्टुप्सहस्रवादिनस्तुतस्याःबृहत्यादितोक्षराधिक्याभावात्तदुत्तमत्वसाधनायतत्प्रशंसात्मि

ष्टुप्सहस्रमेके जगतीसहस्रमेके नुष्टुप्सहस्रमेके तदुक्तमृषिणा नुष्टुभमनुचर्चूर्यमाणमिंद्रंनिचि
क्युःकवयोमनीषेति वाचिवैतदैंद्रंप्राणंन्यचायन्नित्येतत्तदुक्तंभवति सहेश्वरोयशस्वीकल्याण

कामृचंदर्शयंति॥ तदुक्तमिति। ऋषिणामंत्रद्रष्ट्रा। तत् अनुष्टुभउत्तमत्वज्ञापकमुक्तमित्यर्थः। ऋगर्थस्तुप्रागुक्तएव। स्वय मेवऋक्तात्पर्यमाह॥ वाचीति। वागाख्यायामनुष्टुभि नृसिंहप्रतिपादकानुष्टुप्छंदस्कऋचि। आसमंतात्। पुनःपुनः हंसरूपेणविष्णुनाब्रह्मरुद्रादीन्प्रत्युच्चार्यमाणायांव्याख्यायमानायांचसत्यां। तदोच्चारणादिकाले। इंद्रंपरमेश्वरं। प्राणं विष्णुं। मुनयोन्यचायन्ददृशुः। तथावायुनावाचिरुद्रादीन्प्रत्युपदिश्यमानायांतदा। ऐंद्रंइंद्रःपरमेश्वरस्तत्सहितंप्राणं। हंसरूपिणोविष्णोःसमीपएवहंसरूपिणंवायुंचददृशुरित्येतत्प्रमेयं। तत् तयाएनयाऋचोक्तंभवतीत्यर्थः। तथाच ब्रह्मादिभिर

पिविष्णोःसकाशादनुष्टुबर्थस्यैवसदाश्रूयमाणत्वादनुष्टुबेववरेत्युक्तंभवतीतिभावः । किंचयोनुष्टुप्सहस्रस्यशंसिता सयशस्वी सुप्रसिद्धः । कल्याणकीर्तिःशुभकीर्तिःस्यात् । भवितोःभवितुं । भावोमुक्तिःमुक्तोनिष्पत्तुं । ईश्वरःसमर्थःस्यात् । आयुषः आयुःपरिसमाप्तेः । पुरातुपुरापिप्रेतोःमर्तुंचेश्वरःशक्तःस्यात् । स्वच्छंदमृत्युःस्यादितियावत् । उक्तफलस्यसर्वस्यापिप्रमितत्व ज्ञापनायहशब्दद्वयं । इतिहइत्येवंआहस्म । ऐतरेयोनाममहिदासशिष्यःकश्चनर्षिःपूर्वपक्षंकृतवानित्यर्थः । तत्रोत्तरंभगव तामहिदासेनाभिधीयते ॥ अकृत्स्नोह्येषइत्यादिना । यत्याकाक् । वागाख्यानुष्टुबभिमानिनी । वागिंद्रियाभिमानि

कीर्तिर्भवितोरीश्वरोहतुपुरायुषःप्रैतोरितिहस्माहा कृत्स्नोह्येषआत्मायद्वा गभिहिप्राणेनमनसे

नीवा । उमा । एषएषा । अकृत्स्नआत्माअपूर्णाविष्णुप्रतिमाहि । विधेयानुसारेणैषइतिपुल्लिंगनिर्देशः । कुतोवाचोकृत्स्न त्वमित्यतआह ॥ **अभीति** । अत्रनानुभवतीतिनृशब्दोनञ्चतंत्रेणानुसंधेयौ । तथाच नापुमान्हियस्मात्प्राणेनवायुनामन सामनोभिमानिनाशिवेनच । अभिअभितःविषयेषु इस्यमानःअस्यमानः । तृतीयोतिशये । बहुशःक्षिप्यमाणःसन् । अनु भवति विषयानुभववान्भवति । नतुवाचावागभिमानिन्योमया । अतोजीवानांविषयानुभवप्रेरकत्वाभावात्साअकृत्स्ने त्यर्थः । अतोनतदभिमन्यमानायाअनुष्टुभोवरिष्ठत्वमितिभावः तस्माद्बृहतींबृहतीसहस्रमेवाभिसंपादयेत् । अनुष्टुभोकृत्स्न त्वमात्रेणकथंबृहत्याएवसंपाद्यत्वसिद्धिरित्यतआह ॥ **एषवाइति** । यत्याबृहतीबृहत्यभिमानिदेवतावायुरेषहिकृत्स्नःपूर्ण ॥ ३३ ॥

आत्माविष्णुप्रतिमा । यद्यस्मादेवंतस्मात्बृहतीशब्दवाच्यपूर्णवाय्वभिमन्यमानत्वाद्बृहत्येवबृहती । छंदसांमध्येवरिष्ठेति । यद्बृहतीपदयोरावृत्त्याव्याख्येयं । एवंयद्यस्मादेषाबृहतीइतरच्छंदोभ्योधिकमाहात्म्या । अतएवबृहतीतन्नाम्नी । तस्माद्बृ हतीच्छंदसांमध्येवरिष्ठेति स्वरूपाधिक्योपपादकत्वेनापियोज्यं । हेत्वंतरेणापिबृहत्याएवोत्तमत्वंसदृष्टांतंसाधयितुमाह ॥ **सोयमात्मेति** । सप्रसिद्धोयमात्मामध्यदेहःशरीरैःशिरोबाह्वाद्यंगैःपरिवृतइतितावत्सर्वानुभवसिद्धं । तन्निदर्शनं यथा अयमात्मासर्वतःशरीरैःपरिवृतएवमेवबृहती । छंदोभिःषड्भिःसर्वतःपुरस्तादुपरिष्टाच्चपरिवृता । तथाचइतरच्छंदसांपरि

स्यमनोवाचानानुभवति बृहतीमभिसंपादयेदेषवैकृत्स्नआत्मायद्बृहती सोयमात्मासर्वतःश रीरैःपरिवृतस्तद्यथायमात्मासर्वतःशरीरैःपरिवृतएवमेवबृहतीसर्वतश्छंदोभिःपरिवृता मध्यं ह्येषामंगानामात्मामध्यंछंदसांबृहती सहेश्वरोयशस्वीकल्याणकीर्तिर्भवितोरीश्वरोहतुपुरायुषः

वाररूपत्वादप्राधान्यं । तैः परिवृतत्वाद्राजादिवद्बृहत्याएवप्राधान्यमितिभावः । एतेनैवदृष्टांतेनप्रकारांतरेणबृहत्याउत्तमत्वं साधयति ॥ **मध्यमिति** । आत्मामध्यदेहोहिसर्वेषामंगानांशिरःकरचरणादीनांमध्यं । एवंबृहत्यपिगायत्र्यादिजगत्यंता नांछंदसांमध्यं । अतोमध्यदेहस्यमध्यस्थत्वाद्राज्ञोऽमात्यादिमध्यस्थस्यतेभ्योयथोत्तमत्वमेवंछंदोमध्यस्थत्वाद्बृहत्यास्तेभ्य उत्तमत्वमितिभावः । उपलक्षणमेतत् । चतुर्मुखमध्यदेहजातत्वाद्बृहत्याइतरच्छंदोभ्यस्तदितरांगजातेभ्यउत्तमत्वमित्यपिद्र

ष्टव्यं । बृहतीसहस्रशंसनस्यफलमाह ॥ सइति । पूर्ववदेवेदंव्याख्येयं । उपलक्षणमेतत् । अनुष्टुप्सहस्रशंसनकर्तुःसकाशाद
त्रिगुणाधिकश्चभवतीत्यपिद्रष्टव्यं । इतिहस्माह । स्वशिष्यमैतरेयंप्रतिभगवान्महैतरैयउत्तरमितिशेषः । प्रकृतप्रमेयमुपसंहरति
॥ कृत्स्नइति । यत्याबृहती । एषएषा । कृत्स्नआत्मापूर्णोविष्णुप्रतिमा । हियस्मात्तस्माच्छंसितापुरुषोबृहतीमेवाभिसं
पादयेदिति ॥ ५ ॥ तद्वाइदंबृहतीसहस्रंसंपन्नमितिपूर्वोक्तस्यैवपरामर्शः । एतत्प्रयोजनंचस्वयमेवाचार्योवक्ष्यति । तस्यवा
एतस्यबृहतीसहस्रस्यसंपन्नस्य । उक्तप्रकारेणबृहतीसहस्रसंपादनेसतीतियावत् । अनुष्टुभामेकादशशतानिभवंति । तदु

प्रैतोरीतियस्माद्ध कृत्स्नोह्येषआत्मायद्बृहतीतस्माद्बृहतीमेवाभिसंपादयेत् ॥ ५ ॥

तद्वाइदंबृहतीसहस्रंसंपन्नं तस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यैकादशानुष्टुभांशतानिभवंतिपं
चविंशतिश्चानुष्टुभ आत्तंवैभूयसाकनीयस्तदुक्तमृषिणा वाचमष्टापदीमहमित्यष्टौहिचतुर

परिपंचविंशतिरनुष्टुभश्चभवंति । तत्कथमित्यतआह ॥ आत्तमिति । भूयसापदार्थेन । कनीयोल्पंस्वीकृतंअंतर्भावितंवै ।
तथाचबृहत्याःषट्त्रिंशदक्षरत्वादनुष्टुभोद्वात्रिंशदक्षरत्वादधिकसंख्याकाअप्यनुष्टुभोबृहतीसहस्रेंतर्भवंति । अतोबृहतीसंपादन
मेववरमितिभावः । उक्तमर्थंप्रमाणसंमत्योपपादयति ॥ तदुक्तमिति । वाचमष्टापदीमहं । नवस्रक्तिमृतस्पृशं । इंद्रात्परितन्वं
ममेतिमंत्रमंशतःक्रमेणोदाहृत्यस्वयमेवव्याचष्टे ॥ वाचमित्यादिना । अष्टौचतुरक्षराणिभवंति । अष्टचतुरक्षरात्मिकाद्वा

त्रिंशदक्षररूपानुष्टुबितियावत् । नवस्रक्तिमित्यस्यार्थोबृहतीसंपद्यमानानवस्रक्तीति । सैवानुष्टुबुत्तरानुष्टुभश्चतुरक्षराण्युपा दाययदाबृहतीसंपद्यमानाभवति । तदानवस्रक्ती नवस्रक्तिर्भवति । नवास्रक्तयोविभागाश्चतुरक्षररूपायस्याःसातथोक्तेति । ऋतस्पृशमित्यस्यार्थःसत्यंवैवागृचास्पृष्टेति । वाक्वागाख्यानुष्टुप्उक्तरीत्यानवस्रक्तीभूयऋचाऋग्रूपेण । बृहतीरूपतांप्राप्येति यावत् । सत्यंसत्यरूपंविष्णुंस्पृष्टास्पृष्टवती । विष्णुसन्निधानविशेषपात्रीवेइत्यर्थः । इंद्रात्परितन्वंममइत्यस्यतात्पर्यंवक्तुं पूर्वोक्तमर्थंतावदनुवदति ॥ तद्यदेवेत्यादि । यदेवैतद्बृहतीसहस्रं । तत् । अनुष्टुप्संपन्नं । उक्तरीत्यापंचविंशत्युत्तरैकादश

क्षराणिभवंति नवस्रक्तिमितिबृहतीसंपद्यमानानवस्रक्त्यृतस्पृशमितिसत्यंवैवागृचास्पृष्टेंद्रात्प रितन्वंममइति तद्यदेवैतद्बृहतीसहस्रमनुष्टुप्संपन्नंभवति तस्मात्तदैंद्रात्प्राणाबृहत्यैवाचमनुष्टुभं

शतसंख्याकानुष्टुब्भ्यःसंपन्नंभवतीत्यर्थः । अस्तुकिंततःप्रकृतइत्यतआह ॥ तस्मात्तदैंद्रादिति । अत्रेदंतावदादौभाष्यो क्तरीत्यानुसंधेयं । इदंबृहतीसहस्रंवायुप्रंतिमारूपंतावत् । अतएवविष्णुप्रतिमारूपमपि । एतदधिष्ठातुर्वायोर्विष्णुमुख्यप्रति मात्वात् । तस्माद्बृहतीसहस्रसंपादनेविष्णुप्रतिमानिर्मिताभवति । एवमनुष्टुब्देवतोमापिभगवत्प्रतिमारूपासाचबृहतीदैवत प्राणरूपवायोरुत्पन्नेति । तथाचतस्मात्उमायाअपिभगवत्प्रतिमात्वात् । यदातस्यैवबृहतीसहस्रत्वेनसंपन्नस्यऋग्जातस्यपुनः पंचविंशत्युत्तरैकादशशतानुष्टुस्त्वेनसंपादनंक्रियते । तदाबृहत्यैबृहत्याःबृहतीदैवतप्राणरूपाद्वायोर्वाचंवाग्रूपामनुष्टुभमनुष्टुब्दे

वतामुमात्मिकांतन्वंतनूंविष्णोरेवद्वितीयप्रतिमां । संनिर्मिमीते । एतत्सर्वंसम्यग्ध्यायन्निति शेषः । नन्वेवंध्यातृशक्त्यैव
बृहत्याःसकाशादनुष्टुप्संपादनादिकंभवतिकिंनेत्याह ॥ ऐंद्रात्प्राणादिति । अत्रैंद्रादित्यादौग्राह्यं । तथाचैंद्रात्परमेश्वराद्बृ
हतीस्थविष्णोर्बलादेवेत्यर्थः । तथाऐंद्रात् । इंद्रस्यपरमेश्वरस्यायमैंद्रस्तस्यनितरांप्रियस्तस्मात्प्राणात्प्राणदैवताद्वायोस्तद्ब
लाच्चेत्यर्थः । तथाचायंमंत्रार्थउक्तोभवति । अहमष्टापदींचतुरक्षराष्टविभागयुक्तांद्वात्रिंशदक्षरोपेतांनवस्रक्तिंउत्तरानुष्टुभः
सकाशाच्चतुरक्षराण्युपादाय । चतुरक्षरकनवविभागोपेतां । षट्त्रिंशदक्षरात्मकबृहतीत्वेनसंपन्नामितियावत् । अतएवऋत
स्पृशं । ऋतंसत्यरूपंशश्वदेकप्रकारंविष्णुंस्पृशतीत्यृतस्पृक् । तांविष्णुसन्निधानविशेषपात्रींवाचमनुष्टुभंबृहतीसहस्रत्वेनसंपादि

तन्वंसंनिर्मिमीते सवाएषवाचःपरमोविकारोयदेतन्महदुक्थं तदेतत्पंचविधंमितममितंस्वरः

तमनुष्टुब्गजातमितियावत् । पुनःपंचविंशत्युत्तरैकादशशतानुष्टुब्त्वेन । इंद्रात्परमेश्वरात् । तद्बलादेवेतियावत् । तथाऐंद्रा
त्प्राणात् । परमेश्वरातिप्रियप्राणदैवतवायुबलाच्चसंपाद्य । तस्यतस्यैवविष्णोस्तन्वंप्रतिमां । अहंपरिममेनिर्मितवानस्मीति ।
एतच्चबृहतीसहस्रंविष्णोरेववाचकमितिभावेनतस्यविष्ण्वेकनामभूताकारव्याख्यानरूपत्वमाह ॥ **सवाएषइति** । यदेतन्म
हदुक्थंबृहतीसहस्रंसएषवाचोकारस्यपरमोविकारः । इतरसर्वशब्दापेक्षयोत्तमव्याख्यानमित्यर्थः । परमइतिविशेषणादन्य
त्सर्वंशब्दजातंविकारमात्रमित्यपिग्राह्यं । तदेतत्परमविकाररूपंबृहतीसहस्रं विकारमात्ररूपमन्यत्सर्वंशब्दजातंच पंच

॥ ३५ ॥

विधं । कथं । मितममितंस्वरःसत्यानृतेइति । तत्रसत्यानृतयोःपरस्परप्रतियोगिभावापन्नत्वेनद्वंद्वनिर्देशः । तत्रमितादिकंवि
विच्यदर्शयति ॥ **ऋगित्यादिना** । स्वरनियमवतीवागृक् । स्वरनियमरहितामिताक्षरागाथा । परस्परमसमाक्षराणिखं
डवाक्यानिकुंब्याः । तदेतत्त्रितयंमितं । यज्ञांगंवाक्यंयजुः । यज्ञानंगंवाक्यंनिगदः । अर्थसत्ताहीनंवाक्यंवृथावाक् । तदे
तत्त्रयममितं । सामबृहदादि । अथोनंतरं । यःकश्चगेष्णो यत्किंचिद्गानं । सएषःतदेतद्द्वयंस्वरः । ओमित्येतदक्षरंसत्यमित्यु
च्यते । मूलभूतस्याकारस्योंकारेआदावेवस्थितत्वादकारार्थस्यैवोंकारवाच्यत्वाच्च शब्दतोर्थतश्चव्यत्यासाभावेनयथावस्थित

सत्यानृतेइत्यृक् गाथाकुंब्यातन्मितं यजुर्निगदोवृथावाक्तदमितं सामाथोयःकश्चगेष्णःसस्वर
ओमितिसत्यं नेत्यनृतं तदेतत्पुष्पफलंवाचो यत्सत्यंसहेश्वरोयशस्वीकल्याणकीर्तिर्भवितोः

रूपत्वात् । नेत्यक्षरमनृतमित्युच्यते । मूलभूताकारस्यनकारांतेस्थितत्वेनमुख्यतोवस्थित्यभावादयथास्थितेः । यत्सत्यमों
कारस्तदेतद्वाचोऽकारस्यपुष्पंफलंपुष्पफलात्मकंउकारमकाररूपविकारद्वयसहितत्वात् । तथाचवाचोकारस्यपुष्पंफलंपुष्पफल
रूपंसत्यमोंकारंयोर्थिनेप्रतिषेधमकृत्वावदति । सपुमान्यशस्वीलोकेप्रख्यातिमान्कल्याणकीर्तिश्चभवति । तथाभवितोः
मुक्तोभवितुमीश्वरश्चभवति । अथयदनृतंनेत्यक्षरमेतत् । वाचोकारस्यमूलंकिंचिन्मूलमिव । एकार्थत्वात् । ततश्चतन्नि
दर्शनं यथावृक्षआविर्मूलआविष्कृतमूलश्चेच्छुष्यतिशुष्कोभवति । सःशुष्कभावंप्राप्तश्चोद्वर्ततेविनश्यति । एवमेवानृतंनिषेधबो

धकंनकारमर्थिनेवदन्तेनदोषेणसआत्मानमेवाविर्मूलंप्रकटितमूलंवृक्षमिवशोषोन्मुखंकरोति । ततश्चसशुष्यति । सशुष्कश्चोद्व र्तते । तस्मादनृतोक्तेरेवमनर्थहेतुत्वादनृतंनेत्यक्षरमर्थिनेनवदेत् । किंतुदयेत । तुरेवार्थः । सतस्वर्थिषुदयामेवकुर्यात् । कुतः । एने नएतेनैवकारणेन दयामकृत्वार्थिभ्योनेतिभाषणेशोषाद्यनर्थप्राप्तिसद्भावादित्यर्थः । एवमोंकारस्यावश्यवक्तव्यत्वंनकारस्याव क्तव्यत्वंचोक्त्वेदानीमुभयोरप्यवक्तव्यत्वंवदिष्यन्ओंकारस्यतावदवक्तव्यत्वमाह ॥ पराग्वाइति । यदेतदोमितिएतदक्षरं । पराक्प्रतिकूलंवै । कुतःरिक्तंरिक्तताप्रदं एतदेवोपपादयति ॥ तद्यदिति । यद्यत्किंचयत्किंचिद्धनादिकंस्वकीयमेकैकमार्थिभ्यः

पुष्पंहिफलंवाचःसत्यंवदत्यथैतन्मूलंवाचोयदनृतंतद्यथावृक्षआविर्मूलःशुष्यतिसउद्वर्ततएवमे वानृतंवदन्नाविर्मूलमात्मानंकरोतिसशुष्यतिसउद्वर्ततेतस्मादनृतंनवदेद्दयेतत्वेनेन पराग्वाएत द्रिक्तमक्षरंयदेतदोमिति तद्यत्किंचोमित्याहात्रैवास्मैतद्रिच्यतेसयत्सर्वमोंकुर्याद्रिंच्यादात्मानं

पुमान्ओमित्याहददामीतियदिब्रूयात् । तर्हितावन्मात्रेणअत्रैवतदैवतत्अस्मैअस्मात्रिच्यतेअपगच्छति । वाचादत्तत्वात्पुनस्त दुपभोगेप्रत्यवायःस्यादतोभोगेतदपगतप्रायमेवेतिभावः । स्थितेचैवंसपुमान्यद्यदिसर्वमपिस्वकीयंधनादिकमर्थिभ्यओंकु र्यात्ददामीतिप्रतिजानीयात् । दद्याच्चेत्यपिग्राह्यं । तर्हिसआत्मानंरिंच्यात्रिक्तंकुर्यात् । ततश्चसपुमान्कामेभ्योनालंस्यात् स्वाभिलषितपुरुषार्थप्राप्तयेसमर्थोनस्यात् । एवमोंकारस्यावक्तव्यत्वमुक्त्वानकारस्यापितद्वक्तुमारभते ॥ अथेति । अथेत्यारं

भार्थः। यन्नेत्यक्षरमेतत्। यद्यप्यभ्यात्मंपूर्णं आत्मानमभि। आत्मनःपूर्णत्वकारणं। अर्थिभ्योयदिनेतिवदेत्नैवाकिंचिद्द्या च्चतर्हिस्वकीयधनादेःस्वस्मिन्नेवावस्थानाद्रिक्तताप्राप्तिर्नभवतीतियावत्। तथापिसयद्यदियत्किंचिदपिधनादिकमदित्सन्न र्थिभ्यःसर्वंनेतिब्रूयात्तर्ह्यस्यनेतिब्रुवतःपापिकाकीर्तिर्जायेत जायते। साचपापिकाकीर्तिरेनंपुरुषंतत्रैवतस्मिन्नेवजन्मनिहन्या त्हतप्रायंकुर्यात्। संभावितस्यचाकीर्तिर्मरणादतिरिच्यतइतिवचनात्। तस्मान्नेत्यपिनब्रूयादित्यर्थः। नन्वेवमुभयोरप्यव क्तव्यत्वोपपादनंपरस्परंविरुद्धमित्यतोस्यतात्पर्यंव्यनक्ति॥ **तस्मादिति**। सर्वोंकरणस्यसर्वप्रतिषेधस्यचोक्तरीत्याऽनर्थहेतु

सकामेभ्योनालंस्याद्थैतत्पूर्णमभ्यात्मंयन्नेतिसयत्सर्वन्नेतिब्रूयात्पापिकास्यकीर्तिर्जायेतसैनंतत्रै
वहन्यात्तस्मात्कालएवदद्यात्कालेनदद्यात्तत्सत्यानृतेमिथुनीकरोतितयोर्मिथुनात्प्रजायतेभूयान्

त्वात्। कालएवदद्यात्काले नदद्यात् कालइत्युपलक्षणं। पुण्यकालेपुण्यदेशेसत्पात्रेष्वेवद्रव्यंज्ञानंवाफलमनभिसंधायश्रीविष्णु प्रीत्यर्थंदद्यात्। अपुण्यकालदेशयोरपात्रेषुचफलाभिसंध्यादिनानदद्यादित्यर्थः। तथाचोभयोरपिव्यवस्थयैववक्तव्यत्वमवक्त व्यत्वंचेतिभावः। एवंव्यवस्थयांसत्यानृतसमाहारकर्तुःफलमाह॥ **तदिति**। यद्येवंसत्यानृतेपात्रापात्राद्यनुसारेणमिथुनीक रोतिमेलयति। तत्तर्हितयोर्मिथुनात्ॐकारनकारयोर्मिथुनीकरणात्। प्रजायतेप्रजनयति। सत्पुत्रादिप्रजावान्भवति। भूया न्ज्ञानादिगुणैरुत्कृष्टश्चभवतीत्यर्थः। सवाएषवाचःपरमोविकारइत्युक्तंप्रमेयमुपसंहरन्तज्ज्ञानस्यावश्यकत्वमभिप्रेत्यतद्धे

त्तारंप्रशंसति ॥ **योवैतामिति**। यस्यावाचएषसर्वोपिमितामितादिर्विकारोव्याख्यानरूपस्तांवाचमकाराख्यामुक्तरीत्यायोवे
दससंप्रतिवित्सम्यग्ज्ञानीवैइत्यर्थः। अत्रवाक्शब्देनाकारएवविवक्षितः। एषविकारइत्येतच्छब्देनचसर्वापिवाग्विवक्षितेतिभा
वेनाह ॥ **अकारोवाइति**। सर्वापिवाक्मितामितादिपंचरूपाअकारोवै। अकारस्यैवविकाररूपेत्यर्थः। तदेवोपपादयति ॥ **सै
षेति**। सैषाअकारात्मिकावाक्। स्पर्शोष्मभिरित्युपलक्षणं। ककारादिभिःसर्वैर्व्यंजनाक्षरैर्व्यज्यमानाबह्वीबहुत्वसंख्योपेता
नानारूपाविलक्षणरूपाचभवतीत्यर्थः। अथवास्पर्शोष्मभिर्व्यज्यमाना। अजहरणइतिधातोर्विहरमाणासंगतेतियावत्। बह्वीबहुप

**भवति योवैतांवाचंवेदयस्याएषविकारःससंप्रतिविदकारोवैसर्वावाक्सैषास्पर्शोष्मभिर्व्य
ज्यमानाबह्वीनानारूपाभवति तस्यैयदुपांशुसप्राणोथयदुच्चैस्तच्छरीरंतस्मात्तत्तिरइवतिरइवह्य**

दरूपानानारूपानानाविधार्थनिरूपिकाभवतीत्यर्थः। अथास्यैवाकारस्यजपादिषुफलतारतम्यमप्यस्तीतिसूचनायावस्थाभेदे
नाभिमानिभेदमाह ॥ **तस्यैयदिति**। तस्यैतस्याःवाचोकाराख्यायाःयदुपांशु उपांशूच्चारणं। उपांशूच्चारितोकारइति
यावत्। सप्राणस्तदभिमानीवायुः। अथतस्यायदुच्चैरुच्चारणमितिशेषः। उच्चैरुच्चारितोकारइतियावत्। तच्छरीरं। स्थूल
सूक्ष्मभेदेनद्विविधस्यसर्वप्राणिशरीरस्याभिमानिनीयाभारतीसातदभिमानिनीत्यर्थः। उभयत्रापिक्रमेणयुक्तिमाह ॥ **तस्मादि
ति**। प्राणाभिमन्यमानत्वादेवतत्उपांशूच्चारितमवर्णंतिरइवतिरोभूतमिववर्तते। तदपिकुतः। तिरइवह्यशरीरंयदशरीरं ॥ ३७ ॥

वस्तुतत्तिरइवहि। अप्रत्यक्षमिवहि। प्रकृतेचाभिमानीप्राणोशरीरोहि शरीराभिमानशून्यत्वात्। यथोक्तं। ब्रह्मानिरभि
मानत्वाच्छरीर्यप्यशरीरवानित्यादि। ततोशरीरप्राणाभिमन्यमानत्वादुपांश्वकारस्यतिरोभूतवत्स्थितिर्युक्तेतिभावः। अथ
यदुच्चैरुच्चारितमवर्णं। तत्शरीरं शरीराभिमानिभारतीदैवत्यं। तस्मादेवहेतोस्तत्। उच्चैरुच्चारितमवर्णं। आविः आवि
र्भूतंश्रवणप्रत्यक्षगोचरंभवति। शरीराभिमानिभारतीदेवताकत्वेपिकुतोस्याविर्भूतत्वमितितत्राह ॥ **आविर्हिशरीरमिति**।
तथाचोच्चापेक्षयोपांशोरकारस्यप्राणाभिमन्यमानस्यजपादिषुफलाधिक्यमितिभावः ॥ ६ ॥ विद्यांतरोपदेशार्थंतद्वाइदंबृह

**शरीरमशरोहिप्राणोथयदुच्चैस्तच्छरीरंतस्मात्तदाविराविर्हिशरीरं ॥ ६ ॥
तद्वाइदंबृहतीसहस्रंसंपन्नंतद्यशःसइंद्रःसभूतानामधिपतिः सयएवमेतमिंद्रंभूतानामधिपतिंवे**

तीसहस्रमितिपुनःपरामर्शः। तदिदंबृहतीसहस्रं। तद्यशः। तस्यनारायणस्यगुणकर्मकीर्तनरूपं। यस्यनारायणस्यैतत्य
शःसभगवानेवेंद्रः। इंद्रनामामुख्यतः। प्रथमेंद्रत्वात्परमैश्वर्ययोगाच्च। सएवभूतानांब्रह्मादीनांजीवानामधिपतिः। यएव
मेतंबृहतीसहस्रप्रतिपाद्यंनारायणमिंद्रंभूतानामधिपतिंचवेद। सपुमान्। विस्रसा। क्विबंतोयं। विस्रंसनेनयुक्तःअखिल
बंधाद्विस्रस्तःसन्। अस्माल्लोकात्प्रैति। हरेर्लोकंगच्छतिह। एवकारेणनास्त्यत्रसंशयइत्याह। इतिहऐतरेयोमहिदासआह
स्म। समहिदासएवेंद्रनामा। प्रेत्य श्वेतद्वीपादिलोकादिमंप्राप्य। भूत्वा अत्रप्रादुर्भूय। मनुष्यदृष्टिगोचरतांप्राप्येतियावत्।

एषुलोकेषुराजति प्रकाशते । रमतइतियावत् । इदमपिभगवतोमहिदासस्यैवपरोक्षवद्वाक्यमितिबोध्यं । अन्यथोत्तरत्रप्र
श्नप्रतिवचनासंभवात् । एवंभगवतोपदिष्टाःकेचित्तच्छिष्याः तत्तत्रविषये । आहुःपृच्छंतीतियावत् । यदिभगवान्महिदा
सादिरूपेणभूमिष्ठःसन्रमतेतर्हिरमणस्यस्त्रियाविनाऽयोगात् । नित्यसुखस्वरूपस्यस्वतंत्रस्यान्यतोरत्ययोगात्स्वकीयेस्त्रीरूप
एवस्वयंरमतइतिवाच्ये । अनेनभूमिगतेनपुंरूपेणामुंदिविष्ठंलोकं । लोक्यतेअवलोक्यतइतिलोकशब्दवाच्यंस्वकीयंस्त्रीरू
पं । अभिसंभवतियत् । अभिगच्छतिकिं । यच्छब्दःकिंशब्दार्थे । दिविष्ठस्त्रीरूपेणरमतेकिमितियावत् । अथप्रश्नांत

दविस्त्रसाहैवास्माल्लोकात्प्रैतीतिहस्माहमहिदासऐतरेयः प्रेत्येंद्रोभूत्वैषुलोकेषुराजति तदाहुर्यद
नेनरूपेणामुंलोकमभिसंभवती३ अथकेनरूपेणेमंलोकमाभवती३ तद्यदेतत्स्त्रियांलोहितंभ
वत्यग्नेस्तद्रूपंतस्मात्तस्मान्नबीभत्सेताथयदेतत्पुरुषेरेतोभवत्यादित्यस्यतद्रूपंतस्मात्तस्मान्नबीभत्सेत

रंच । केनरूपेणेमंलोकंपृथिवीसंस्थंस्वस्त्रीरूपमाभवति संव्रजति । तेनरमतइतियावत् । अत्रकेनरूपेणेत्यस्ययद
यंभगवान् । दिविष्ठंवाभूमिष्ठंवास्त्रीरूपंगच्छतितच्चकेनरूपेण । उभयोर्मेलकंरूपंकिमित्यभिप्रायांतरमपिद्रष्टव्यं । अन्य
थापरिहारवाक्येतन्निरूपणासंगतेः । इतिस्वशिष्यैःपृष्टोभगवान् । उत्तरमाहेतिशेषः । स्त्रियांस्त्रीशरीरेयदेतल्लोहितं
भवतिवर्ततेतत्अग्नेःअग्निनाम्नोऽग्निष्ठस्यस्त्रीरूपस्यहरेरूपंसन्निधानपात्रं । तस्माद्धरिसन्निधानपात्रत्वात् । तस्माद्भार्यांश ॥ ३८ ॥

रीरगतलोहितान्नबीभत्सेत । नजुगुप्सेत । भर्तेतिशेषः । अथपुरुषेयदेतद्रेतोभवतितदादित्यस्यआदित्यनाम्नःआदित्यस्थस्य पुंरूपस्यहरेःसंनिधानपात्रं । तस्माद्धेतोस्तस्माद्भर्तृशरीरगतरेतसोनबीभत्सेतनजुगुप्सेत । भार्येतिशेषः । उपलक्षणमेतत् । देवस्त्रीलोहितेदेवरेतसि । पृथिव्यांदिविचभगवान् । स्त्रीरूपेणपुंरूपेणचसन्निहितोवर्ततइत्यपिग्राह्यं । एवमुपयुक्तंप्रमेयमुपो द्धातत्वेनोक्त्वा इदानींप्रश्नद्वयंपरिहरति ॥ **सोयमात्मेत्यादिना** । सोयंभूमिष्ठोमहिदासादिप्रादुर्भावादिरूपइमंभूमिष्ठं तथामानुषस्त्रीलोहितगतंचस्त्रीरूपमात्मानंविष्णुं स्वकीयमेवस्त्रीरूपमितियावत् । अमुष्मैदिविष्ठायसूर्यगायदेवरेतसिस्थिता

सोयमात्मेममात्मानममुष्मा आत्मनेसंप्रयच्छत्यसावात्मामुमात्मानमस्मा आत्मनेसंप्रयच्छति तावन्योन्यमभिसंभवतोनेनहरूपेणामुंलोकमभिसंभवत्यमुनारूपेणेमंलोकमाभवति ॥ ७ ॥

यचपुरुषरूपाय । आत्मनेविष्णवे । स्वपुरुषरूपायैवेतियावत् । संप्रयच्छतिददातीत्यर्थः । एतच्चकेनरूपेणेमंलोकमितिद्वि तीयप्रश्नस्योत्तरं । अथप्रथमप्रश्नस्योत्तरमसावात्मेत्यादि । असौसूर्यगतोदिविष्ठविष्ण्वादिपृथग्रूपीचात्माविष्णुरमुंदेवस्त्रीलो हितगतंस्त्रीरूपमात्मानंविष्णुं । स्वीयमेवस्त्रीरूपमितियावत् । अस्मैभूमिष्ठायमहिदासादिरूपिणेमानुषरेतसिस्थितायचा त्मने । संप्रयच्छतीति । अत्रद्वितीयप्रश्नस्यप्रथममुत्तरमुल्बणत्वात् । प्रथमप्रश्नस्यत्वनेनरूपेणेति । उत्तरार्थस्यापिगर्भीकृत त्वेनपरिहारेप्रयासाभावादनंतरमुत्तरमितिज्ञातव्यं । एवंतावात्मानौ । द्युभूमिगतानिविष्णोःपुरुषस्त्रीरूपाणिअन्योन्यमभि

संभवतःमिथोरमंतइत्यर्थः । प्रकारांतरेणापिप्रश्नद्वयस्यक्रमेणोत्तरमाह ॥ अनेनेति । अनेनभूमिष्ठेनमहिदासादिप्रादुर्भाव स्थितपुरुषरूपेणामुंलोकंद्युलोकस्थदेवस्त्रीस्थितंस्वकीयमेवस्त्रीरूपमभिसंभवतिह । तथाअमुनादिविस्थितेनपुमात्मकवामना दिरूपेणेमंलोकंभूलोकस्थितमानुषस्त्रीगतंस्वकीयमेवस्त्रीरूपमाभवतीति ॥ ७ ॥ तत्रसोयमात्मेममात्मानममुष्माआत्मनेसंप्र यच्छतीत्यादिनोक्तेभगवतःस्त्रीपुंरूपैःस्वकीयैरेवरमणरूपेर्थेसवाएषवाचःपरमोविकारइत्यादिनोक्तेसर्वशब्दवाच्यत्वरूपेचार्थे एतेश्लोकाउदाह्रियंतइतिशेषः । यन्नारायणादिरूपेणपंचविधमक्षरंपरंब्रह्मतत् । स्वस्मिन्नेवस्त्रीपुंरूपेणार्धनारीनरात्मकेन ।

तत्रैतेश्लोकाः । यदक्षरंपंचविधंसमेतियुजोयुक्ताअभियत्संवहंति । सत्यस्यसत्यमनुयत्रयुज्यते तत्रदेवाःसर्वएकंभवंति ॥

समेतिसंयुक्तंभवति । पंचविधैर्नारायणादिनामकैःस्वकीयैरेवस्त्रीरूपैःसमेतीतिवा । युजःस्त्रीपुंरूपेणमिथःसंयुक्ताः स्वस्व भार्याभिःसहार्धनारीनरात्मकरूपैःसंयुक्ताश्च । देवाइतिवक्ष्यमाणमत्रापियोज्यं । अश्वरूपेणरथेयुक्ताःसंबद्धाःसंतोयन्नारा यणाख्यंपरंब्रह्म रथारूढंसंवहंति । तदेतत्सत्यस्यसाधुगुणस्यमुख्यप्राणस्य । सत्यंसाधुगुणताप्रदं स्वयमपिनिरवधिकसाधुगु णपूर्णत्वान्मुख्यसत्यंनारायणाख्यंपरंब्रह्मयत्रानुयुज्यते । यस्मिन्स्वरूपएववामदक्षभेदेनार्धनारीनरात्मकेनरूपेणअनुरूपतया युज्यतेतत्रतस्मिन्नेवपरेब्रह्मणिनारायणाख्ये । अथवायस्मिन्देशेऽनुयुज्यतेतत्रदेशे । सर्वेदेवाएवएकंभवंति । एकीभवंतिमुक्ता

स्संतोमिलिताभवंति । अत्यनुकूलचित्ताश्चभवंति । नतत्रमुनिगंधर्वाद्याःव्रजंति ॥ ८ ॥ यस्मादक्षरान्नारायणाख्यात्स्वयमेव प्रादुर्भावात्मकंब्रह्मरूपमक्षरंस्त्रीपुंरूपेणयुक्तंसत्एतिबहिरागच्छति । यच्चयुजोयुक्ताःअभिसंवहंति । तदेतत्सत्यस्यसत्यंयत्रानु युज्यतेतत्रदेवाःसर्वएकंभवंतीतिपूर्ववदेवव्याख्यानं । तात्पर्यद्योतनायोक्तस्यैवार्थस्यपुनरभ्यासः ॥ ८ ॥ एवंस्त्रीपुंसरूपिणो भगवतःस्वरमणप्रकारमुक्त्वाऽथसर्वशब्दवाच्यत्वमप्याह ॥ यदिति । वाचोवाक्समूहस्यमध्येयदोमितिपदं । अंगीकार वाचीतियावत् । यच्चनेतिपदंप्रतिषेधार्थं । यच्चास्यावाचोमध्येक्रूरमर्थतःकठिणं । यच्चोल्बणिष्णु शब्दतःकठिनं । उपलक्षण

यदक्षरादक्षरमेतियुक्तंयुजोयुक्ताअभियत्संवहंति । सत्यस्यसत्यमनुयत्रयुज्यतेतत्रदेवाःसर्वएकं भवंति ॥ यद्वाचओमितियच्चनेतियच्चास्याःक्रूरंयदुचोल्बणिष्णु । तद्वियूयकवयोऽन्वविंदन्ना मायत्तासमतृप्यंच्छ्रुतेधि ॥ यस्मिन्नामासमतृप्यंच्छ्रुतेधितत्रदेवाःसर्वयुजोभवंति । तेनपाप्मा नमपहत्यब्रह्मणास्वर्गंलोकमप्येतिविद्वान् ॥

मेतत् । मितामितादिभेदेनपंचविधंयावद्वैदिकलौकिकपदजातंतत्सर्वंवियूयविचार्यकवयोदेवाःनामायत्तानामायत्तानिनाम प्रकाश्यतयानामाधीनानि नामार्थभूतानीतियावत् । विष्णुमाहात्म्यादीन्यन्वविंदन्विदितवंतः । तस्मिंश्चज्ञानेश्रृतेपरिप क्वेसति । अनंतरमधिअधिकंसमतृप्यन्कृतकृत्याःमुक्ताअभूवन्नितियावत् ॥ ८ ॥ यस्मिन्विष्णौनामानिनामार्थभूतानिगु णकर्मादीनिचज्ञात्वातस्मिन्ज्ञानेअधिश्रृतेपरिपक्वेसमतृप्यन्तत्रतस्मिन्विष्णावेवदेवाःसर्वयुजःसर्वैर्मनोवाक्कायकर्मभिर्युक्ताः

भवंति । तात्पर्यद्योतनायैवंवेत्तुःफलमाह ॥ तेनेति । विद्वान्एवंजानन् । तेनब्रह्मणातत्प्रसादेनपाप्मानमप्रारब्धमपहत्य क्षपयित्वास्वर्गलोकंवैकुंठादिस्थानमप्येतिप्राप्नोतीत्यर्थः ॥ ७ ॥ यदक्षरंसमेतिसत्यस्यसत्यमनुयत्रयुज्यतइतियद्भगवतःस्त्रीपुंसरूपद्वयमस्तीत्यभिप्रेतंतदिदानींस्पष्टमुपपादयति॥ नैनमिति । एनंविष्णुंवाचास्त्रियंकेवलंस्त्रीरूपं । ब्रुवन्ब्रुवणोनवदति । तथाएनंपुमांसंकेवलंपुरुषरूपमेवब्रुवन्नपिनवदति । एनमस्त्रीपुमान्ब्रुवन्अस्त्रीपुमांसंब्रुवन् । स्त्रीरूपःपुंरूपश्चनभवत्येवायमिति ब्रुवाणोपिनवदति । विष्णोरुभयरूपयोरपिसत्त्वादितिभावः ।अतएवकश्चनैनंस्त्रियंपुमांसंवावदन्वदतिचेत्सवदत्येव। यथार्थवाद्येवेतियावत् । अथवाएनंस्त्रियंपुमांसंचब्रुवन्नवदतीतिवचनंलोकस्त्रीपुंसविलक्षणत्वाभिप्रायेण । एनमस्त्रीपुमानितिब्रुवन्न

नैनंवाचास्त्रियंब्रुवन्नैनमस्त्रीपुमान्ब्रुवन् । पुमांसन्नब्रुवन्नेनंवदन्वदतिकश्चन ॥

अःइतिब्रह्मतत्रागतमहमिति तद्वाइदंबृहतीसहस्रंसंपन्नं तस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्य

पिनवदतीत्येतदुभयरूपसद्भावाभिप्रायेणेतिज्ञेयं ॥ ७ ॥ एवंसर्वेशब्दाभगवद्वाचकाइत्युक्त्वाऽकारोविशेषतोनारायणस्यवाचकइत्याह॥ अःइतिब्रह्मेति । अःइत्यकारेणब्रह्मपूर्णवस्तूच्यते। तत्रअकारस्यपूर्णवाचित्वेसिद्धेअहमेवसोकारवाच्यइत्यागतंसिद्धं । ममैकस्यैवपरिपूर्णत्वात् । अन्येषांसर्वेषांमदधीनत्वेनाल्पत्वादित्याहमहिदासरूपोभगवान्नारायणः । एवमोंकारोबृहतीसहस्रंचाकारानंतरंविष्णोरेवविशेषवाचकमित्यप्यत्रद्रष्टव्यं । अतएवबृहतीसहस्रविषयविद्यांतरोपदेशार्थंपुनस्तत्परामृश्यारभ्यते ॥ तद्वाइति । तस्यवाएतस्यबृहतीसहस्रस्यसंपन्नस्यषट्त्रिंशतमक्षराणांसहस्राणिभवंति । पुरुषायुषोह्वांस

हस्राण्यपितावंत्येवभवंति । अतएवाहरभिमानिसूर्यरूपेषुस्थितानामहर्नामकानांपुमाकाराणांभगवद्रूपाणांसहस्राण्यपितावं त्येवषट्त्रिंशदेवभवंति । एवंस्थितेकदाचिल्लीलयाभगवान्तानिस्त्रीरूपाण्येवपुमाकाराणिविधायसूर्यगताहर्नामकपुंरूपाणिच स्त्रीरूपाणिकृत्वाजीवाक्षरेणैव । बृहत्युक्थशंसितायोजीवस्तत्स्थबृहत्युक्थाक्षरगतेनषट्त्रिंशत्सहस्रसंख्याकेनस्त्रीरूपसमूहेनपु माकारतामापादितेनजीवाहः । जीवाख्यसूर्यगतमहःशब्दवाच्यंतावत्संख्याकंपुरुषरूपजातंसंपादितस्त्र्याकारमाप्नोति । प्रा येणतुजीवाह्वासूर्यगताहर्नामकपुरुषरूपजातेनजीवाक्षरंशंसितृजीवगतबृहत्युक्थवर्णस्थितस्त्रीरूपसमूहमाप्नोति । नतदास्त्री

षट्त्रिंशतमक्षराणांसहस्राणिभवंति तावंतिपुरुषायुषोह्नांसहस्राणिभवंति जीवाक्षरेणैवजी वाहराप्नोति जीवाह्वाजीवाक्षरमित्यनकाममारो थदेवरथस्तस्यवागुद्धिःश्रोत्रेपक्षसीचक्षुषीयु

त्वपुंस्त्वयोर्व्यत्यासः । इत्येवमनकाममारः । अनस्यप्राणस्योत्पत्तिकामःसन्मायांलक्ष्म्यांरमतइत्यनकाममारनामाभगवान् । स्वेच्छयैवस्त्रीपुंरूपैःरमतइतिशेषः । तान्येवस्त्रीरूपाणिपुंरूपाणिचैकीकृत्यद्विरूपःसन् । जीवाक्षरेणजीवाहराप्नोति । जीवाह्वा जीवाक्षरमित्यपिव्याख्येयं । इदानीमुभयत्रैकवचनंमुख्यमेव । प्राक्तुसमुदायापेक्षमितिविशेषः । युजोयुक्ताअभियत्संवहंती त्युक्तमर्थंविशदयति । **अथदेवरथइति** । देवस्यविष्णोर्वायोश्चरथइत्यर्थः । देवैर्निर्मितोरथइतिवा । उच्यतइतिशेषः । सचाध्या

त्मंदेहाख्यः । अधिदैवंरथरूपएव । तत्राध्यात्मंतस्यदेहाख्यरथस्य । वाक्वागभिमानिन्युमा । उद्धिरुद्धारणरज्जुरूपा । चक्षुरादिदेवानामुद्धरणहेतुत्वात् । श्रोत्रेदक्षवामश्रोत्रगतचंद्रतद्भार्ये । पक्षसी पक्षयोःदक्षवामपार्श्वयोःअश्वरूपेणस्थिते । चक्षुषीदक्षवामचक्षुर्गतसूर्यतद्भार्येयुक्ते । पुरतोयोजिताश्वरूपे । मनःमनोभिमानीरुद्रोमनोगतःसंग्रहीतासारथिः । अथाधिदैवेपितस्यरथस्यवाङ्नाम्नीउमा उद्धिर्नागाकाराअश्वोद्धारणरज्जुः । श्रोत्रेचंद्ररोहिण्यौचक्षुषीसूर्यसंज्ञेचपक्षसीयुक्तेपार्श्वतः पुरतश्चयोजितेअश्वरूपे । मनोरुद्रःसारथिरितीमाएवदेवताःबोध्याः । सचासावयंचेतितदयंप्राणोविष्णुर्वायुश्चाधितिष्ठति ।

क्तेमनःसंग्रहीतातदयंप्राणोधितिष्ठति तदुक्तमृषिणा ऽऽतेनयातंमनसोजवीयसा निमिषश्चिज्जवीयसेतिजवीयसेति ॥ ८ ॥ इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेतृतीयोऽध्यायः ॥ २ ॥ ३ ॥

उभयविधंरथमितिशेषः । अथवातदितिभिन्नंपदंद्वितीयांतं । तत्रथतयोक्तंशरीरमित्यध्यात्मं । लिंगव्यत्ययेनतंरथमित्यधिदैवं । उभयत्रापिलिंगव्यत्ययेनरथस्यैवसामान्यतःपरामर्शोवा । अयंप्राणोधितिष्ठतीत्यर्थः । अत्रमंत्रौप्रमाणत्वेनोदाहरिष्यन्नाह ॥ तदुक्तमिति । तत्विष्णुवाय्वोरुभयविधरथाधिष्ठातृत्वमृषिणासर्वज्ञेनअतएवसकलवेदानांप्रथमद्रष्ट्राभगवताहयग्रीवेणमंत्ररूपेणोक्तमित्यर्थः । मंत्रावुदाहरति ॥ आतेनेति । प्रतीकमात्रोपादानमिदं । तेनसमग्रौमंत्रौग्राह्यौ । आतेनयातंमनसोजवीयसारथंयंवामृभवश्चक्रुरश्विना । यस्ययोगेदुहिताजायतेदिवउभेअहनीसुदिनेविवस्वतः । निमिषश्चिज्जवीयसा

रथेनायातमश्विना । अंतिषद्भूतुवामवइति । तत्राद्यमंत्रस्यायमर्थः। हेअश्विनाअश्विनौअश्वमुखौआशुगतीवा । विष्णुवायू । मनसोजवीयसा पटुनेतियावत् । तेनशरीराख्येनरथेनायातं । शरीरेसन्निहितौभवतमितियावत् । यंरथंवांयुवयोरर्थमेवऋभवोदेवाश्चक्रुर्निर्मितवंतः। यस्यरथस्ययोगेभगवद्विषयकमनोवाक्कर्मभिःसंबंधेसम्यग्जातेसतिविवस्वतो विविधंवासवतःतत्तदाकारेणसर्वत्रव्याप्तस्यभगवतः । तत्प्रसादेनेतियावत् । जीवस्यदिवोदुहिताअर्थप्रकाशकत्वात्द्यौर्विद्या तदुत्पन्नाविष्णुतत्त्वापरोक्षदृशिर्जायते । सुखदातृत्वाच्छोभनदिनरूपत्वाच्चसुदिनेउभेअहनी । जीवन्मुक्तिमुक्त्यवस्थारूपेचजायेते । साध्येभवतइत्यध्यात्मं । अधिदैवेतुमनसोजवीयसाअतिवेगवतातेनरथेनास्मद्यज्ञंप्रत्यायातं । यंरथंवामर्थेऋभवश्चक्रुः । यस्यरथस्ययोगेभगवतासंबंधेजायमानेसतितस्मिन्नेवरथेदिवोदुहिता । द्यौःसर्वस्त्रीणामुत्तमामहालक्ष्मीस्तत्पुत्रीभारती । तथासुदिनेउभेअहनीजीवन्मुक्तिमुक्त्यवस्थादैवते । अहेयत्वाज्ज्ञानरूपत्वाच्चाहःशब्दवाच्ये । लक्ष्म्यपत्यभूतेवायुरूपेच । विवस्वतोभगवतःसकाशाज्जायंते । रथारूढाभ्यांलक्ष्मीनारायणाभ्यांभारतीप्राणौजायेतेइतियावदिति । अयंचसृष्टिविशेषइतिबोध्यं । निमिषश्चिज्जवीयसा चक्षुर्निमेषणादपिअतिवेगवतापटुनारथेनायातं । अवोऽवनंरक्षणं वांयुवयो रंतिषत् । अंतिकेसमीपएवस्थितंनतुदूरतः । मम भूतु भवतु । यथादासानांराजसमीपइतिद्वितीयमंत्रार्थः । इतिऋषिणोक्तमितिपूर्वेणान्वयः । जवीयसेत्यध्यायांतेद्विर्वचनप्रयोजनंतुप्रागुक्तमेवानुसंधेयं ॥ ८ ॥ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमन्महैतरेयोपनिषद्भावप्रदीपेद्वितीयारण्यकेतृतीयोध्यायः ॥ २ ॥ ३ ॥ ॥ पूर्णोन्मीलद्गुणात्मानंस्वतंत्रंविश्वभावनं । नारायणमहंवंदेमरुद्ब्रह्मा

दिकामदं ॥ १ ॥ आत्मा नित्याततगुणत्वादात्मशब्दवाच्योविष्णुरेकएवेदमस्यजगतोग्रेप्रलयकालेआसीत् । रमायास्तदानीं सत्त्वेनब्रह्माद्यपेक्षयैवेयमुक्तिः । अथवाइदंरमाब्रह्मादिकंसर्वमपेक्ष्यआत्माविष्णुरेकएवकालतोगुणतश्चाग्रेपुरःसरःश्रेष्ठआसीदित्यर्थः । अत्ररमायाःप्रलयेसत्त्वेपिभगवदधीनतयैवसत्त्वात्स्वातंत्र्येणस्थित्यभावादेवमुक्तिः । गुणाग्र्यत्वंत्वव्याहतमेव । यद्वाइदंरमादिकंसर्वमपेक्ष्यात्मैवाग्रेविष्णुरेवसर्वगुणैरग्र्यआसीदित्येवार्थः । तत्रहेतुर्नान्यदिति । ततोन्यत्किंचनमिषत् स्वातंत्र्येणज्ञानादिगुणैर्भासमानंनासीदित्यर्थः । रमादीनांसत्त्वेपिस्वातंत्र्येणमिषणाभावादेवमुक्तिः । सआत्माभगवानीक्षतऐ

हरिः ॐ ॥ आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्सईक्षतलोकान्नुसृजाइति सइमांल्लोकानसृजतांभोमरीचीर्मरमापोदोंभः परेणदिवंद्यौःप्रतिष्ठांतरिक्षंमरीचयः पृथिवीमरो याअध

क्षतऐच्छत् । किमिति ॥ लोकान्नुसृजाइति । लोकाभिमानित्वेनलोकशब्दवाच्यान्ब्रह्मादिदेवान्तदभिमन्यमानान्सत्यादिजडलोकांश्चाहंसृजै स्रक्ष्यइति । इत्थमीक्षन्सभगवानिमान्वक्ष्यमाणान्लोकानसृजत । केतेलोकाः ॥ अंभोमरीचीःमरमापइति । एतानेवलोकान्विविच्यदर्शयति ॥ अदोंभइत्यादिना । अंविष्णुंबिभर्तीत्यंभः । प्रत्यक्षतएवविष्णुसंचारस्थानमितियावत् । अदःप्रथमोद्दिष्टमंभोद्विविधं । परेणदिवंदिवःपरतोविद्यमानंद्यौश्चेति । दिवःपरतोविद्यमानंचवैकुंठादिस्थानत्रयं महरादिलोकचतुष्टयंचेतिसप्तकंबोध्यं । ननुकथंदिवोविष्णुलोकत्वंयेनांभोनामिकासास्यादित्यतउक्तं ॥ प्रतिष्ठेति ।

प्रतितिष्ठत्यत्रभगवानिति । तथाचदिवोप्यंभस्त्वंयुक्तमितिभावः । ततश्चदिवःपरोवैकुंठादिः । दिवःपरेमहरादयोद्यौःस्वर्ग श्चांभोनामकाइत्यर्थः । अत्रवैकुंठादिलोकसृष्टिकथनंभूदुर्गाभागविवक्षयाव्यक्तिविवक्षयावावगंतव्यं । मरीचीमरीचयशब्द योःपर्यायत्वमभिप्रेत्याह ॥ अंतरिक्षंमरीचयइति । मरीचयोऽयंतेप्रवर्ततेविशेषेणात्रेति । सकारांतोयं । मरीचिशब्दस्या प्ययमेवार्थः । मरीचयोस्मिन्वर्ततइतिमरीचीरितिमत्वर्थीयंतद्धितमुत्पाद्यतस्यलोपोवाच्यः । लक्ष्म्यादिशब्दवदयंशब्दोज्ञा तव्यः । मरंतिक्षिप्रमत्रेतिमरःपृथिवी । याअधस्तात्ब्रह्मांडोत्पत्तेःपूर्वंसृष्टादेवतास्ताआपइत्युच्यंते । एतासांचलोकाभिमानि त्वेनलोकशब्दवाच्यत्वं । एतदपिभाविभावेन । लोकापेक्षयापूर्वमेवसृष्टत्वादासामितिबोध्यं । सपरमात्मापुनरेवमीक्षत ऐ

स्ताात्ताआपः सईक्षतेमेनुलोकालोकपालान्नुसृजाइति सोद्भ्यएवपुरुषंसमुद्धृत्यामूर्च्छयत्तमभ्यतप

क्षत । किमिति । इमेनुलोकाःयइमेमयासृष्टाएतेलोकाहि । अथइतःपरंलोकपालान्नुसृजाइति । यद्यपिप्राक्सृष्टाअप्शब्द वाच्यादेवाएवलोकपालानततोतिरिक्ताः । तथापिब्रह्मांडांतः । पुनःप्रजातरूपांतरविवक्षयेयमुक्तिः । सएवमीक्षन्भगवान्अ द्भ्यएवयाःपूर्वंसृष्टाअप्शब्दवाच्यामहदादितत्वाभिमानिन्योब्रह्मादिदेवतास्ताभ्यएवपुरुषंपुरुषनामानंब्रह्माणं । समुद्धृत्यरुद्रा द्यंशैःसहांशतःपृथक्कृत्य तथामहदादितत्त्वात्मकतत्तदचेतनभागानप्युद्धृत्यामूर्च्छयत्मूर्तमकरोत् । चेतनाचेतनात्मकमेकस्थं राशिंविदधे । ब्रह्मांडमुत्पादयामासेतियावत् । तंचब्रह्मांडरूपंब्रह्माणंअभ्यपतत् । मुखाद्यंगानियथानिर्भिद्येरंस्तथापरिणतं

चकार । एवंभगवताभितप्तस्यब्रह्मणःप्रथमंमुखंनिरभिद्यत । अत्रमुखशब्देनांडाकारंनिरवयवंशिरोभिधमंगंग्राह्यमितिभावे
नाह ॥ यथांडमिति । ततश्चतस्मिन्मुखमास्यंनिरभिद्यतेत्यावृत्त्यायोज्यं । तस्माच्चमुखात्वाक्वाङ्नामावह्निरभूत् । वाचः
वागुत्पत्त्यनंतरमग्निरग्निनामकंतस्यैवरूपांतरमुत्पन्नं । अत्रप्रथममध्यात्मरूपंद्वितीयमधिदैवमितिबोध्यं । एवमुत्तरत्रापि ।
प्राणोवायुरितिप्रधानवायुसुतोमरुदुच्यते । दिशोदिग्देवताःमित्रधर्मवरुणकुबेराः। लोमानिओषधिवनस्पतयश्चेतिद्विविधाःपा

त्तस्याभितप्तस्यमुखंनिरभिद्यतयथांडं मुखाद्वाग्वाचोग्नि र्नासिकेनिरभिद्येतांनासिकाभ्यां
प्राणःप्राणाद्वायु रक्षिणीनिरभिद्येतामक्षीभ्यांचक्षुश्चक्षुषआदित्यः कर्णौनिरभिद्येतांकर्णाभ्यां
श्रोत्रंश्रोत्राद्दिश स्त्वङ्निरभिद्यतत्वचोलोमानिलोमभ्यओषधिवनस्पतयोहृदयंनिरभिद्यतहृद
यान्मनोमनसश्चंद्रमा नाभिर्निरभिद्यतनाभ्याअपानोपानान्मृत्युः शिश्नंनिरभिद्यतशिश्नाद्रे
तोरेतसआपः ॥ १ ॥

रिजातादिदेवताःब्रह्मणस्त्वगुद्भवाः । हृदयान्मनःमनोभिमानीतन्नामाचंद्रः । उपलक्षणमेतत् । बुद्ध्यभिमानिनोबुद्धिनामानो
गरुडशेषशिवाश्चेत्यपिग्राह्यं । एवंहस्तौनिरभिद्येतां । हस्ताभ्यांद्विविधःशक्रः । पादौनिरभिद्येतां । पादाभ्यांद्विविधःशक्रसूनु
र्यज्ञः। पायुर्निरभिद्यत पायोर्निर्ऋतिर्यमश्चजातावित्यप्युपलक्षणीयं । एवमेवजिह्वानिरभिद्यतजिह्वायारसनंरसनाद्वरुणइतिद्वि

विधोवरुणोप्युपलक्षणीयः। अपानोमृत्युरितिद्विविधःप्रधानवायुरेव। रेतआपइतिद्विरूपःशिवएवेतिबोध्यं ॥१॥ ताएतादेव
तावह्न्याद्याःब्रह्मदेहतःसृष्टाःसर्वाअपिरूपद्वयेन। देवताइत्यावर्तनीयं । दीव्यतिरत्रस्तुत्यर्थः। परमात्मानंस्तुवंत्यः। पुनर्देव
ताइत्यावर्तनीयं । दीव्यतिरत्रद्युत्यर्थः । दिव्यांबरकुंडलादिभिर्द्योतमानाएवास्मिन्महत्यर्णवेगर्भोदकेशुद्धोदसमुद्रेवाप्रापत
न्प्राविशन् । तदासविष्णुस्तेषामन्नसर्जनायान्नाकांक्षाजननार्थं । तंदेवसमूहमशनापिपासाभ्यांतदभिमानित्वादिनातन्नामका
भ्यांवायुरूपाभ्यामन्ववार्जत् संयोजयामास । ततश्चतदभिमन्यमानभोक्तृत्वशक्त्यायोजयामास । एवंभगवताऽशनापिपासा

ताएतादेवताःसृष्टाअस्मिन्महत्यर्णवेप्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ताएनमब्रुवन्नायत
नन्नःप्रजानीहियस्मिन्प्रतिष्ठिताअन्नमदामेति ताभ्योगामानयत्ताअब्रुवन्नवैनोयमलमिति ता
भ्योश्वमानयत्ताअब्रुवन्नवैनोयमलमिति ताभ्यःपुरुषमानयत्ताअब्रुवन्त्सुकृतंबतेति पुरुषोवाव

भ्यांसंयोजितास्तादेवताःएनंविष्णुमब्रुवन् । किमिति । वयंयस्मिन्प्रतिष्ठिताअन्नमदामतादृशमायतनंभोगोपयोगिशरीरंनोऽ
स्माकंप्रजानीहिप्रकर्षेणानुजानीहि। देहीतियावत्। इति। सर्वशरीरेष्वपिपुरुषाकारशरीरस्यैवविशेषतोभोगायतनत्वज्ञापनाय
प्रथमतस्ताभ्योदेवताभ्योगामानयत्। गोरूपंब्रह्माणंददौ । तदातत्रदेवताःप्रविश्यनोस्माकमयंगवाकारोब्रह्मदेहोनालं। भोगा
नुभवायपर्याप्तंनेत्यब्रुवन् । ततस्ताभ्योश्वमश्वाकारंब्रह्माणमानयत् तदाताअब्रुवन् । नवैनोयमलमिति । ततस्ताभ्यःपुरुषंपूर्व
सृष्टं ब्रह्मणःपुरुषाकारशरीरंआनयत् । तदाताअब्रुवन् । इदंशरीरंसुकृतंसुष्ठुअलंअस्माकंभोगानुभवायसम्यगेवपर्याप्तंबतेति।

बतहर्षे। अतइदानीमपिजीवानांसर्वशरीरापेक्षयापुरुषःपुरुषाकारशरीरमेवहिसुकृतं। सुष्ठुभोगायपर्याप्तंभवति। अथभगवान्। तादेवताअब्रवीत्। इमंब्रह्मदेहं। यथायतनं। युष्मदुत्पत्तिस्थानानुसारेणप्रविशतेति। एवंभगवदाज्ञानंतरं। अधिदैवमग्निरग्निनामावह्निरध्यात्मंवाङ्नामकोभूत्वामुखमास्यंप्राविशत्। एवमुत्तरत्रापि। एवंसर्वदेवताप्रवेशानंतरं। तंविष्णुंअशनापि

सुकृतं ताअब्रवीद्यथायतनंप्रविशतेत्यग्निर्वाग्भूत्वामुखंप्राविशद्वायुःप्राणोभूत्वानासिकेप्राविशदादित्यश्चक्षुर्भूत्वाक्षिणीप्राविशद्दिशःश्रोत्रंभूत्वाकर्णौप्राविशन्नोषधिवनस्पतयोलोमानिभूत्वात्वचंप्राविशंश्चंद्रमामनोभूत्वाहृदयंप्राविशन्मृत्युरपानोभूत्वानाभिंप्राविशदापोरेतोभूत्वाशिश्नंप्राविशंस्तमशनापिपासेअब्रूतामावाभ्यामभिप्रजानीहीतितेअब्रवीदेतास्वेववांदेवतास्वाभजाम्येतासुभागिन्यौकरोमीतितस्माद्यस्यैकस्यैचदेवतायैहविर्गृह्यतेभागिन्यावेवास्यामशनापिपासेभवतः॥ २॥

पासेअब्रूतां। अशनापिपासाभिमानीद्विरूपोवायुरब्रवीत्। आवाभ्यामभिप्रजानीहीति। आवांयथानित्यंत्वच्छासनानुगौभवावतथासम्यगेवाज्ञापयेति। तेअशनापिपासाभिमानिनीवायुरूपेप्रतिविष्णुरब्रवीत्। किमिति। एतास्वेववह्न्यादिदेवतासु। वांयुवांआभजामिसमंताद्भाजयामिप्रवेशयामि। ततश्चैतास्वेववांभागिन्यौतत्तद्देवताभागभुजौकरोमीति। तस्मादेवं

भगवतासंकल्पितत्वाद्यस्यैकस्यैचदेवतायैयज्ञादिषुहविर्गृह्यतेदीयतेचेत्तर्हिअस्यांदेवतायामशनापिपासेभागिन्यौभवतः । द्वि रूपोवायुःसर्वदेवताभागभुगितियावत् ॥ २ ॥ अथसभगवान् । ईक्षत ऐच्छत् । एतावत्पर्यंतंमयासृष्टाइमएव । केते ॥ लो काश्चलोकपालाश्चेति । इदानीमेभ्योलोकपालेभ्योदेवेभ्योन्नंसृजाइति । एवमीक्षन् । अपःअबाख्याःपूर्वसृष्टाःमहदादि तत्त्वाभिमानिनीर्ब्रह्मादिदेवताः अभ्यतपत्अभ्यपश्यत् । सुविशालाभ्यांनेत्राभ्यांददर्शेत्यर्थः । एवंभगवताभितप्ताभ्योदृष्टा भ्यस्ताभ्योदेवताभ्योमूर्तिरजायत । तासांसर्वासामपिदेहैकदेशेभ्योमिलितंविरिंचादिसर्वदेवताधिष्ठितमेकंशरीरंपृथग्जातमि

सईक्षतेमेनुलोकाश्चलोकपालाश्चान्नमेभ्यःसृजाइतिसोपोभ्यतपत्ताभ्योभितप्ताभ्योमूर्तिरजायत
यावैसामूर्तिरजायतान्नंवैत त्तदेनत्सृष्टंपराङत्यजिघांसत्तद्वाचाजिघृक्षत्तन्नाशक्नोद्वाचाग्रहीतुं

त्यर्थः । नन्वन्नंसृजाइतिसंकल्प्यमूर्तिसृष्टिरनुपपन्नेतितत्राह ॥ यावाइति । साप्रसिद्धायावैमूर्तिरजायततत्अन्नंवै । साअन्नरूपैवेत्यर्थः । तदेनत्तदेतत्सृष्टमन्नरूपंशरीरं । अन्नमूर्त्यात्मकोब्रह्मेतियावत् । पराङ्अत्यजिघांसत् । भोक्तृ देवतागणंदृष्ट्वामामिमाअदंतीतिभयादिवक्रीडयैवताअतिक्रम्यकिंचिदपाक्रामत् । हनहिंसागत्योरितिधातोःस्वार्थेसन्नंता ल्लङिरूपमेतत् । एवमन्नात्मकेरूपेऽपक्रांतेसतिभोक्तृरूपीचतुर्मुखः । सर्वेदेवावायुप्रसादमंतराऽन्नभोजनेऽशक्ताएववायुरे कएवशक्तइतिजानन्नपितारतम्यप्रकाशनायलीलयैवतदन्नाख्यंरूपं । वाचावागभिमानिवह्निदेवतारूपकरणेनाजिघृक्षत् ।

ग्रहीतुमत्तुमैच्छत् । जिघृक्षावानिवप्रयत्नवानभूदितियावत् । तदन्नरूपंवाचाग्रहीतुमत्तुंनाशक्नोत् । अशक्तइवाभवत् ।
कथमशक्तिरस्यज्ञायतइत्यतआह ॥ सयदिति । सब्रह्मायद्यदि । एनत्अन्नरूपं । वाचाअग्रहैष्यत् । अत्तुंशक्तिमानभ
विष्यत्तर्हि । अन्नमभिव्याहृत्यैवअन्नशब्दव्याहरणरूपवाग्व्यापारंकृत्वैवात्रप्स्यत्तृप्तिमानभविष्यत् । नचतथातृप्तिमान
भूत् । तेनज्ञायतेवाचाग्रहीतुंनाशक्नोदिति । वाचोभिव्याहरणातिरिक्तव्यापाराभावात् । अन्नग्रहणस्यचतृप्तिफलकत्वा

**सयद्धैनद्वाचाग्रहैष्यदभिव्याहृत्यहैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेनग्रहीतुंसय
द्धैनत्प्राणेनाग्रहैष्यदभिप्राण्यहैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषाग्रहीतुंसयद्धैनच्च
क्षुषाहैष्यद्दृष्ट्वाहैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेणग्रहीतुंसयद्धैनच्छ्रोत्रेणाग्रहै
ष्यच्छ्रुत्वाहैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसयद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वाहैवा
न्नमत्रप्स्यस्यत्तन्मनसाजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहैष्यद्ध्यात्वाहैवान्नमत्र**

द्वाग्व्यापारेकृतेपितृप्तेरजननाद्वाचान्नग्रहणंनसंभवतीतिभावः । एवमुत्तरत्रापिद्रष्टव्यं । अभिप्राण्यआघ्राय । अन्नंश्रुत्वा ॥ ४५ ॥
अन्नवाचकशब्दंश्रुत्वा । अन्नंविसृज्यरेतोरूपेणशिश्नान्निस्सार्य । अथतत्अन्नरूपं ब्रह्मा । अपानेनअपानाख्यप्रधानवा
युना । अजिघृक्षत् अत्तुमैच्छत् । तदाआवयत्अशकत् । धातूनामनेकार्थत्वाद्वयतिरत्रशकनार्थः । तस्मात्यद्वायुः योवायुर
पानाख्यःसैषःसएषोन्नस्यग्रहः । सर्वस्यान्नस्यभोक्ता । यत्योवायुरेषोन्नायुर्वै । अन्नस्यान्नाभिमानिदेवस्यब्रह्मणोप्यायुर्जी
वनहेतुः । अत्रायुरितिबुद्ध्याविविच्यान्येषांसुराणांवायुरेवायुश्श्रेष्टाप्रदः । अयतेर्गत्यर्थत्वात् । ज्ञानप्रदश्च । गत्यर्थस्यज्ञानार्थ
त्वात् । नित्यायूरूपमोक्षप्रदश्चेतिव्याख्येयं । सभगवान् ब्रह्मशरीरेदेवतानांप्रवेशात्पूर्वमेवईक्षतऐक्षत । किमिति । इदंब्रह्मादि
देवजातंमद्दतेकथंनुस्वस्वकार्यंकर्तुंसमर्थंस्यात्नकथमपि । अतोस्यप्रवृत्त्यर्थंब्रह्मशरीरेमयाप्रवेष्टव्यमेवेति । पुनःसईक्षत । कत

**प्स्यत्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेनग्रहीतुंसयद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्यहैवान्नमत्रप्स्य
त्तदपानेनाजिघृक्षत्तदावयत्सैषोन्नस्यग्रहोयद्वायुरन्नायुर्वाएषयद्वायुः सईक्षतकथन्विदंमद्दतेस्या
दिति सईक्षतकतरेणप्रपद्याइति सईक्षतयदिवाचाभिव्याहृतंयदिप्राणेनाभिप्राणितंयदिचक्षु
षाद्दष्टंयदिश्रोत्रेणश्रुतंयदित्वचास्पृष्टंयदिमनसाध्यातंयद्यपानेनाभ्यपानितंयदिशिश्नेनविसृष्ट**

रेणमार्गेणेदंशरीरंप्रपद्यैप्राप्नुयामिति । पुनःसईक्षत । मद्दतइत्यत्राप्यनुवर्तनीयं । यदिवागादींद्रियदैवतैर्मांविनास्वातंत्र्येणैवा
भिव्याहरणादिकंस्वस्वकर्मकृतंस्यात् । अथतर्हिकोहमिति । अहंविष्णुशब्दवाच्यःकःकथंभवेयं । विशेषेणसर्वचेष्टकत्वाद्वि
शिष्टबलवत्त्वाच्चममविष्णवभिधा साममनस्यादितिभावः । इत्यैक्षतेतिपूर्वेणान्वयः । एवमालोच्यसभगवान्वासुदेवरूपेण
एतमेवमस्तकसीमानं विदार्यैतयाद्वारासुषुम्नाख्यमूर्धन्यनाडीद्वाराप्रापद्यत प्रविवेश । अतएवसैषाद्वाःद्वारंविद्दतिर्नाम । विदा

रितत्वाद्विदृतिनामकमित्यर्थः । तस्यनामांतरमप्याह ॥ तदेतन्नांदनमिति । पूर्णानंदस्वरूपत्वान्नंदनोभगवान् । तत्संबं
धित्वात्तदेतन्नाडीद्वारंनांदनमित्युच्यते । तस्यभगवतएवपुनस्त्रयआवसथाःस्थानानि । अयमक्षिरूपआवसथएकः । अयंकं
ठरूपआवसथएकः । अयंहृदयरूपआवसथएकइत्येवंत्रयइत्यर्थः । एतएवत्रयआवसथाःस्वप्नाइत्यप्युच्यंते । स्वयंविष्णु
राप्नोतिजीवरूपंजाग्रदाद्यवस्थाप्रेरणायात्रेति । अनिरुद्धप्रद्युम्नसंकर्षणाख्यरूपत्रयंक्रमेणस्थानत्रयेस्थितमितिबोध्यं । सभ

मथकोहमिति सएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतसैषाविदृतिर्नामद्वास्तदेतन्नांदनं तस्य
त्रयआवसथास्त्रयःस्वप्नाअयमावसथोयमावसथोयमावसथइतिसजातोभूतान्यभिव्यैख्यत्कि
मिहान्यंवावदिषदितिसएतमेवपुरुषंब्रह्मततमपश्यदिदमदर्शमितीँ ३ तस्मादिदंद्रोनामेदंद्रो

गवान्जातोमत्स्यादिरूपेणप्रादुर्भूतःसन्नपिभूतानिसर्वप्राणिनोऽभिव्यैख्यत् । अभितःसर्वकालेषुविशेषेणपश्यत्येव । मू
लावतारयोर्ज्ञानादिसर्वगुणैर्निर्विशेषत्वात् । अत्रअभिव्यैख्यदित्यनंतरं प्राविशदित्यपिग्राह्यं । तत्रचैवमन्वयः । सविष्णुर्जा
तोमत्स्यादिरूपेणभुविप्रादुर्भूतस्तथारूपांतरेणभूतानिसमस्तप्राणिजातानिप्राविशच्चेति । कुतइत्यतआह ॥ किमिहेति ।
इहजगतिमत्तोन्यमसुरनिहंतारंज्ञानादिगुणप्रदंचवावदिषत्किंवदेत्किं । नवदत्येव । विद्वज्जनइतिशेषः । तथेहभूतेषुमत्तो ॥ ४६ ॥
न्यंचेष्टाप्रदंवदेत्किं । नवदत्येवेतिमत्वा । दैत्यनिग्रहणेच्छयाज्ञानदानार्थंचमत्स्यादिरूपेणजातः । भूतानिचप्रेरणेच्छयाप्रा

विशच्चेतिपूर्वेणान्वयः । सएषभगवानेतमेवपुरुषंव्यासकृष्णकपिलराघवादिरूपं । ततमंपरिपूर्णतमंब्रह्मापश्यत् । अत्राभिव्यै ख्यदित्यतोऽभिशब्दोनुषज्जते । तथाचाहमेवस्वतंत्रःपूर्णगुणइतिकृष्णराघवादिसर्वावताररूपोपिसर्वदानुभवत्येवेत्यर्थः । अतएवभगवतइंद्रइतिनामेतिभावेनतन्निरुच्यदर्शयति ॥ इदमिति । इदंमेस्वरूपं । अहंगुणपरिपूर्णत्वादिनासर्वदादर्शमेवे तियतस्तस्मादहमिदंद्रोनामेतिभगवतोमहिदासस्यवाक्यमिदं । रंगस्त्ववधारणे । यस्मादिदंदर्शनादिदंद्रोहवैनामभगवांस्त स्मादुक्तनिर्वचनेनेदंद्रंसंतंविष्णुमिदंद्रइत्यनुक्त्वाइंद्रइत्येवपरोक्षेणास्पष्टतयाऽऽचक्षतेवैदिकाः । कुतः देवाःविष्णवाद्या

इदंद्रोहवैनामतमिदंद्रंसंतमिंद्रइत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवाःपरोक्षप्रियाइवहिदेवाः॥ ३॥
इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेचतुर्थोऽध्यायः ॥ २ ॥ ४ ॥

हियतः परोक्षप्रियाः । दैत्यानांपरोक्षंसम्यगदर्शनमेवप्रियंदेवानां । तेनदैत्यानामधःपतनात् । इंद्रइत्युक्तौप्रसिद्धेंद्रएवाय मितिमिथ्याज्ञानंतेषांजायते । नत्विदंद्रइत्युक्तौ । अतइदंद्रस्यइंद्रत्वेनकथनंश्रुत्यादिषुयुक्तमितिभावः । अपरोक्षदर्शि नितत्वज्ञानिनिदेवाःप्रीतिमेवकुर्वंतीत्यपरोक्षप्रियत्वमपितेषामस्तीतिज्ञापनायेवशब्दः । अध्यायांतेद्विरुक्तिकृत्यंतुप्रागुक्तमे वानुसंधेयं ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमन्महैतरेयोपनिषद्भावप्रदीपेद्वितीयारण्यके चतुर्थोऽध्यायः ॥ २ ॥ ४ ॥

रेतसावनितागर्भेशिशुनागर्भतोबहिः ॥ ततपित्रासहचान्यत्रयउदैत्सोवताद्धरिः ॥ १ ॥ अयंनारायणोदेवःआदितःप्रथमंपुरु
षेगर्भोभवति । अन्नस्थःसन् । पुरुषेणान्नेभुक्तेऽन्नेनसहितस्तंप्रविशतीतियावत् । तस्मिंश्चभुक्तान्नेपरिणतेसतियदेतद्रेतो
जायतेतदेत् पुरुषस्यसर्वांगेभ्यःसंभूतंतेजस्सारस्रूपंतथातद्रेतःस्थितंयदेतद्रेतोनामकंभगवद्रूपंतदेतत्पुरुषस्यसर्वांगेभ्यःसंभूतमा
विर्भूतंतेजएव । तदेतद्रेतसिस्थितमात्मानंस्वरूपंसपुरुषस्थोभगवान् । आत्मन्येवस्वरूपएवबिभर्ति । तच्चरेतःस्थितंरूपंरेतसा
सहस्त्रियांयदापुरुषस्थितोहरिःस्वयमेवसिंचति । अथतदाएनत् एतत् रेतोगतंरूपंजनयति । मातृशरीरेप्रादुर्भावयति । तत्

**हरिःॐ । (अपक्रामंतुगर्भिण्यः) ॥ पुरुषेहवाअयमादितोगर्भोभवति यदेतद्रेतस्तदेतत्सर्वे
भ्योंगेभ्यस्तेजस्संभूतमात्मन्येवात्मानंबिभर्ति तद्यदास्त्रियांसिंचत्यथैनज्जनयतितदस्यप्रथमंज**

स्थानांतरगमनमेवास्यपुंरेतःस्थस्यप्रथमंजन्म । तत् स्वयोनिप्रविष्टंपौरुषंरेतःस्त्रियआत्मभूयमात्मभावंगच्छतिप्राप्नोति । कथं ।
यथास्वमंगंकरचरणादिकंतथा । एवंतत् रेतोगतभगवद्रूपंचस्त्रियआत्मभावंस्त्रीलोहितगतस्वरूपेणैकीभावंसंश्लेषविशेषरूपं
गच्छति । यथास्वमंगंतथा । तस्मात् । एवंरेतोधारणानंतरं । स्वस्यस्वर्गादिपुरुषार्थहेतुभूतपुत्रप्रसवसंभावनाविषयत्वात् ।
एनांभार्यांनहिनस्तिनहिंस्यात् । ताडनादिकंनकुर्यात् । पतिरितिशेषः । अथसास्त्री । अस्यपत्युःसकाशाल्लब्धमत्रगतंस्वग ॥ ४७ ॥
र्भेस्थितंएतमात्मानंपुत्रंभावयतिसंभावयेत् । तथाकृतेचास्यपत्युःसंबंधिनी । अत्रस्वगर्भगतपुत्रेगतंस्थितमेतमात्मानंपरमा

त्मानमेवसाभावयति । ततश्चसापुत्रंपुत्रगतंहरिंचभावयित्रीस्त्री । भावयितव्यासंभावयितव्याभवति । भर्त्रेतिशेषः । स
पिताकुमारंजन्मनोग्रेअधिभावयतीतियत् । तत् पुत्रगतंआत्मानंपरमात्मानमेवभावयति । पुत्रसंभावनमपिपुत्रस्थंविष्णुंसंभा
वयामीतिबुद्ध्याकृतंचेत्तद्विष्णुसंभावनमेवभवतीतियावत् । एतच्चपुत्रस्थविष्णुसंभावनमेषांलोकानांसंतत्यैव्याप्त्यैभवति ।
भावयितुःस्वर्गगतस्यापिपृथिवीलोकेष्वेवावस्थानमिवभवति । सपुरुषोमृत्वास्वर्गेगतोपिनिखिलपुत्रगतपुण्यभाक्त्वात्पृथिव्या

**न्मतस्त्रियाआत्मभूयंगच्छतियथास्वमंगंतथा तस्मादेनांनहिनस्तिसास्यैतमात्मानमत्रगतंभाव
यतिसाभावयित्रीभावयितव्याभवतितंस्त्रीगर्भेबिभर्तिसोग्रएवकुमारंजन्मनोग्रेधिभावयति
सयत्कुमारंजन्मनोग्रेधिभावयत्यात्मानमेवतद्भावयत्येतेषांलोकानांसंतत्याएवंसंतताहीमेलो
कास्तदस्यद्वितीयंजन्म सोस्यायमात्मापुण्येभ्यःकर्मभ्यःप्रतिधीयतेथास्यायमितरआत्माकृतकृ**

मेवजीवन्साधनानुष्ठातायथातथामंतव्यइतियावत् । पृथिवीलोकस्यैकत्वेपिप्रदेशबाहुल्यविवक्षयाएषांलोकानामितिबहुवच
नं । एतच्चनौपचारिकमित्याह ॥ एवमिति । एवंविष्णुबुद्ध्यापुत्रसंभावनेकृतेइमेलोकाःपृथिवीप्रदेशविशेषाएतेनपुंसासंतताः
व्याप्ताह्येवभवंतीत्यर्थः । तदस्यद्वितीयंजन्म अस्यपरमात्मनस्तत् । मातृशरीरात्पृथिव्यांपुत्रगतेनरूपेणप्रादुर्भवनमेवद्वितीयं
जन्म । अथअस्येतितृतीयार्थे । अनेनपरमात्मना । सोयमात्मापुत्रगतोरूपविशेषः । अस्यपितृजीवस्यस्वस्यवार्थे । पुण्येभ्यः

कर्मभ्यः पुण्यकर्मणिकर्तुं । प्रतिधीयतेभूलोकेकतिपयकालंनिधीयते । अथअनंतरमस्यभगवतोऽयमितरआत्मा । पितृगतोरूप विशेषःकृतकृत्योवयोगतः । पितृजीवनिष्ठकृतकृत्यत्वादिनियामकःसन् । पितृजीवेनसहप्रैतिप्रकर्षेणगच्छति । लोकांतरंप्राप्नो ति । जीवशरीरंपरित्यज्यान्यत्रगच्छतीतिवा । सभगवानितोभूलोकात्प्रयन्नेवपुनःपितृजीवेनसहान्यत्रजायते । तदस्यतीतृतीयं जन्म । पितृजीवस्यान्यत्रयदापुनर्जन्मतदातच्छरीरेतेनजीवेनसहप्रादुर्भवनमेवभगवद्रूपस्यतृतीयंजन्मेत्यर्थः । उक्तार्थेमंत्र

त्योवयोगतःप्रैतिसइतःप्रयन्नेवपुनर्जायतेतदस्यतृतीयंजन्म तदुक्तमृषिणा गर्भेनुसन्नन्वेषामवेदम हंदेवानांजनिमानिविश्वा ॥ शतंमापुरआयसीररक्षन्नधःश्येनोजवसानिरदीयमिति गर्भएवैत

संमतिमाह ॥ तदुक्तमिति । तत्जीवस्यजनने । तदंतर्गतस्यभगवतोपिजननंभवतीत्येतत् । ऋषिणामंत्रद्रष्ट्राहयग्रीवरूपेण भगवतोक्तं मंत्रेप्रतिपादितमित्यर्थः । तमेवमंत्रमुदाहरति ॥ गर्भेइति । गर्भेनुगर्भएवसन्वर्तमानोहमेषांदेवानांविष्ण्वादी नां । विश्वाविश्वानिसमस्तानि । जनिमानिजन्मानि । अहमितिक्रियाविशेषणं । दुःखादिहेयरहितत्वेनैव । अन्ववेदंव्य जानं । पुरःपूर्णाः । आयसीरायस्यः । विशेषतोज्ञानिन्यः । शतंशतसंख्याकास्ताएवविष्णवाद्यादेवताःमामांअरक्षन् । अधअथदेवैरक्षितत्वादेव । अहंश्येनःआनंदज्ञानादिपूर्णत्वात्श्योविष्णुःसएवेनःस्वामीयस्यासौतथोक्तःसन् विष्णुंस्वामिनं ज्ञात्वेत्यर्थः । जवसावेगेननिरदीयं । मातुरुदरान्निर्गत्यगर्भमतीतोस्मीत्यर्थः । नपुनर्गर्भवासंप्राप्स्यामीतिनिश्चित्येत्थमुक्तिः । ॥ ४८ ॥

एष्यत्तुनिश्चितंयत्तदतीतत्वेनभण्यतइतिवचनात् । इत्युक्तमितिपूर्वेणान्वयः । एतद्वाक्यंकस्येत्याकांक्षायामाह ॥ गर्भेइति । गर्भएवशयानोवामदेवोनामऋषिरेतदेवमुवाच । एतद्विद्यावेत्तुःफलमाह ॥ सइति । एवंविद्वान्यःसोधिकारीअस्माच्छरीरभेदात्शरीरविशेषात् । चरमदेहादितियावत् । ऊर्ध्वःसन्उत्क्रम्य । ब्रह्मनाड्योत्क्रांतोभूत्वेतियावत् । अमुष्मिन्स्वर्गे

च्छयानोवामदेवएवमुवाचसएवंविद्वानस्माच्छरीरभेदादूर्ध्वउत्क्रम्यामुष्मिन्त्स्वर्गेलोकेसर्वान्कामानाप्त्वाऽमृतःसमभवत्समभवत् ॥ १ ॥ (यथास्थानंगर्भिण्यः) ॥ इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेपंचमोऽध्यायः ॥ २ ॥ ५ ॥

हरिःॐ । कोयमात्मेतिवयमुपास्महेकतरःसआत्मा येनवापश्यतियेनवाशृणोतियेनवागंधाना

लोकेआनंदरूपविष्णुस्थानभूते वैकुंठादावमृतोमुक्तस्सन्योग्यान्सर्वान्कामानाप्त्वास्वीकृत्यतान्समभवत्नित्यमनुभुङ्क्तइत्यर्थः । द्विरुक्तिरुक्तसर्वार्थावधारणार्था ॥ १ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमन्महैतरेयोपनिषद्भाष्यभावप्रदीपेद्वितीयारण्यकेपंचमोध्यायः ॥ २ ॥ ५ ॥

पूर्णानंदतमंसर्वप्रेरकंसर्वनायकं । मोक्षदंभोगदंचैवमुकुंदंभजमेमनः ॥ १ ॥ अयमात्माविष्णुःकःकिंलक्षणकइतिवयमुपास्महेइतिरमादेवीमहिदासमपृच्छदितिशेषः । इतिदेव्यापृष्टःसभगवान्प्राहेतिच । किमिति ॥ कतरःसआत्मेति । सआत्मा

विष्णुःकतरःआनंदतमः । सचपूर्णानंदोस्यआत्मास्वभावएवनत्वागंतुकोधर्मइत्यर्थः । लक्षणांतराण्याह । येनवेत्यादिना ॥ अयंरमाब्रह्मादिचेतनसमुदायोयेनयत्प्रेरणयापश्यतिरूपादिकं । येनवाशृणोतिशब्दान् । येनगंधानाजिघ्रति । येनवाचंलौकिकवैदिकशब्दरूपांव्याकरोति व्याहरति । येनस्वादुचास्वादुचविजानाति । उपलक्षणमेतत् सर्वेंद्रियव्यापारांश्चकरोतीतिग्राह्यं । सआत्मेतिपूर्वेणान्वयः । सर्वदर्शनादिकारणत्वस्यप्रत्येकंलक्षणत्वज्ञापनायसर्वत्रवाशब्दः । एवंविष्णोर्लक्षणान्युक्त्वोपासनार्थंनामान्यप्याह ॥ यदित्यादिना । ज्ञातृत्वाद्यत् । सन्निहितत्वादेतत् । हृद्ययनाद्धृदयं । मंतृत्वान्मनः ।

जिघ्रतियेनवावाचंव्याकरोतियेनवास्वादुचास्वादुचविजानाति यदेतद्धृदयंमनश्चैतत्संज्ञानमाज्ञानंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्मतिर्मनीषाजूतिःस्मृतिःसंकल्पःक्रतुरसुःकामोवशइतिसर्वाण्येवै

गुणोच्चयदातृत्वाच्चः । पूर्णत्वादा । भक्तैरितत्वात्ततत्वाच्चैतत् । सम्यग्ज्ञानस्वरूत्वात्संज्ञानं । आसमंतात्सर्वविषयकज्ञानरूपत्वादाज्ञानं । विविधज्ञानरूपत्वाद्विज्ञानं । प्रकृष्टस्वगुणज्ञानरूपत्वात्प्रज्ञानं । अविस्मृतित्वान्मेधा । दर्शनरूपत्वादृष्टिः । धारणरूपत्वाद्धृतिः । मासुप्रमाणेषुततत्वान्मतिः । मनुनाम्नांब्रह्मादीनामीशोमनीषा । सर्वप्रेरकत्वाज्जूतिः । सर्वदासर्वत्रसर्वरूपेषुसमंरमतइतिस्मृतिः । संसर्वस्यक्लृप्तिरूपत्वात्संकल्पः । सर्वकर्तृत्वात्क्रतुः । दोषाणामसनादसुः । अमितानंदत्वात्कामः । स्वतंत्रत्वादवशः । इत्येतानिसर्वाण्येवत्रयोविंशतिनामानिप्रज्ञानस्यप्रज्ञानरूपस्यभगवतोनामधेयानिभ

वंति । एवंत्रयोविंशतिनामकभगवदुपासकस्याकिंफलमित्यतोंतेवक्ष्यमाणंसएतेनप्रज्ञेनात्मनेतिफलवाक्यमत्रापियोजनीयं । पुनर्लक्षणांतरंवक्तुमाह ॥ एषब्रह्मेत्यादिना । एषब्रह्माएषइंद्रएषप्रजापतिःशिवः । एतेसर्वेदेवाःदक्षादयः । इमानिपंचमहाभूतानि । कानितानि । पृथिवीवायुराकाशआपोज्योतींषीत्येतानि । इमानिचक्षुद्रमिश्राणि । क्षुद्राण्यल्पानिचतानिमिश्राणिपुण्यपापमिश्रितानिचेतितथोक्तानि । इतराणिदेवेभ्योन्यानिचमानुषप्राणिजातानि । इतराणिचदेवमानुषभिन्नान्य

तानिप्रज्ञानस्यनामधेयानिभवंत्येषब्रह्मैषइंद्रएषप्रजापतिरेतेसर्वेदेवाइमानिचपंचमहाभूतानिपृथिवीवायुराकाशआपोज्योतींषीत्येतानीमानिचक्षुद्रमिश्राणीवबीजानीतराणिचेतराणिचांडजानिचजारुजानिचस्वेदजानिचोद्भिज्जानिचाश्वागावःपुरुषाहस्तिनोयत्किंचेदंप्राणिजंगमंचपतत्रिचयच्चस्थावरंसर्वंतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोऽलोकःप्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मसएते

सुरादिप्राणिजातानि । तथांडजानिपक्षिजातानि । जारुजानिजरायुजानिमानुषादीनि । स्वेदजानिमत्कुणादीनि । उद्भिज्जानिवृक्षादीनि । तथादेवादीनांमनआदिजाताअश्वागावःपुरुषाहस्तिनः । यत्किंचेदंप्राणिशिलाकाष्ठादिकं । तथाजंगमंगमनकर्तृ । पतत्रिपतनकर्तृ । यच्चस्थावरंस्थिरंप्राणिजातं । सर्वेषामप्येषांविशेषणं । बीजानीवेति । शाल्यादिबीजवद्भिन्नस्वभावानीत्यर्थः । तदेतत्सर्वंप्रज्ञानेत्रं । प्रज्ञात्मकंब्रह्मनेत्रंनेतृयस्यतत्तथोक्तं । दाम्नीतिसूत्रान्नयतेःष्ट्रन् । प्रज्ञाने प्रज्ञानरू

पेब्रह्मण्येवप्रतिष्ठितं । अलोकः प्राकृतदेहशून्यः । अमुक्तैरनवलोक्योवा । योयंमुक्तसमुदायःसोपिप्रज्ञानेत्रः । ब्रह्मनेतृकएव । प्रज्ञाप्रज्ञारूपंब्रह्म । स्वयंचानन्याश्रयत्वात्प्रतिष्ठाशब्दवाच्यं । प्रज्ञानंप्रज्ञानात्मकोविष्णुरेवदेशतःकालतोगुणतश्चापरिच्छिन्नं । प्रज्ञानेत्रोऽलोकइत्यस्यैवव्याख्यानं ॥ सएतेनेति । ससकलकर्मबंधान्मुक्तोऽलोकशब्दोक्तःपुरुषएतेनप्रज्ञेनप्रकृष्टज्ञानेनआत्मनाविष्णुनाप्रेरितःसन्नेवास्माल्लोकाच्चरमदेहादुत्क्रम्यविष्णुलोकंगत्वाअमुष्मिन्स्वर्गेलोकेवैकुंठादौतेनैवप्रज्ञात्म

नप्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभवत्समभवत्
॥ १ ॥ इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेषष्ठोऽध्यायः ॥ २ ॥ ६ ॥
हरिः ॐ । वाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठितमाविरावीर्मएधिवेदस्यमआणीस्थश्रुतं

नाऽमृतःसन्सर्वान्कामानाप्त्वातेनैवसर्वान्कामान्समभवत्भुंक्तइति ॥ १ ॥ इतिद्वितीयारण्यके षष्ठोध्यायः ॥ २ ॥ ६ ॥ वेदाधारमरुत्संस्थंवागाधारमृतंहरिं । भक्तानुग्राहकंवंदेनित्यंसाधुगुणैस्ततं ॥ १ ॥ मेममवाक्वागिंद्रियंवाणीवा । मनस्यवबोधरूपेविष्णौप्रतिष्ठिता । तद्विषयिण्येवभवतु । मनश्चमनोनामासभगवान्मेममवाचिप्रतिष्ठितमस्तु । वाग्विषयोभवतु । प्रार्थनेप्रकारमात्रभेदोयं । तात्पर्यंत्वेकमेव । आदरातिशयादेवहिपुनःप्रार्थनं । एवंपरोक्षंप्रार्थयित्वाऽपरोक्षंप्रार्थयते । आविरिति । हेभगवन् । मेममत्वमाविरेधिआविर्भव । अपरोक्षविषयोभव । आवीरेधिअतिशयेनाविर्भवच । आविर्भावंच

ग्वधिष्ठानेप्राप्नुहीतिभावेनसंबोधयति ॥ वेदस्येति । मेमदुपास्य । हेवेदस्याणीस्थ । सर्ववेदसमुदायाधारप्राणस्थितविष्णो मेमम । श्रुतमधीतंमाप्रहासीःमात्यज । मदधीतशास्त्रजन्ययथार्थज्ञानविषयएवसर्वदाभव । कदापिविस्मृतोमाभवेत्यर्थः । एतत्प्रार्थनानुकूल्येनैववेदस्यमआणीस्थेतिसंबोधनं । अन्यथाप्राणस्थेत्येवावक्ष्यत् । हेविष्णोअनेनत्वद्विषयेणैवाधीतेनअ होरात्रान्संदधामि । सर्वाहोरात्रेष्वपित्वद्विषयमेवाध्ययनंकुर्यामितियावत् । ऋतंपूर्वावगतवत्सदास्थितंशश्वदेकप्रकारंत्वां वदिष्यामि। शिष्येषुवदेयं । तथासत्यंसाधुगुणैस्ततंसर्वनियंतारंचत्वांवदिष्यामि। वदेयमित्यर्थः । एवमपरोक्षंप्रार्थयित्वापुनः

मेमाप्रहासीरनेनाधीतेनाहोरात्रांत्संदधाम्यृतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुतद्वक्ता रमवत्ववतुमामवतुवक्तारमवतुवक्तारं ॥१॥ इत्यैतरेयोपनिषत्सुद्वितीयारण्यकेसप्तमोऽध्यायः ॥ २ ॥ ७ ॥ इतिद्वितीयारण्यकंसंपूर्णं ॥

परोक्षंप्रार्थयते ॥ तन्मामिति । तद्विष्णवाख्यंब्रह्ममामध्येतारंशिष्यमवतु । वक्तुर्गुरोरभावेऽध्ययनस्यैवाभावापत्तेस्तद्ब्रह्मव क्तारंगुरुमप्यवतु । तात्पर्यातिशयेनपुनरिदमेवप्रार्थयते । अवतुमामवतुवक्तारमिति ॥ १ ॥ इतिश्रीमन्महै.द्वि.प्रघट्टके सप्तमोध्यायः ॥ २ ॥ ७ ॥ इतिद्वितीयारण्यकंसंपूर्णं ॥

विष्णुनामार्थरूपाणांवेदानांसंहितात्मनां । लौकिकानांचशब्दानांमुख्यवाच्यंहरिंभजे ॥ १॥ अथेतिमंगलार्थे । द्वितीयप्रघट्ट
कप्रतिपाद्यनिरूपणानंतर्यार्थेच । विद्यांतरारंभार्थेवा । अतःमहाफलसद्भावात् । संहितायाःविष्णुनामसंहितायास्तद्व्याख्या
नभूतसर्ववैदिकशब्दसंहितायास्तदभिन्नलौकिकशब्दसंहितायाः । उपलक्षणमेतत् । तत्तत्संहितागतसर्ववर्णानांच । उपनिषत्
रहस्यंभगवद्रूपवाचकत्वरूपं । निरूप्यतइतिशेषः । पृथुत्वात्पृथिवीनामकं । पृथिवीस्थितंहरेरूपंपूर्वरूपंपूर्ववर्णदेवता । क्रीडनात्
द्युनामकंद्युस्थितंहरेरूपमुत्तररूपमुत्तरवर्णदेवता । वायुःवेदकत्वादयनत्वाच्चवायुनामकंरूपं संहिता । वर्णयोर्मध्यदेवता ।
पूर्वोत्तरवर्णदेवताभूतरूपद्वयसहितत्वात्संहितानामकंचेतिमांडूकेयोनामऋषिराह । आकाशःआसमंतात्काशनादाकाशना

हरिःॐ । अथातःसंहितायाउपनिषत्पृथिवीपूर्वरूपंद्यौरुत्तररूपंवायुस्संहितेतिमांडूकेय आका
शःसंहितेत्यस्यमाक्षव्योवेदयांचक्रे सहाविपरिह्वतोमेनेनमेस्यपुत्रेणसमगादितिसमानेवैतत्परि

माआकाशस्थोभगवान्संहिता । वर्णयोर्मध्यदेवतेतिमाक्षव्योनामऋषिरस्यवेदयांचक्रे । एनंमांडूकेयंप्रतिबोधयामास । सह
मांडूकेयस्तेनमाक्षव्येणाविपरिह्तोऽपरिह्तोननिराकृतःस्वपक्षइतिमेनेकथंननिराकृतः । मेमदीयेनमदुपासितेनास्याकाश
स्यपुत्रेणवायुनासौमाक्षव्योनसमागात् । संगतोनाभूत् । वायुस्थविष्ण्वनुपासनात् । नहिवायुःसंहितेत्यनुपासनमात्रेणवायुस्थ
स्यसंहितादेवतात्वंतेननिराकृतंभवति इतिहेतोर्नमत्पक्षोऽनेननिराकृतइतिमेनइतिपूर्वेणान्वयः । स्वोक्तंपक्षंपरित्यज्यपक्षांत
रमवलंबमानेनमाक्षव्येणनिराकृतप्रायएवायंपक्षइत्यतआह ॥ **समानेवैतदिति** । तत्तेउपासनेसमानेअविरुद्धेवै । आका

शस्थवायुस्थयोरुभयोरपिरूपयोःसंहितात्वोपपत्तेरितिभावः । प्रकारांतरेणानयोर्मतयोःसाम्यमभिप्रेत्यतत्राकाशसंहितात्वप
क्षएवबलवानितिपूर्वपक्षंतावदागस्त्यमतानुसारेणोत्थापयति ॥ **परिह्वतोमेनइत्यागस्त्यइति** । मांडूकेयपक्षोनेनमाक्ष
व्येणपरिह्तएवेत्यहंमेनेमन्यइत्यागस्त्यआह । एवंमंतुरागस्त्यस्यायमभिसंधिः । आकाशोहिवायोःपिताआकाशाद्वायुरिति
श्रुतेः । पिताचपुत्रादुत्तमः । अतआकाशएवविष्णूपासनमधिकफलंनवायाविति । एवंपूर्वपक्षयित्वाभगवान्स्वसिद्धांत
माह ॥ **समानमिति** । एतत्वायुराकाशश्चेतिद्वयंसमानंह्येवभवति । त्वगिंद्रियदेवतात्वेनाकाशदेवताविनायकोत्पत्तेः

ह्वतोमेनइत्यागस्त्यःसमानंह्येतद्भवतिवायुश्चाकाशश्चेत्यधिदैवतमथाध्यात्मंवाक्पूर्वरूपंमनउत्तर

पूर्वमेववैकारिकाहंकारजातत्वाद्वायोराकाशाद्गुणाधिक्येऽपिभूतकोटौपुनराकाशादेववायोरुत्पन्नत्वादाकाशस्यवायुपितृत्वा
त्तदपेक्षयादशगुणव्याप्त्याधिक्याच्चोभयोरुपासनास्थानत्वेनसाम्यांगीकारोपपत्तेः । अतउभावपिपक्षौग्राह्यावेवेतिभावः ।
इत्यधिदैवतं । संहितायाउपनिषन्निरूपितेतिशेषः । अध्यात्मं । सानिरूप्यतइतिशेषः । वाक्वाचिस्थितंवक्तृत्वाद्वाङ्नामकं
भगवद्रूपं । पूर्वरूपंपूर्ववर्णप्रतिपाद्यं । मंतृत्वान्मनोनामकंमनःस्थितंरूपमुत्तररूपं । उत्तरवर्णप्रतिपाद्यं । प्राणःप्राणनात्प्राण
नामाप्राणस्थितोभगवान्संहितासंधिदेवतेतिशूरवीरोमांडूकेयोमन्यते । अत्रवाक्वागिंद्रियंपूर्वरूपंप्रधानंमनोंतःकरणमुत्त
ररूपमप्रधानमित्यर्थांतरमपिविवक्षितंबोध्यं । अथेतिपक्षांतरे । अस्यशूरवीरमांडूकेयस्यज्येष्ठःपुत्रआह । किमिति । मनः

पूर्वरूपंवागुत्तररूपं । अत्रापिपूर्ववदर्थद्वयंविवक्षितं । तत्रास्तुपूर्वोत्तरवर्णदेवतयोःपूर्वमतव्युत्क्रमः । उभयोरप्युभयदेवतात्वोपपत्तेः। जडयोर्वाङ्मनसयोरिंद्रिययोर्गुणप्रधानभावेपूर्वमतव्यत्यासःकुतइत्यतआह ॥ **मनसेति**। मनसावाअग्रेप्रथमतःसंकल्पयति । अथवाचाव्याहरति । तस्मात्मनएवपूर्वरूपंप्रधानं । वागिंद्रियंचोत्तरमप्रधानमित्यर्थः। संहिताविषयेतुनैवंविप्रतिपत्तिरस्तीत्याह ॥ **प्राणस्त्वेवसंहितेति** । पूर्ववदेवव्याख्यानं । अत्रापिमतद्वयेकिमुभयोःसाम्यमुतैकस्यप्राबल्यमन्यस्यदौर्बल्यमित्यतःस्वयंभगवानाह ॥ **समानमिति**। अत्रप्राणाख्यस्यप्राणस्थितस्यविष्णोःसंहितानामकत्वेपितुश्चपुत्रस्यचे

रूपंप्राणस्संहितेतिशूरवीरोमांडूकेयो थहास्यपुत्रआहज्येष्ठोमनःपूर्वरूपंवागुत्तररूपंमनसावा अग्रेसंकल्पयत्यथवाचाव्याहरतितस्मान्मनएवपूर्वरूपंवागुत्तररूपंप्राणस्त्वेवसंहितेति समान मेनयोरत्रपितुश्चपुत्रस्यचसएषोश्वरथःप्रष्टिवाहनोमनोवाक्प्राणसंहतःसयएवमेतांसंहितांवेद

त्येतयोःसमानंसमानत्वमेव। उभाभ्यामपिप्राणसंहितात्वांगीकारात् । वाङ्मनसयोरन्योन्यपूर्वोत्तररूपत्वविषयेतुपुत्रपक्षएवबलीयान् । मनसावाअग्रेसंकल्पयतीतियुक्तेरुपन्यस्तत्वादितिवाक्यशेषः । अध्यात्मसंहितोपनिषत्कथनप्रसंगाद्देहस्यविष्णुरथत्वमप्यनुसंधेयं।सर्वदाध्यात्मप्रवणेनेत्यभिप्रेत्याह॥ **सएषइति**। अश्वयुक्तश्चासौरथश्चेत्यश्वरथइतिमध्यमपदलोपीसमासः। सएषदेहाख्योरथइंद्रियाख्याश्वयुक्तइत्यर्थः । पृच्छनीयत्वात्प्रष्टिःपरमात्मातस्यवाहनोवाहकः । मनोवाक्प्राणसंहतः मनआ

दिस्थितमनआदिनामकभगवतासंहतःसंबद्धश्चेत्यर्थः। एतद्विद्यावेत्तुःफलमाह॥ सयइति। यउपासकएवमुक्तप्रकारेणैतांसंहि
तांसंहितानामकंभगवंतंवेदसस्वर्गेणलोकेनवैकुंठादिमुक्तिस्थानेनविधीयते। मुक्तोभवतीतियावत्। तत्रप्रजयाप्रकृष्टज्ञानेन।
पशुभिर्वैदैर्यशसा ब्रह्मवर्चसेन। विष्णुप्रसादात्सम्यगुपचायितस्वरूपतेजसाचसंधीयते। सर्वंनित्यमायुश्चेतिप्राप्नोति। लौकि
कप्रजादीच्छुश्चेत्तादृशप्रजादिनापियथायोग्यंसंधीयते। सर्वंपूर्णमायुश्चेतीत्यपिव्याख्येयं। इतिनुएवंहिमांडूकेयानांसंबंधि
न्यस्तदुपासिताःविद्याइतिशेषः॥ १॥ अथमांडूकेयोपासितविद्यानिरूपणानंतरं। शाकल्यस्यशाकल्यसंबंधिनीतदुपा

संधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतीतिनुमांडूकेयानां॥ १॥
अथशाकल्यस्यपृथिवीपूर्वरूपंद्यौरुत्तररूपंवृष्टिःसंधिःपर्जन्यःसंधाता तदुतापियत्रैतद्बलवदनू

सिताविद्यानिरूप्यतइतिशेषः। पृथिवी पृथिवीस्थितंपृथिवीनामकंवासुदेवाख्यंरूपंपूर्वरूपं पूर्ववर्णप्रतिपाद्यं। द्यौस्तन्नाम
कंद्युस्थंसंकर्षणाख्यंरूपमुत्तररूपमुत्तरवर्णप्रतिपाद्यं। वृष्टिः वर्षणाद्वृष्टिनामकंवृष्टिस्थितंप्रद्युम्नाख्यंरूपंसंधिःसंहितादेवता
संधिनोतिसम्यक्पुष्णातिभक्तानितिसंधिनामकंच पर्जन्यःपरसस्यादिजनकत्वात्पर्जन्यनामापर्जन्यस्थोभगवाननिरुद्धःसंधा
तासम्यग्धारणात्संधातृनामकोच्चारयितृपुरुषस्थःस्वयंचसम्यग्धारणात्द्यावापृथिव्योर्वृष्टिरूपसंधानकर्तृत्वाच्चसंधातृनामेत्य
र्थः। वृष्टेःसंधित्वंपर्जन्यस्यसंधातृत्वंचकुतइत्यतोलोकव्यवहारसिद्धत्वादित्याह॥ तदुतापीति। तदुत तच्चवृष्टेःसंधि

त्वंपर्जन्यस्यसंधातृत्वंच अपि संभावितमेव । कुतःयत्रयदा । एततूएषपर्जन्यःबलवद्यथाभवतितथाअनुगृह्णन्अनुकूलतयो च्चैर्गृह्णन्सामुद्रोदकंस्वोदरेस्वीकुर्वन्अहोरात्रेसंदधत् अभिव्याप्यवर्षति । तदाद्यावापृथिव्यौसमधातामिति । उतापिअ द्यापिजनाआहुरित्यर्थः । इतिनुएवंप्रकारेणहिअधिदैवतंनिरूपितं । अथाध्यात्मंनिरूप्यते । अयंसर्वःपुरुषःसमग्रःपुरुषदे हआंदं एकोवयवी । तस्यदेहस्यद्वेविदलेविभागौभवतइत्याहुः । तस्यदेहस्येदमेवअधरार्धमेवपृथिव्यारूपं । पृथिवीप्रतिनि धिरितियावत् । अधोभागस्थितत्वात्पृथिव्याः पृथिवीदेवतायाःप्रतिमारूपंच । इदमुत्तरार्धंदिवः । रूपमितिवर्तते । दि

द्गृह्णन्संदधदहोरात्रेवर्षतिद्यावापृथिव्यौसमधातामित्युताप्याहुरितीन्वधिदैवत मथाध्यात्मंपुरु षोहवाअयंसर्वआदंद्वेविदलेभवतइत्याहुस्तस्येदमेवपृथिव्यारूपमिदंदिवस्तत्रायमंतरेणाकाशोय

वःप्रतिनिधिरितियावत् । ऊर्ध्वभागस्थितत्वात् । दिवोद्युदेवतायाःप्रतिमारूपंच । अत्रवागेववृष्टेः आत्मापर्जन्यस्येत्यपि ग्राह्यं । अस्मिन्नुत्तरार्धेवागेववृष्टेरूपंवृष्टिप्रतिनिधिः । वृष्टिदेवतायाःप्रतिमाच । आत्माउच्चारकजीवः । पर्जन्यस्यरूपंप्र तिनिधिः । प्रतिमाचेत्यर्थः । अत्रपृथिवीद्युवृष्टिपर्जन्यशब्दैर्वासुदेवादिरूपचतुष्टयंचक्रमेणतत्तदंतर्गतंमुख्यतोवाच्यंबो ध्यं । अथदेहस्योक्तंपृथिवीद्युसाम्यंसामस्त्येनोपपादयति ॥ तत्रेति । तत्रदेहेयोयमंतरेणपूर्वोत्तरार्धयोर्मध्येआकाशोवर्त ॥ ५३ ॥
ते । सोयंद्यावापृथिव्यावंतरेण । तयोर्मध्येवर्तमानआकाशोयथातथातत्प्रतिनिधिर्ज्ञेयः । किंचतस्मिन्प्रसिद्धे । अस्मिन्

आकाशे । अंतराकाशेप्राणआयत्तः अधिष्ठितोह । हास्मिन्निति भवितव्येसवर्णदीर्घलोपश्छांदसः । सचप्राणोऽमुष्मिन्ब हिराकाशेयथावायुरायत्तोधिष्ठितस्तथाज्ञेयः । तयोरैक्यात् । वायुस्थितदाशरथिरूपाधिष्ठानत्वाच्च । अपिचअमूनिबहिः स्थितानित्रीणिरूपाणिज्योतींषियथाएवंपुरुषेपुरुषदेहेपिइमानित्रीणिज्योतींषिसंनिहितानि । कान्यमूनित्रीणिज्योतींषिका निचेमानीत्यतोविविच्यदर्शयति ॥ यथेति । यथादिव्यसावादित्यआदित्याख्यंज्योतिरेवंपुरुषदेहेशिरसिइदंचक्षुस्तदाख्यं

थासौद्यावापृथिव्यावन्तरेणाकाशस्तस्मिन्हस्मिन्नाकाशेप्राणआयत्तोयथामुष्मिन्नाकाशेवायुरा यत्तोयथामूनित्रीणिज्योतींष्येवमिमानिपुरुषेत्रीणिज्योतींषियथासौदिव्यादित्यएवमिदंशिर सिचक्षुर्यथासावन्तरिक्षेविद्युदेवमिदमात्मनिहृदयंयथायमग्निःपृथिव्यामेवमिदमुपस्थेरेतएवमु हस्मसर्वलोकमात्मानमनुविधायाहेदमेवपृथिव्यारूपमिदंदिवः सयएवमेतांसंहितांवेदसंधीय तेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति ॥ २ ॥

ज्योतिः । चक्षुषआदित्याधिष्ठानत्वादादित्याधिष्ठातृकपिलाधिष्ठानत्वाच्चतयोःसाम्यंबोध्यं । यथाचांतरिक्षेअसौविद्युत् । एवमात्मनिदेहेइदंहृदयंहृदयाख्यंज्योतिर्ज्ञेयं हृदयस्यविद्युद्देवताधिष्ठानत्वाद्विद्युदधिष्ठातृहंसरूपाधिष्ठानत्वाच्चतयोःसाम्यं । यथापृथिव्यामयमग्निरेवमुपस्थेइदंरेतः रेतआख्यंज्योतिः । रेतसोग्न्यधिष्ठानत्वात्तदधिष्ठातृपरशुरामाधिष्ठानत्वाच्च । एवमु

क्तप्रकारेणसर्वंलोकंलोकत्रयरूपमात्मानंपुरुषदेहमेवअनुविधायअनुसंधाय । आहशाकल्यः । किमिति ॥ इदमेवपृथिव्या
रूपमिदंदिवइति । सयएवमेतामित्यादिपूर्ववदेव ॥ २ ॥ अथअतःमोक्षादिफलसद्भावात् । निर्भुजप्रवादाःसंहितापदक्र
मविषयाःप्रकृष्टवादाः । कथ्यंते । तत्रनिर्भुजंभंजनरहितत्वान्निर्भुजशब्दवाच्यासंहिता । पृथिव्यायतनंपृथिवीस्थितपृ
थिवीनामकवराहदेवताका । प्रतृण्णंपदंदिव्यायतनं । दिविस्थितोद्युनामावामनोहरिरायतनंयस्येतिअलुक्समासः । अथवा
दिव्योद्युस्थितोवामनआयतनंयस्येतिविग्रहः । उभयमंतरेणेतिक्रमनाम । तत्अंतरिक्षायतनं अंतरिक्षस्थितांतरिक्षनामकनृसिं

अथातोनिर्भुजप्रवादाः पृथिव्यायतनंनिर्भुजं दिव्यायतनंप्रतृण्ण मंतरिक्षायतनमुभयमन्तरेणा
थयद्येनंनिर्भुजंब्रुवन्तमुपवदेदच्योष्ठावराभ्यांस्थानाभ्यामित्येनंब्रूयादथयद्येनंप्रतृण्णंब्रुवन्तमुप

हदेवताकं । तस्मादेतज्ज्ञानपूर्वकसंहिताद्यध्ययनकर्तापूज्यएवननिंदनीयइत्युपस्कर्तव्यं । अथेतिपक्षांतरे । यद्येनंनिर्भुजं
ब्रुवंतं । संहितामधीयानंविष्णुभक्तंकश्चिन्मानुषउपवदेत्निंद्यात् । तर्ह्यवराभ्यांपृथिव्यंतरिक्षाभ्यांस्थानाभ्यांअच्योष्ठाः
च्युतोसीत्येनंब्रूयात् । अधीयानइतिशेषः । विष्णुभक्तनिंदाऽसहिष्णुरन्योवा । अथयद्येनंप्रतृण्णंपदंब्रुवंतमुपवदेत्तर्ह्युत्तरा
भ्यांस्थानाभ्यामंतरिक्षद्युभ्यामच्योष्टाइत्येनंनिंदकंब्रूयात् यस्तूभयमंतरेणाहक्रममधीतेतस्योपवादोनास्त्येव । तन्निंदनस्यन ॥ ५४ ॥
रकाद्यनर्थहेतुत्वादतिदुष्टत्वेनसर्वथातन्निंदनंनकुर्यादितिभावः । ज्ञानपूर्वकंविष्णुनामोच्चारणादेवसमस्तवैदिकसंहिताध्ययन

फलंलभ्यतइत्याशयेनाह ॥ यद्वीति । विष्णुनाम्नियद्यदिसंधिंषणयोर्मेलनंविवर्तयतिविशेषेणवर्तयति । तत्तर्हितदेवनिर्भुजस्यरूपंसमस्तवैदिकसंहितारूपं । तदध्ययनफलप्रदमितियावत् । अथयद्यदितत्रवीत्यनंतरंशुद्धेअमिलितेअक्षरेषणुरितिवर्णेअभिव्याहरति । तर्हितत्प्रतृण्णस्यपदस्यरूपंसमस्तपदाध्ययनफलप्रदमितियावत् । उभयमंतरेण । क्रमस्तुअग्रएव । अग्र्यएवसंहितापदाभ्यांश्रेष्ठएव । कुतःक्रमेणउभयंसंध्युक्तिःविभागेनोक्तिश्चेतिद्वयंव्याप्तंगर्भीकृतंभवतियतस्तस्मात् । ततश्च विष्णुर्विषणुरित्युभयथापिवचनात्समस्तक्रमाध्ययनफलंभवतीतिभावः । अथवासंहितापदक्रमस्वरूपंनिरूपयति ॥ यद्वीति ।

वदेद्च्योष्ठाउत्तराभ्यांस्थानाभ्यामित्येनंब्रूयाद्यस्त्वेवोभयमंतरेणाहतस्यनास्त्युपवादोयद्धिसंधिंविवर्तयतितन्निर्भुजस्यरूपमथयच्छुद्धेअक्षरेअभिव्याहरतितत्प्रतृण्णस्याग्रउएवोभयमन्तरेणोभयंव्याप्तंभवत्यन्नाद्यकामोनिर्भुजंब्रूयात्स्वर्गकामःप्रतृण्णमुभयकामउभयमन्तरेणा थयद्येनं

पूर्वोत्तरवर्णयोःसंधिंविवर्तयतीतियत्तन्निर्भुजस्यरूपंस्वरूपं । अथयच्छुद्धेअक्षरेअमिलितवर्णात्मकपदेअभिव्याहरति । तत्प्रतृण्णस्यरूपं । येननिर्भुजंप्रतृण्णंचेत्युभयंव्याप्तंभवति । सएवोभयमंतरेणक्रमइत्युच्यते । सत्वग्रएवअग्र्यएवेत्यर्थः । संहिताध्ययनफलंविविच्याह ॥ अन्नाद्यकामइति । योमोक्षेन्नादिभोगबाहुल्यकामःसनिर्भुजंविष्णुरितिसंहितारूपंनामब्रूयात् । स्वर्गकामोमोक्षकामःप्रतृण्णंविषणुरितिपदात्मकंनामब्रूयात् । यस्तुमोक्षतद्धोगोभयकामःसउभयमंतरेणविष्णुर्विषणुरि

तिद्विधापिब्रूयादित्यर्थः।अथवाविष्णुनामार्थभूतत्वात्सर्ववेदस्थिताअपिसंहितापदक्रमाःविष्णुप्रतिपादकाएव।अतस्तत्संहिता पदक्रमाध्ययनफलमेवैतत्संहिताद्यध्ययनफलंमंतव्यमित्याह ॥ अन्नाद्यकामइति । अत्रनिर्भुजादिशब्दाःसकलसंहितादि पराः । संहिताद्यध्येतॄन्निंदनेकृतेमनुष्यमात्रंप्रतिब्रुवणप्रकारःप्रागुक्तः । इदानीमसुरप्रकृतिकंप्रतिब्रुवणप्रकारउच्यते । अथयद्येनमित्यादिना । यद्येनंनिर्भुजंब्रुवंतंपरःसर्वशत्रुरसुरप्रकृतिरुपवदेत्तर्ह्येनंप्रतिब्रूयात् । किमिति । मयाधीय मानस्यनिर्भुजस्ययापृथिवीस्थापृथिवीनाम्नीवराहाख्यादेवता । तामेवत्वंआरःदूषितवानसि । धातूनामनेकार्थत्वात् । दू

निर्भुजंब्रुवन्तंपरउपवदेत्पृथिवींदेवतामारःपृथिवीत्वादेवतारिष्यतीत्येनंब्रूया दथयद्येनंप्रतृण्णं ब्रुवन्तंपरउपवदेद्दिवंदेवतामारोद्यौस्त्वादेवतारिष्यतीत्येनंब्रूया दथयद्येनमुभयमन्तरेणब्रुवन्तं परउपवदेदंतरिक्षंदेवतामारोंतरिक्षंत्वादेवतारिष्यतीत्येनंब्रूया द्यथातुकथाचब्रुवन्वाब्रुवन्तंवा

षणार्थात्ऋधातोर्लुङिरूपमेतत् ॥ तद्देवताकनिर्भुजाध्ययनकालेक्रियमाणस्यमद्दूषणस्यापितद्दूषणरूपत्वात् । तस्मात्सापृ थिवीदेवतात्वात्वांरिष्यति । रिषहिंसायां । अंतर्णीतण्यर्थोयं । नाशयिष्यति । अंधेतमसिपातयेदिति । अथयद्येनंप्रतृ ण्णंब्रुवंतंपरउपवदेत्तर्हिदिवंदेवतांवामनाख्यांत्वमारस्तस्मात्साद्यौर्देवतात्वांरिष्यतीत्येनंब्रूयात् ॥ अथयद्येनंउभयमंतरेण क्रमंब्रुवंतंपरउपवदेत्तर्हिअंतरिक्षदेवतांनृसिंहाख्यामारस्तस्मात्साअंतरिक्षदेवतात्वांरिष्यतीत्येनंब्रूयादिति । ननुनिंदकेननिं ॥ ५५ ॥

दायांकृतायामपिज्ञानिनोद्वंद्वसहिष्णुतयातत्सोढव्यमेव । तत्कुतएवंप्रत्युत्तरंदातव्यमित्यतआह ॥ यथातुकथाचेति । लोकेयथावादिप्रतिवादिनोःकथाप्रवृत्ताचेत्तत्रवाद्युत्तरस्यप्रतिवादिनाप्रत्युत्तरंदीयतएवनतूष्णींभावआश्रियतेएवंप्रकृतेपीत्य र्थः । निंदादिसहनंतुकेवलात्मनिंदादिविषयं । इदंतुदेवताविषयंचभविष्यति । देवतास्तुतिकालेक्रियमाणस्यनिंदादेःस्तु त्यदेवताद्रोहरूपत्वात् । अतोनतत्सोढव्यमितिभावः । ननुनिंदकंप्रतित्वादेवतारिष्यतीत्यादिब्रुवणविधानंव्यर्थं । ब्रुवण मात्रस्याप्रयोजकत्वादित्याशंक्योक्तप्रकारेणज्ञानवताप्रयुक्तंवाक्यंनजातुमोघंभवितुमर्हतीत्याह ॥ ब्रुवन्निति । संहिता

ब्रूयादभ्याशमेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादतिद्युम्नएवब्राह्मणंब्रूयान्नातिद्युम्नेच नब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्माहशूरवीरोमांडूकेयः ॥ ३ ॥

द्याःश्रुतिततीर्ब्रुवन्अधीयानःवाशब्दादब्रुवन्वापुमान् । ब्रुवंतंनिंदंतं । वाशब्दादनिंदंतंवा । प्रकारांतरेणस्वद्रोहंकुर्वाणमिति यावत् । यंकंचित्पुरुषंप्रति । यत्शापरूपंवचनंब्रूयात् । तत्वचनमभ्याशमेवसमीपतएव क्षिप्रमेवेतियावत्। तथैवसत्यमेव स्यात् । नजातुमोघमित्यर्थः । निंदकमात्रंप्रत्येवंशापप्रदानप्रसक्तौतत्रविशेषमाह ॥ नत्विति । ब्राह्मणंब्रह्मप्राप्तियोग्यंप्र तिकुशलादन्यत्अकुशलंतस्यानर्थकारिवचनंनैवब्रूयात् । अयोग्यजनान्प्रत्येवैवंब्रूयान्नतुमोक्षयोग्यान्प्रतीतिभावः । तत्रा प्यपवादमाह ॥ अतिद्युम्नइति । द्युतिस्वरूपत्वात्द्युम्नोविष्णुस्तदाज्ञातिक्रमीअतिद्युम्नः । विष्णवाज्ञारूपश्रुतिस्मृत्युदि

तधर्मोल्लंघनकारीतियावत् । तथाचतस्मिन्नतिद्युम्नेसत्येवतंब्राह्मणंमोक्षयोग्यंपुरुषंप्रतिशिक्षार्थंलोकच्युतोसीत्येवब्रूयात् । न तुलोकच्युतोभवेतिनातिद्युम्नेचनसमासोयं । भगवदाज्ञानुवर्तिनिसतितुतादृशंब्राह्मणंमोक्षयोग्यंप्रतिनैवंब्रूयात् । अतोब्राह्मणानांशापाविषयत्वान्मान्यत्वाच्चब्राह्मणेभ्योनमोअस्त्वितिशूरवीरोमांडूकेयआहस्म । अत्रनमोअस्त्वितिएङः प्रकृतिभावश्छांदसः ॥ ३ ॥ अथातोनुव्याहाराःआत्मनोज्ञानसामर्थ्यानुसारेणभगवदुपासनाविषयएवोपासकस्याशक्त्यादिदोषंवदंतंप्रतिवक्तव्याव्यवहाराःप्रदर्श्यंते । तदर्थमेकामुपासनांतावदाह ॥ प्राणइति । प्राणोविष्णुर्वायुश्च । सर्वाधारत्वाद्वंशो

अथातोनुव्याहाराः प्राणोवंशइतिविद्यात्सयएनंप्राणंवंशमुपवदेच्छक्नुवंतंचेन्मन्येतप्राणंवंशंसमधां ३ प्राणंमावंशंसंदधतंनशक्नोषीत्याहप्राणस्त्वावंशोहास्यतीत्येनंब्रूयादथचेदशक्नुवन्तंमन्येत प्राणंवंशंसमधित्सिषंतंनाशकःसंधातुंप्राणस्त्वावंशोहास्यतीत्येनंब्रूयाद्यथातुकथाचब्रूवन्वाब्रूवंतं

वंशस्थानीयइतिविद्यात् । उपासीत । सप्रसिद्धोयःपुमान्वंशंप्राणंप्रतिस्थितंतदुपासकमेनंउपवदेत्प्राणप्रीतिसंपादनेत्वंनशक्नोषीत्यादिरूपेणनिंदेत्तर्हितमेनंनिंदकंप्रत्ययंप्राणोपासकोब्रूयात् । यद्यात्मानंशक्नुवंतंज्ञानसामर्थ्ययुक्तंमन्येत । देवाद्युत्तमाधिकारीचेदितियावत् । किमिति । अहंप्राणंवंशंसमधांसंदधानोऽभवं । विष्णुवायुप्रियतांसंपादितवानस्मीतियावत् । एवंप्राणंवंशंसंदधतंमामांत्वंप्राणप्रीतिसंपादनेनशक्नोषीत्याह आत्थ । अतोवंशःप्राणस्त्वात्वांहास्यतिइहामुत्रचपरित्यज

तीति । अथयद्ययंप्राणोपासकआत्मानमशक्नुवंतमल्पज्ञानशक्तिमंतंमन्येत । गंधर्वपित्राद्यल्पाधिकारीचेदितियावत् । त द्वैनंनिंदकंप्रतिब्रूयात् । किमिति । प्राणंवंशंसमधित्सिषंतंप्राणेनसंधिमिच्छंतं । प्राणप्रीतिसंपादनोद्योगिनमितियावत् । मां संधातुंनाशकः मयासहसंधानंकर्तुंनाशकः । ममप्रीतिंकर्तुंनाशकइतियावत् । अतस्त्वांवंशःसर्वाधारःप्राणोविष्णुर्वायुश्चहा स्यतीति। यथातुकथाचेत्यादिपूर्ववत् ॥ ४ ॥ अथप्रमेयांतरंनिरूप्यते । निर्भुजवक्राःनिर्भुजंसंहितावक्रेमुखेयेषांतेतथोक्तास्त

वाब्रूयादभ्याशमेवयत्तथास्यान्नत्वेवान्यत्कुशलाद्ब्राह्मणंब्रूयादातिद्युम्नएवब्राह्मणंब्रूयान्नाति द्युम्नेचनब्राह्मणंब्रूयान्नमोअस्तुब्राह्मणेभ्यइतिहस्माहशूरवीरोमाण्डूकेयः ॥ ४ ॥

अथखल्वाहुर्निर्भुजवक्राःपूर्वमक्षरंपूर्वरूपमुत्तरमुत्तररूपंयोवकाशःपूर्वरूपोत्तररूपेअंतरेणसासंहि

न्नामानः । केचनऋषयआहुः । खल्वितिवाक्यालंकारे । किमिति। पूर्वमक्षरंपूर्वाक्षरस्थितंयद्वराहाख्यंरूपंतत्पूर्वरूपंपूर्ववर्ण प्रतिपाद्यं । उत्तरंउत्तरवर्णस्थितंवामनाख्यंरूपंउत्तररूपंउत्तरवर्णवाच्यं । पूर्वोत्तररूपेअंतरेणपूर्वोत्तरवर्णयोरंतरस्थितःयोऽ वकाशःअवनात्काशनाच्चावकाशनामानृसिंहःसासंहितासंहितानामकइति । विधेयानुसारेणस्त्रीलिंगं । सएवमित्यादिकंपू र्ववदेवव्याख्येयं । अथएवंब्रुवाणान्निर्भुजवक्रान्प्रतिह्रस्वोमांडूकेयोनामऋषिःहेनिर्भुजवक्राइतिसंबोध्यवयंब्रूमइत्याहस्म । किमिति । पूर्वमेवाक्षरंपूर्वरूपं । उत्तरमक्षरमेवोत्तररूपं । नात्रास्माकंविप्रतिपत्तिरित्येवकारेणाह । पूर्वरूपोत्तररू

पेअंतरेणयोवकाशः । येनयत्प्रेरणयासंधिंपूर्वोत्तरवर्णयोर्विवर्तयति । विशेषेणवर्तयति । पुरुषः । येनचस्वरास्वरंविजानाति । अत्रायंस्वरोनभवतिकिंत्वन्यएवेतिज्ञात्वाक्लृप्तस्वरेणैवाक्षरमुच्चारयतीतियावत् । येनचमात्रामात्रांविभजते । ह्रस्वदीर्घविभागंकरोति सावेदव्यासाख्यंरूपंसंहितासंहितानामकमिति । सयएवमित्याद्युक्तार्थं ॥ अथहअस्यह्रस्वमांडूकेयस्यपुत्रःप्रातीबोधीपुत्रस्तन्नामकभार्याजातोमध्यमोनामऋषिराह । किमिति । इमेखल्वक्षरेपूर्वोत्तरवर्णेअविकर्ष

तेति सयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथवयंब्रूमोनिर्भुजवक्राइतिहस्माहह्रस्वोमांडूकेयः पूर्वमेवाक्षरंपूर्वरूपमुत्तरमुत्तररूपंयोवकाशःपूर्वरूपोत्तररूपेअंतरेणयेनसंधिंविवर्तयतियेनस्वरास्वरंविजानातियेनमात्रामात्रांविभजतेसासंहितेतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेत्यथहास्यपुत्रआहमध्यमःप्रातीबोधीपुत्रोक्षरेखल्विमेअविकर्षन्ननेकीकुर्वन्यथावर्णमाह

न्अनेकीकुर्वन्विकर्षणसंश्लेषावप्रापयन् । यथावर्णंवर्णस्थितिमनतिक्रम्याह । सममेवाक्षरोच्चारणंकरोतीतियावत् । यदनुग्रहात्पुमानितिशेषः । तत्सामभवतीत्युत्तरेणान्वयः । याचासौमात्रामात्रानियामिका । मापयतित्रायतेचेतिमात्रानाम्नी । यापिचपूर्वोत्तररूपेअंतरेणयथावदुच्चारितपूर्वोत्तरवर्णयोर्मध्येस्थित्वासंधिविज्ञपनीसंधिप्रेरिकातत्सामभवति ।

सामूर्तिःसामनाम्नीवासुदेवाख्याभवति । तस्मात्सामैव । सामनामकंवासुदेवरूपमेवाहंसंहितांपूर्वोत्तरवर्णगतरूपद्वयसंहितत्वात्संहितानामकंमन्यइतिआहेतिपूर्वेणान्वयः । तदप्येतद्विष्णोःसामशब्दवाच्यत्वमृषिणोक्तं । हेबृहस्पते । वाग्घिबृहतीतस्याएषपतिरितिश्रुतेर्वेदवाक्पतेवायो । साम्नोविष्णोःसकाशात्परमुत्तमंकिंचनयेनविदुः । विष्णुमेवसर्वोत्तमंयेजानंतितेभ्योनोस्मान्ब्रूहीतिश्रुतिशेषेणान्वयः । सयएवमितिपूर्ववत् ॥ ५ ॥ बृहद्रथंतरयोःबृहन्नाम्नोबृहत्सामदेवतायाःनारायणस्यरथंतरनाम्न्याःरथंतरसामदेवतायालक्ष्म्याश्चरूपेणसंहितासंहितानामकमर्धनारीनरात्मकंलक्ष्मीनारायणात्मकंरूपंसंधीयते

तद्यासौमात्रापूर्वरूपोत्तररूपेअंतरेणसंधिविज्ञपनी सामतद्भवतिसामैवाहंसंहितांमन्यइतितदप्येतदृषिणोक्तं बृहस्पतेनपरःसाम्नोविदुरिति सयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति ॥ ६ ॥ बृहद्रथंतरयोरूपेणसंहितासंधीयतइतिताक्ष्योवाग्वैरथंतरस्यरूपंप्राणोबृहतउभाभ्यामुखलुसंहितासंधीयतेवाचाचप्राणेनचैतस्यांहस्मो

संधितमस्ति । अत्रसंधीयमानरूपस्यसंहितात्वोक्त्यारथंतराख्यरमायाःपूर्ववर्णदेवतात्वंबृहदाख्यनारायणस्योत्तरवर्णदेवतात्वंचसूचितंभवति । अन्यथाऽस्यरूपस्यसंहितादेवतात्वानुपपत्तेः । पूर्वोत्तरवर्णयोःसंधिरेवहिसंहितेत्युच्यते । इतितार्क्ष्योनाममुनिराह । बृहद्रथंतररूपयोरधिष्ठानांतरंसूचयन्नामांतरमप्याह ॥ वाग्वाइति । वाक्सरस्वती । तत्स्थंतन्नाम

कंचरथंतरस्यलक्ष्म्याःरूपंवैप्रसिद्धं । प्राणोवायुः । तत्स्थंतन्नामकंचबृहतोनारायणस्यरूपमित्यर्थः । वाचाचप्राणेनचेत्युभाभ्यांरथंतरबृहद्रूपाभ्यां । उएवसंहितानामकंलक्ष्मीनारायणाख्यंरूपंअर्धनारीनररूपं । संधीयतेखलु । यएतांविद्यामधीतवान्सतार्क्ष्योपिनानायासेनैतद्विद्यांसंपादितवान् । किंतुएतस्यांहस्मोपनिषदि । तादर्थ्येसप्तमीयं । एतांविद्यामवाप्तुमितियावत् । संवत्सरंगाःगुरुसंबंधिनीः । रक्षयतेअरक्षत । तात्पर्यातिशयद्योतनायगोरक्षणस्यप्रयोजनांतरंनिषेधति ॥ एतस्यामिति । एतस्यांहस्ममात्रायां । एतद्विद्यामात्रप्राप्त्यर्थंसंवत्सरंतार्क्ष्योगाः । रक्षयतेअरक्षत । नतुप्रयोजनांतरमप्य

पनिषदिसंवत्सरंगारक्षयतेतार्क्ष्यएतस्यांहस्ममात्रायांसंवत्सरंगारक्षयतेतार्क्ष्यस्तदप्येतदृषिणोक्तंरथंतरमाजभारावसिष्ठः।भरद्वाजोबृहदाचक्रेअग्नेरितिसयएवमेतांसंहितांवेदसंधीयतेप्रजया

भिसंधायेत्यर्थः । तदप्येतदृषिणोक्तं । लक्ष्मीनारायणयोरथंतरबृहच्छब्दवाच्यत्वंऋषिणामंत्रेकथितं । किमिति । वसिष्ठः प्रथसप्रथयोर्यज्ञेहोतासन्अनिरुद्धादिचतुर्मूर्त्यात्मकंहरिंस्तुत्वातत्प्रसादाद्रथंतरंतन्नामकलक्ष्मीरूपंआजभार आजहार । हृग्रहोर्भश्छंदसीतिसूत्रात् । स्वसमीपमागत्यस्वस्यराज्ञोश्वयथापुरुषार्थदात्रीसास्यात्तथाचकारेतियावत् । एवमेवभरद्वाजोप्यग्नेरग्र्यत्वादग्निशब्दवाच्याच्चतुर्मूर्तेर्हरेर्बृहदाख्यंनारायणरूपंआचक्रे । आकारयामासेति । फलमाह ॥ **सयएवमिति** । एवंतार्क्ष्यमतानुसारेणैकांसंहितादेवतामर्धनारीपुमात्मिकांभगवन्मूर्तिंमुक्त्वाकौंठरव्यमतानुसारेणद्विद्विदेवतात्मिकाःपंचसंहि

तामूर्तीराह ॥ वाक्प्राणेनेति । वाक्रमा । प्राणेनविष्णुनासहिता । एकासंहिता । सचविष्णुःपवमानेनवायुनासहद्वि तीयासंहिता । पवमानश्चविश्वैर्देवैर्विष्ण्वादिसमस्तदेवैःसहतृतीयासंहिता । विश्वेदेवाश्चस्वर्गेणलोकेन स्वर्गाभिमानिना सर्वद्रष्टृत्वात्प्रकाशनाल्लोकनाम्नाशिवेनसहचतुर्थीसंहिता । स्वर्गोलोकश्चब्रह्मणाचतुर्मुखेनसहपंचमीसंहितेति । सैषासंहि ताअवरपरघटितत्वादवरपरेत्युच्यते । द्वयोर्द्वयोर्मध्येएकमवरमन्यत्परमिति । सैषेत्याद्येकवचनंसमुदायापेक्षं । तत्रप्रथमा निर्दिष्टंवामभागगं । तृतीयानिर्दिष्टंदक्षिणभागगं । एवमेताःसर्वाःसंहितादेवतामूर्तयोहरिहरमूर्तिवन्मिथोमिलिताएवबो

पशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेति वाक्प्राणेनसंहितेतिकौंठरव्यःप्राणःपव मानेनपवमानोविश्वैर्देवैर्विश्वेदेवाःस्वर्गेणलोकेनस्वर्गोलोकोब्रह्मणासैषाऽवरपरासंहितासयोहै तामवरपरांसंहितांवेदैवंहैवसप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसंधीयतेयथैषासं हितासयदिपरेणवोपसृतःस्वेनवार्थेनाभिव्याहरेदभिव्याहार्षन्नेवविद्याद्विवंसंहितागमद्विदुषां

ध्याः । फलमाह ॥ सइति । सप्रसिद्धोयोधिकारीवेदसःयथैषासंहितामिथःसंधितैववर्ततेएवमेवप्रजापश्वादिभिःसंधीयते हेत्यर्थः । उक्तविद्याफलप्राप्तौकिंचिदित्थंभावमाह ॥ सइति । सएतद्विद्यावेत्ता । यदिपरेणवोपसृतउपसन्नःस्वेनवार्थेनो पसृतः । परार्थेवा । आत्मार्थेवेतियावत् । अभिव्याहरेत् मंत्रमितिशेषः । तर्ह्यभिव्याहार्षन्नेव अभिव्याहर्तुमिच्छन्नेव । अ

भिव्याहरणात्पूर्वमेवेतियावत् । विद्यात्चिंतयेत् । किमिति । संहितासंहितारूपोहरिर्दिवंद्युलोकमगमत् । देवेष्वनुग्रहंकर्तु मितिशेषः । अतोदेवानामेवएवंउक्तंविद्याफलंसंपूर्णंभविष्यति । कुतःविदुषां हेतुगर्भंविशेषणमेतत् । देवानामेवमुख्यतो विद्वत्त्वात् । इतिविद्यादितिसंबंधः । ततश्चैवंचिंतयतःपुंसोदेवानांप्रसादादुक्तंफलंतथैवशश्वत्नित्यंस्यादित्यर्थः । एवंताक्ष्यम तेकौंठरव्यमतेचसंहितारूपज्ञानिनःफलंपृथगभिधायापितात्पर्यार्थंपुनःसामान्येनाभिधत्ते ॥ **सयएवमेतामिति** । एवंताक्ष्यो क्तांकौंठरव्योक्तांच । अथमतांतरानुसारात्संहितादेवतांपृथगाह ॥ **वाक्संहितेति** । वाक्सरस्वतीसंहितावर्णमध्यदेवतासंहि

देवानामेवंभविष्यतीतिशश्वत्तथास्यात्सयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्म वर्चसेनस्वर्गेणलोकेनसर्वमायुरेति वाक्संहितेतिपंचालचंडोवाचावैवेदास्संधीयंतेवाचाच्छंदां सिवाचामित्राणिसंदधतिवाचासर्वाणिभूतान्यथोवागेवेदंसर्वमितितद्यत्रैतदधीतेवाभाषतेवा

तानाम्नीचेतिपंचालचंडोनाममुनिर्मन्यते । कुतोवाचःसंहितात्वमित्यतस्तदुपपादयति ॥ **वाचेति** । वाचावाग्देवतयासरस्व त्यावेदाःसंधीयंते । तत्प्रेरणयैवसंहिततयोच्चार्यंते । गायत्र्यादिछंदांस्यपिवाचैवसंधीयंते । लोकेमित्राण्यपिवाचैवसंदधति । मि थःप्रीतिरूपंसंधानंकुर्वंति । सर्वाण्यपिभूतानिवाचैवसंधीयंतेव्यवहारविषयाभवंति । अथोतस्मादिदंसर्वंवागेवसरस्वत्यधीनमे व । इतिपंचालचंडआहेतिपूर्वेणान्वयः । तथाचवेदादिसंधानकर्तृत्वाद्वाचःसंहितात्वमितिभावः । तत्तस्माद्वाचःसर्वंवेदादिवा

ङ्नियामकत्वाद्यत्रयदा । एतत्वेदादिकमधीतेवा भाषतेलौकिकभाषणंवाकरोतिपुमांस्तदाप्राणःप्राणस्थःप्रणेतृत्वात्प्राणनामा भगवान्वाचिभवतिवागाश्रितोभवति । वाच्यतयातदधीनइवभवतीत्यर्थः । अतएवतदाअध्ययनादिकालेवाक्सरस्वती । प्राणंभगवंतं । रेह्लिलेढि । लिहआस्वादने । आस्वादयति ग्रसति । वाच्यतयास्वाधीनमिवकरोति । अथयत्रयदापुमां स्तूष्णींभवतिवास्वपितिवातदावाक्प्राणेप्राणाश्रिताभवति । प्राणस्थेभगवत्येवलीनाभवति । तदाप्राणोभगवान्वाचंरेह्लि

वाचितदाप्राणोभवतिवाक्तदाप्राणंरेळ्ह्यथयत्रतूष्णींवाभवतिस्वपितिवाप्राणेतदावाग्भवति प्राणस्तदावाचंरेह्लितावन्योन्यंरीह्लोवाग्वैमाताप्राणःपुत्रस्तदप्येतदृषिणोक्तमेकःसुपर्णःससमु द्रमाविवेशसइदंविश्वंभुवनंविचष्टे ॥ तंपाकेनमनसापश्यमंतितस्तंमाकारेह्लिसउरेह्लिमातर

लेढिग्रसतीव । स्ववाचकताशक्तिमंतधापयति । एवंतौवाक्प्राणौअन्योन्यंरीह्लःलीढःयुक्तंचसरस्वतीभगवतोरन्योन्यमा स्वादनंमातृपुत्रभावापन्नत्वादितिभावेनाह ॥ **वाग्वैमाताप्राणःपुत्रइति** । सरस्वत्यभिमन्यमानवेदव्यंग्यत्वाद्भगवतःपु त्रत्वंव्यंजकत्वाच्चतस्यामातृत्वमौपचारिकमेवेतिबोध्यं तदप्येतत् । वाक्प्राणयोर्मातृपुत्रभावोन्योन्यमास्वादयितृत्वंचऋषि णोक्तं । कथं । सद्रिरूपत्वेनोक्तोप्येकःस्वगतभेदवर्जितः । सुपर्णःसुष्ठुपरानंदोभगवान्समुद्रंक्षीराब्धिं । आविवेश । तत्र श्वेतद्वीपेशेतइतियावत् । सएवेदंविश्वंसमस्तंभुवनं । विचष्टे । स्वभावसिद्धप्रज्ञयैवपश्यति । तमेतंभगवंतंपाकेनपरिपक्वेन

मनसाअंतितःसमीपएवाहमपश्यं । ब्रह्मवाक्यमिदं । तमेनंविष्णुं । मातासरस्वती । रेह्लिलेढि । सउसचविष्णुर्मातरंसरस्वतीं रेह्लिलेढीति । सयएवमित्युक्तार्थं । अथातःप्रजापतिसंहिता । प्रजापतिनारुद्रेणप्रोक्तासंहितानिरूप्यते । जाया जयशालित्वाज्जा याशब्दवाच्योजायास्थितोभगवान् । पूर्वरूपं पूर्ववर्णदेवता । पालनात्पतिनामापतिस्थोहरिरुत्तररूपमुत्तरवर्णदेवता । पुत्रः पूतिगंधात्मकत्वात्पुतोनरकात्त्राणात्पुत्रनामा । सएवसंधिर्वर्णयोर्मध्यदेवता । संधिनोतिपुष्णातीति संधिनामाच । प्रजननंप्र

मिति सयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायु रेत्यथातःप्रजापतिसंहिता जायापूर्वरूपंपतिरुत्तररूपंपुत्रःसंधिःप्रजननंसंधानंसैषादितिःसंहि तादितिर्हीदंसर्वंयदिदंकिंचपिताचमाताचपुत्रश्चप्रजननंचतदप्येतदृषिणोक्तमदितिर्मातासपि तासपुत्रइतिसयएवमेतांसंहितांवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनस र्वमायुरेतिसर्वमायुरेति ॥ ६ ॥ इत्यैतरेयोपनिषत्सुतृतीयारण्यकेप्रथमोऽध्यायः ॥ ३ ॥ १ ॥

जोत्पत्तिकर्मस्थःप्रकर्षेणजनकत्वात्प्रजनननामाविष्णुःसंधानंवर्णसंधानकर्मणिस्थितः । संधानकर्तृत्वात्संधाननामाच । सैषा संहितादेवताभगवान्सर्वस्यादानाददितिर्नाम । यदिदंकिंचेदंसर्वमपिअदितिर्हिअदितिनामकविष्णवधीनंहि । पिताचमा ताचादितिरेव । पालकत्वान्माननाच्च । पुत्रश्चप्रजननंचोक्तरीत्यादितिरेव । तदप्येतत् । विष्णोरदितिशब्दवाच्यत्वंपित्रा

दिशब्दवाच्यत्वादिकंचऋषिणोक्तं । अदितिर्मातासपितासपुत्रइतिविधेयानुसारेणसइतिपुल्लिंगप्रयोगः । अत्रैतन्मंत्रोत्तरार्धगतमदितिर्जनित्वमित्येदपिग्राह्यं । तेनप्रजननंचेत्युक्तार्थेसमाख्यात्वसिद्धिः । एतैश्चतुश्शब्दैःक्रमेणवासुदेवादिचतुर्मूर्तयउच्यंतइत्यवगंतव्यं । एतद्विद्याफलमाह ॥ सयइति ॥ ६ ॥ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमन्महैतरेयोपनिषद्भावप्रदीपेतृतीयारण्यकेप्रथमोध्यायः ॥ ३ ॥ १ ॥

अस्थिमज्जापर्वगतंसर्वगंमृत्युनाशनं । वंदेदुर्गापतिंविष्णुंसर्ववेदोदितंप्रभुं ॥ १ ॥ प्राणोमुख्यवायुर्वंशःसर्वाश्रयत्वाद्वंशस्था

हरिःॐ। प्राणोवंशइतिस्थविरःशाकल्यस्तद्यथाशालावंशेसर्वेन्येवंशाःसमाहिताःस्युरेवमस्मिन्प्राणेचक्षुःश्रोत्रंमनोवागिंद्रियाणिशरीरंसर्वआत्मासमाहितस्तस्यैतस्यात्मनःप्राणऊष्मरूपम

नीयइतिस्थविरःशाकल्योनामऋषिराह । तत्तत्रनिदर्शनमुच्यते । यथाशालावंशेशालामध्यगतेवंशेसर्वेअन्येवंशाःसमाहितास्तदाधारतयास्थिताःस्युरेवमस्मिन्प्राणेचक्षुःश्रोत्रंमनोवाक्इंद्रियाण्यन्यानित्वग्घ्राणादीनिशरीरंचपृथक्पृथक् । तथासर्वश्चक्षुरादिसर्वसमुदायरूपःआत्मासंघातश्चसमाहितः । तथाएतदभिमानिनःश्रोत्रादिशब्दवाच्यादेवाश्चसमाहिताःएतेषुचसर्वेष्वपिआत्मापरमात्मासर्वःबहुरूपःसन्समाहितःसंस्थितः । तस्यात्मनःसंघातस्ययआत्माआदानादिकर्तातस्यैतस्यात्मनःपरमात्मनोमूलरूपस्यसंबंधीयःप्राणस्तत्स्थोभगवान्प्राणनामाऊष्मरूपंऊष्माक्षरप्रतिपाद्यः । समर्थत्वेनसर्वैःसोढुमशक्यत्वादू

ष्मनामाऊष्माक्षरस्थश्च । अस्थीनि । अधिकंस्थिरत्वादस्थिनामकं । यदस्थिगतंबहुरूपंभगवद्रूपंतत्स्पर्शरूपंस्पर्शाक्षरप्रति पाद्यंस्पर्शनहेतुत्वात्स्पर्शनामकंस्पर्शाक्षरस्थितंच । एवंमज्जानः । मदस्यजनकत्वान्मज्जाख्यंयन्मज्जास्थितंबहुरूपंभगवतो रूपं । तत्स्वररूपंस्वराक्षरप्रतिपाद्यंस्वरतत्वात्स्वरनामकंस्वराक्षरस्थितंच । यच्चान्यत्संघातसंबंधिचतुर्थंमांसंलोहितंचेत्ये तत्मांसलोहितगतंमांप्रमाणंसारयतिप्रवर्तयतीतिमांसनामकंरक्तवर्णत्वाल्लोहितनामकंभगवद्रूपंतत्अंतस्थरूपंअंतस्थाक्षरप्रति पाद्यं । अंतःस्थितत्वादंतस्थनामकमंतस्थाक्षरस्थितंचइतिह्स्थविरःशाकल्यआहस्मेत्यन्वयः । ह्रस्वोमांडूकेयस्तुएवमाह ।

स्थीनिस्पर्शरूपंमज्जानःस्वररूपंमांसंलोहितमित्येतदन्यचतुर्थमंतस्थरूपमितिहस्माहह्रस्वोमांडूके यस्त्रयंत्वेवनएतत्प्रोक्तंतस्यैतस्यत्रयस्यास्थ्नांमज्ज्ञांपर्वणामितित्रीणीतःषष्टिशतानित्रीणीतस्ता निसप्तविंशतिशतानिभवंति सप्तचवैशतानिविंशतिश्चसंवत्सरस्याहोरात्राःसएषोहःसंमान

किमिति । नःपक्षेतुएतत्संघातसंबंधित्रयमेवअस्थीनिमज्जानःपर्वाणिचेति । अस्थ्नांमज्ज्ञांपर्वणामिति । तस्यैतस्यत्रयस्यए तत्त्रयेगतस्य अधिकस्थिरत्वात्मदस्यजननात्परज्ञानत्वाच्चास्थिमज्जापर्वनामकभगवद्रूपसंघस्यमध्येइतःदक्षभागेत्रीणिशता निषष्टिश्च । षष्ट्युत्तरशतत्रयसंख्याकानीतियावत् । इतःवामभागेत्रीणि षष्टिशतानीतिवर्तते । षष्ट्युत्तराणिशतानीतिया वत् । तानिसप्तविंशतिशतानिभवंति । एवंभागद्वयस्थितानिभगवद्रूपाणिसप्तशतानिविंशतिश्च । विंशत्युत्तरसप्तशतानि ॥ ६१ ॥

भवंति । संवत्सरस्याहोरात्राः । अहोरात्राण्यपिसप्तशतानिविंशतिश्चभवंति । अतएतान्येवसप्तशतानिविंशतिश्चभगव तोऽरूपाणिअहोरात्राणि । अहार्यत्वाद्रतिप्रदत्वाच्चाहोरात्रनामकानितत्स्थितानि । अतःसएषभगवान्अहःसंमानउच्यते । यतोध्यात्मगतानिविष्णुरूपाण्यहोभिःसमसंख्यानि । सएषआत्माचक्षुर्मयःपूर्णदर्शनशक्तिमान् पूर्णश्रवणशक्तिमत्त्वाच्छ्रो त्रमयः । सत्यकामत्वाच्छंदोमयः । पूर्णमंतृत्वशक्तिमत्त्वान्मनोमयः । पूर्णवक्तृत्वशक्तिमत्त्वाद्वाङ्मयश्च । यएवमेतमहः संमानमात्मानंभगवंतंचक्षुर्मयादिरूपंवेदसःअह्नामहर्नामकानांभगवद्रूपाणांसायुज्यंसरूपतांसलोकतांचाश्नुतेप्राप्नोति । पुत्री

श्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतमहःसंमानंचक्षुर्मयंश्रोत्रमयंछं दोमयंमनोमयंवाङ्मयमात्मानंवेदाह्नांसायुज्यंसरूपतांसलोकतामश्नुतेपुत्रीपशुमान्भवति सर्वमायुरेति ॥ १ ॥ अथकौंठरव्यस्त्रीणिषष्टिशतान्यक्षराणां त्रीणिषष्टिशतान्यूष्मणां त्री

ज्ञानपुत्रवान्भवति । भगवद्रूपसायुज्यादिकंप्राप्यचपशुमान्भवतिपीयमानस्वरूपसुखवान्भवति । स्वरूपसुखानुभववा न्भवतीतियावत् ॥ १ ॥ अथकौंठरव्यआह । किमिति । त्रीणिषष्टिशतान्यक्षराणां । अत्राक्षरशब्देनविष्णुनामगतंणकार रूपंस्पर्शाक्षरमुच्यते । तथाचाक्षराणांणकारगतानांअक्षरनामकानांभगवद्रूपाणांत्रीणिषष्टिशतानिषष्ट्युत्तराणित्रीणिशतानि तथाऊष्मणांविष्णुनामगतषकाररूपोष्माक्षरगतानांसमर्थत्वादूष्मनामकानांभगवद्रूपाणांत्रीणिषष्टिशतानि तथासंधीनांषण

योःसंधिगतानांसंधानात्संधिनाम्नांविष्णुरूपाणांत्रीणिषष्ठिशतानि । एवमेतान्येवान्यनामघटकेषुपंचाशद्वर्णेषुमध्येअक्षराणां ऊष्मभिन्नसर्ववर्णानांतद्गततन्नामकभगवद्रूपाणांत्रीणिषष्ठिशतानि । ऊष्मणांतद्गतानांतन्नाम्नांभगवद्रूपाणांत्रीणिषष्ठिशतानि । तत्संधीनांतद्गतसंधिनामकभगवद्रूपाणांचत्रीणिषष्ठिशतानि । संभूयाशीत्युत्तरसहस्रसंख्याकानिसंति । तत्रयान्यक्षराणिविष्णुनामगतानिवानामांतरगतानिवाऊष्मभिन्नानि । तद्गतानितन्नामकानियानिभगवद्रूपाण्यवोचाम । तान्यहा

णिषष्ठिशतानिसंधीनां यान्यक्षराण्यवोचामाहानितानि यानूष्मणोवोचामरात्रयस्तायान्संधीनवोचामाहोरात्राणांतेसंधयइत्यधिदैवत मथाध्यात्मंयान्यक्षराण्यधिदैवतमवोचामास्थीनितान्यध्यात्मं यानूष्मणोधिदैवतमवोचाममज्जानस्तेध्यात्म मेषहवैसंप्रतिप्राणोयन्मज्जैतद्दे

निअहार्यत्वादहर्नामकानिसंवत्सराहर्नियामकानि । एवंयानूष्मणोवोचामताःरात्रयः । यान्संधीनवोचामाहोत्राणांतेसंधयइत्येतद्वाक्यद्वयमपिव्याख्येयं । इत्यधिदैवतंभगवद्रूपाणि । अथाध्यात्मंनिरूप्यंते । यान्यक्षराण्यधिदैवतमवोचाम । अधिदैवंयान्यक्षरनामकानिरूपाण्यवोचामतानिरूपाण्यध्यात्ममस्थीनिअस्थिगतानिअस्थिनामकानि । यानूष्मणोऽधिदैवतमवोचाममज्जानस्तेऽध्यात्ममित्येतदप्येवंव्याख्येयं । मज्जास्वितरधात्वपेक्षयाभगवतोधिकसन्निधानमस्तीतिज्ञापयितुमाह ॥ एषहवाइति । यद्यस्मादेषप्राणोवायुःसंप्रतिसांप्रतं । मज्जा मज्जायांविशेषतःसन्निहितस्तस्मात्प्राणोविष्णुर्मज्जामज्जायामित

रधातुभ्योविशेषतःसन्निहितइत्यर्थः । यद्वायत्योमज्जाएषएवहिसंप्रतिप्राणःप्राणस्यवायोर्विशेषसन्निधानपात्रं । अतएव प्राणोविष्णुरपि प्राणनामकविष्णोर्विशेषसन्निधानपात्रमपीत्यर्थः । ननुप्राणस्यापिकुतोमज्जायांविशेषतःसन्निधानमित्यत आह ॥ एतद्रेतइति । एतत् एषमज्जैवरेतोभवति । रेतसिचप्राणोविशेषतःसन्निहितः । अतोमज्जायांविशेषतःप्राणसन्निधानमवसीयतइतिभावः । रेतस्यपिप्राणस्यविशेषसन्निधानंकुतः । येनतदुपादानमज्जायांतद्विशेषसन्निधानंप्रतीमहीत्यत आह ॥ नहवाइति । प्राणादृतेरेतोनसिच्यते । हवै । प्राणसन्निधानंविनारेतोनगर्भत्वंयातीतियावत् । तथाचेतरधातू

तोनहवाऋतेप्राणाद्रेतःसिच्यतेयद्वाऋतेप्राणाद्रेतःसिच्येतपूयेन्नसंभवेद्यांत्संधीनधिदैवतमवो
चामपर्वाणितान्यध्यात्मं तस्यैतस्यत्रयस्यास्थ्नांमज्ज्ञांपर्वणामितिपंचेतश्चत्वारिंशच्छतानि

नांगर्भीभावयोग्यताभावाद्रेतसएवतद्भावात्तत्रविशेषतःप्राणसन्निधानमवगम्यतइतिभावः । ननुगर्भीभावस्यरेतस्स्वभावत्वा न्नतत्रप्राणसन्निधानंप्रयोजकमित्यतआह ॥ यद्वाइति । यदिहिप्राणादृतेरेतःस्त्रियांसिच्येततर्हिपूयेत् पूतिगंधयुक्तमेवभवति । यत्रक्कवानिस्सृतंसन्नश्यतीतियावत् । नसंभवेत् । नगर्भत्वेननिष्पद्यते । अतोरेतसोगर्भताप्राप्तौप्राणसन्निधानमेवकारणमितिभावः । अथयान्त्संधीनधिदैवतमवोचामपर्वाणितान्यध्यात्ममित्येतदपिप्राग्वदेवव्याख्येयं । तस्यैतस्यअस्थ्नांमज्ज्ञां मज्ज्ञानांपर्वणामितित्रयस्यअस्थ्यादित्रयांतर्गतस्यतत्तन्नामकस्यहरेरूपाणिदेहेइतःदक्षिणभागेपंचशतानिचत्वारिंशच्चसंति ।

इतोवामभागेपंच चत्वारिंशच्छतानीतिवर्तते । चत्वारिंशदधिकपंचशतानिसंति । तत्भागद्वयस्थंरूपजातंसंभूयाशीतिसहस्रं अशीत्युत्तरसहस्रंभवति । एतएवाशीतिसहस्रंअशीत्युत्तरसहस्रसंख्याकाभगवत्प्रादुर्भावाः । अर्कलिनःअर्केसूर्येश्येनाकार चितौचनिलीनत्वेनादृश्यत्वेनस्थिताः । तएवबृहतीःबृहत्यः । पूर्णत्वाद्बृहत्याख्याःबृहतीसहस्रप्रतिपाद्याश्च । पुनर्बृहतीरि त्यावर्तनीयं । एतेचार्कलिनोबृहतीःबृहतीसहस्रंअहश्चाभिसंपादयंति । अहःशब्देनयज्ञोदिवसश्चोभावप्यभिप्रेतौ । तथाचा

पंचेतस्तदशीतिसहस्रंभवत्यशीतिसहस्रंवाअर्कलिनोबृहतीरहरभिसंपादयंतिसएषोक्षरसंमानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतमक्षरसंमानंचक्षुर्मयंश्रोत्रमयंछंदोमयंमनोमयंवाङ्मयमात्मानंवेदाक्षराणांसायुज्यंसरूपतांसलोकतामश्नुतेपुत्रीपशुमान्भवतिसर्वमायुरेति ॥२॥

चत्वारःपुरुषाइतिबाध्वःशरीरपुरुषश्छंदःपुरुषोवेदपुरुषोमहापुरुषइति शरीरपुरुषइतियमवो

यमत्रविवेकः । एतएवप्रादुर्भावाःपुरुषशरीरेस्थित्वावाक्प्रेरकतयाबृहतीसहस्रंसंपादयंति । सूर्येस्थित्वादिवसान्संपादयंति । चितौस्थित्वायज्ञान्संपादयंतीति । सएषोस्थ्यादिगतोभगवान्अक्षरसंमानः । ऊष्माक्षरसंधिभेदेनत्रिविधवर्णगतरूपसमसंख्याकः । अशीत्युत्तरसहस्रसंख्याकरूपवानितियावत् । चक्षुर्मयइत्यादिपूर्ववत् ॥ २ ॥ बाध्वःसंसारबाधितैःप्राप्योविष्णवाज्ञयामोक्षप्रदोवायुश्चत्वारःपुरुषाःसंतीत्याह । केते । शरीरपुरुषःछंदःपुरुषोवेदपुरुषोमहापुरुषइति । तत्रशरीरपुरुष

इतियमवोचामयएवायंदैहिकआत्मासर्वदेहाभिमानीशिवः । सएव । तस्यशिवस्ययोयंदेहस्थितःअशरीरःप्राकृतशरीररहितः प्रज्ञात्माप्रकृष्टज्ञानरूपोनिरुद्धनामाहरिःसरसःशरीरपुरुषप्राप्यत्वात्तन्नियामकत्वेनतत्रस्थितत्वाच्चसाररूपः । एवमेवोत्तरत्रापिद्रष्टव्यं । छंदःपुरुषइतियमवोचामसोक्षरसमाम्नायः सम्यगाम्नायतेअभ्यस्यतइतिसमाम्नायःसमुदायः । सर्वेवर्णाइतियावत् । तदभिमानीशेषएव । तस्यैतस्यअकारःअइत्याक्रियतेआहूयतइतितथोक्तः । अकारगतश्चवासुदेवोरसः । वेदपुरु

चामसएवायंदैहिकआत्मातस्ययोयमशरीरःप्रज्ञात्मासरसः छंदःपुरुषइतियमवोचामाक्षरसमाम्नायएवतस्यैतस्याकारोरसो वेदपुरुषइतियमवोचामयेनवेदान्वेदऋग्वेदंयजुर्वेदंसामवेदंतस्यैतस्यब्रह्मारस स्तस्माद्ब्रह्माणंब्रह्मिष्ठंकुर्वीतयोयज्ञस्योल्बणंपश्ये न्महापुरुषइतियमवोचामसं

षइतियमवोचामसोयमेव । येनप्रेरितोवेदान्वेद । वेदानित्यस्यैवविवरणं । ऋग्वेदंयजुर्वेदंसामवेदमिति । तथाचसर्ववेदाभिमानीगरुडएवेत्यर्थः । तस्यैतस्यवेदपुरुषस्य । ब्रह्मा ज्ञानबृंहणाद्ब्रह्माख्यर्त्विक्संस्थितत्वाच्चब्रह्माख्यःसंकर्षणोरसः । तस्मात् ब्रह्मर्त्विजिविशेषेणसंकर्षणस्यसंस्थितत्वाद्यज्ञेब्रह्माणंब्रह्मिष्ठंब्रह्मज्ञानिनमेवकुर्वीत । नतुयादृशतादृशं । तस्मिन्विशेषतोहरिसंनिधानयोग्यताभवात् । ननुकोविशेषोब्रह्मर्त्विजः । येनेतरेभ्यस्तस्यब्रह्मिष्ठत्वादिकमावश्यकंस्यादित्यतआह ॥ यइति । योब्रह्मर्त्विक्वयज्ञस्योल्बणंक्रूरंदोषंपश्येत् । कर्तृकरणादिवैगुण्यप्रसक्तिंदृष्ट्वातत्प्रतिक्रियांविदध्यादितियावत् । तादृशमेवब्रह्माणंकु

वींतेतिपूर्वेणान्वयः। महापुरुषइतियमवोचामससंवत्सरएव संवत्सराभिमानीब्रह्मैव । तन्माहात्म्यमाह ॥ प्रध्वंसयन्निति । अन्यानिभूतानिकांश्चित्प्राणिनःप्रध्वंसयन्अन्यानिचभूतानिकांश्चित्प्राणिनऐक्याभावयन्ऐक्यमाभावयन्लीनभावमापादय न्नित्यर्थः । संवत्सरात्मकेक्लृप्तकालेपूर्णेकेचिद्बहिरेवप्रध्वस्तदेहाभवंति । केचिच्चमंडूकादयःसर्पादिषुलीनदेहाभवंतीतिप्रसिद्धं। एतच्चकालाभिमानिब्रह्मकृत्यमेवेतिभावः । अन्यानिभगवद्विरोधीनिभूतानिप्रध्वंसयन्तमसिपातयन् । अन्यानिभूतानिमु क्तियोग्यजीवान् । ऐक्याभावयन्मोक्षेस्वांतःस्थानैक्यंसंप्रापयन्नित्यपिव्याचक्षते । तस्यैतस्यसंवत्सरनाम्नोब्रह्मणःअसावा

वत्सरएवप्रध्वंसयन्नन्यानिभूतान्यैक्याभावयन्नन्यानितस्यैतस्यासावादित्योरसःसयश्चायमश रीरःप्रज्ञात्मायश्चासावादित्यएकमेतदितिविद्यात्तस्मात्पुरुषंपुरुषंप्रत्यादित्योभवति तदप्येतदृषि

दित्यःआदित्यमंडलस्थःजगदादित्वात्सर्वभूतेषुततत्वात्सर्वजीवानांनियामकत्वाच्चादित्यनामकःप्रद्युम्नोरसः । सप्रसिद्धो यश्चायमशरीरःप्रज्ञात्मासर्वदेहेषुस्थितोनिरुद्धः । यश्चासावादित्यःआदित्यस्थःप्रद्युम्नःएतत्रूपद्वयमेकमत्यंताभिन्नमितिवि द्यात् । उपलक्षणमेतत् ॥ संकर्षणवासुदेवावप्यभिन्नावितिविद्यादितिग्राह्यं । वक्ष्यमाणप्रमेयानुगुण्यायरूपद्वयस्यैवाभेदस्यस्व शब्देनकीर्तनं । तस्मात्पुरुषदेहगतानिरुद्धस्यआदित्यमंडलस्थप्रद्युम्नस्यचैक्यादेवहेतोःआदित्यआदित्यगतोविष्णुःपुरुषंपुरुषंप्र ति प्रतिपुरुषं । भवति नियामकतयातत्तद्देहस्थितोभवति । आदित्येस्थित्वासर्वेषांमांप्रत्यादित्यःमांप्रत्यादित्योत्रर्ततइतिप्रती

तिजनकश्चभवतीत्यर्थः । तदप्येतत्शिवादिसर्वदेवनियामकत्वादिरूपंशिवादिसारत्वमृषिणोक्तं । सूर्यःसूर्यस्थितोहरिरुदगा
त्उदितोभूदित्यन्वयः । कीदृशःसूर्यःचित्रंअतिशयितचिद्रूपत्वात्परमचेतनत्वाच्चित्तरं तदेवचित्रं ।देवानांब्रह्मादिसर्वदेवाना
मनीकं । अननाच्चेष्टकत्वादन् । ईशितृत्वादी। कर्तृत्वात्कमिति । मित्रस्यवरुणस्याग्नेः। उपलक्षणमेतत् । सर्वदेवानांचक्षुर्ज्ञा
नदाता । द्यावापृथिवीद्यावापृथिव्यौ । अंतरिक्षंचआसमंतात्अप्राःस्वप्रकाशेनापूरयत् । जगतोजंगमस्य। तस्थुषःस्थावरस्य।
जंगमस्थावरात्मकसर्वजीवानामात्मा । आदानात्स्ववशेस्थापनात्प्रलयेऽत्तृत्वाच्चात्मेत्युक्तइत्यर्थः । इतिऋषिणोक्तमित्य

णोक्तं चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥ आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्मा
जगतस्तस्थुषश्चेत्येतामनुविधंसंहितांसंधीयमानांमन्यइतिहस्माहबाध्व एतंह्येवबह्वृचामहत्युक्थे

न्वयः । एवमनिरुद्धादिचतुर्मूर्तिज्ञानपूर्वकमेवसंहिताध्ययनंफलदंनान्यथेतिभावेनाह ॥ एतामिति । एतांचसंहितांसर्व
वैदिकपूर्वोत्तरवर्णसंधिरूपांतदैवानुविधंविधामनुसप्रकारंसम्यगितियावत् । संधीयमानांसंधितामहंमन्ये । यदाचतुर्विधो
विष्णुःसंहितादेवतेतिज्ञायतेतथापूर्ववर्णस्यनारायणोदेवता । उत्तरवर्णस्यसमस्ताःप्रादुर्भावादेवताइतिचयदाज्ञायते । तदैवे
तिपूर्वेणान्वयः । इतिहिबाध्वआहस्म। एतंविष्णुमेव बह्वृचाःऋग्वेदिनोमहत्युक्थेबृहतीसहस्रेमीमांसंते। तत्प्रतिपाद्यंजानंति।
एतमेवाग्नौइष्टकानिर्मितचितिस्थेअध्वर्यवोमीमांसंतेउपासते । एतंमहाव्रतेमहाव्रताख्यस्तोत्रेछंदोगाःमीमांसंतेतत्प्रतिपाद्यदेव

तांजानंति । तथाएतमेवास्यांपृथिव्याद्व्यादिसर्वंभूतांतेषुचव्याप्तंमीमांसंतेज्ञानिनः । एतमेवब्रह्मपूर्णगुणात्मकइत्याचक्षतेइ
तिबाध्वआहेतिपूर्वेणयोजना । सएषआत्माभगवान्संवत्सरसंमानःसंवसतांरतिदातृत्वात्संवत्सरोब्रह्मा । सचानंतमूर्तिःस
न्अनंतजगदधिष्ठायतत्तन्नियामकोभवति । भगवांश्चतस्यब्रह्मणोनंतरूपेषुस्वयंतावद्रूपैस्तन्नियामकतयास्थितइतिसंवत्सरसं
मानइत्युच्यते । तथाचक्षुर्मयादिश्चभवति । सप्रसिद्धोयःपुमान् । एवंसंवत्सरसंमानंचक्षुर्मयादिरूपमात्मानं । परस्मैअयो

मीमांसंतएतमग्नावध्वर्यवएतंमहाव्रतेछंदोगाएतमस्यामेतंदिव्येतंवायावेतमाकाशएतमप्स्वेत
मोषधीष्वेतंवनस्पतिष्वेतंचंद्रमस्येतंनक्षत्रेष्वेतंसर्वेषुभूतेष्वेतमेवब्रह्मेत्याचक्षते सएषसंवत्सरसं
मानश्चक्षुर्मयःश्रोत्रमयश्छंदोमयोमनोमयोवाङ्मयआत्मासयएवमेतंसंवत्सरसंमानंचक्षुर्मयंश्रोत्र
मयंछंदोमयंमनोमयंवाङ्मयमात्मानंपरस्मैशंसति ॥ ३ ॥

ग्यायशंसतिउपदिशति । तथापरस्मैआचार्यपितृभ्यामन्यस्मै । तत्क्रियमाणेमहाव्रताख्येकर्मणीतियावत् । शंसति बृह
तीसहस्रादिशस्त्रेणेतिशेषः। अथवापरस्मैआचार्यपितृभ्यामन्यमुद्दिश्यमहाव्रताख्यस्तोत्रेणआत्मानंहरिंशंसति । उपलक्षणमेत
त् । अन्योद्देशेनमहाव्रतेचितिंकुर्यादित्यपिग्राह्यं । नपरस्माअग्निंचिनुयादितिवक्ष्यमाणत्वात् । अस्योत्तरखंडेनान्वयः ॥३॥ ॥ ६५ ॥
अस्यपरस्मैआत्मशंसनकर्तुर्वेदाः दुग्धदोहाभवंति । दुह्यतइतिदोहोरसः । फलमितियावत् । दुग्धएवनतुदोग्धव्यो

दोहोयेषामितितथोक्ताः । फलाधायकानभवंतीत्यर्थः । तथातस्यानूक्तेअधीतेशास्त्रेभागःफलमपिनास्तिदृष्टादृष्टयोर्वेदाध्ययन
जफलयोःपृथक्प्रतिषेधायप्रवृत्तत्वान्नानयोर्वाक्ययोःपौनरुक्त्यं । तथासुकृतस्यगंगास्नानादिकर्मणःपंथानंमार्गं फलमितिया
वत् । नवेद नप्राप्नोति । तदेतत्अयोग्योपदेशादिकर्तुर्नाध्ययनफलंनापिसुकृतफलमित्येतदप्यृषिणोक्तं । यःपुमान् । सचि
विदं । सचिःकर्मसंचयः । संपूर्वाच्चिनोतेःकिः । उपसर्गस्यानुस्वारलोपः । तंवेत्तीतितथोक्तं । प्रीत्यैकदेहेस्थितत्वात्सखायं ।
नारायणं । तित्याज तत्याजत्यजति । तस्यवाचिवेदवाचिअधीतायामपि भागःफलंनास्ति । यदींयदेवश्रृणोतितितत्सर्वमलकं

दुग्धदोहाअस्यवेदाभवंतिनतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथानमिति तदप्येतदृषिणोक्तं
यस्तित्याजसचिविदंसखायंनतस्यवाच्यपिभागोअस्ति ॥ यदींश्रृणोत्यलकंश्रृणोतिनहिप्रवेद

अरकंअरतिरूपांधतमःप्राप्तिसाधनमेवश्रृणोति श्रुतंसर्वमंधतमःप्राप्तिसाधनमेवभवतीतियावत् । तथाअलकंरौरवादिनरक
साधनंचभवति । सुकृतस्यपंथांपंथानंफलंस्वर्गादिकंचनहिप्रवेदनैवप्राप्नोतीत्यर्थः । ननुहरेस्त्यागश्चतुर्विधः । सएवनास्ती
त्यादिज्ञानरूपःप्रथमः । रमाब्रह्मादीनांतारतम्यविषयेविपरीतज्ञानादिरूपोद्वितीयः । निषिद्धकर्मकरणादिरूपस्तृतीयः ।
अयोग्योपदेशःपरस्मैशंसनमित्यादिरूपश्चतुर्थः । तत्रप्रथमात्त्यागद्वयादंधतमःप्राप्तिः । तृतीयान्नरकप्राप्तिः । चतुर्थात्
अध्ययनसुकृतफलाप्राप्तिरितिप्रमाणेप्रमितं । अतःपरस्मैशंसनमात्ररूपत्यागस्यकथमेतत्सर्वंफलं । येनसमाख्यात्वेनेयंश्रु

तिरुदाह्रियतइतिचेत् । सत्यं । नेदंसर्वंफलंपरस्मैशंसनकर्तुरेवात्रोच्यतेकिंतुयथायथंत्यागचतुष्टयकर्तृणामपि । तथापिप्र स्तुतेपरशंसनादिरूपेचतुर्थत्यागे नतस्यवाच्यपिभागोअस्तिनहिप्रवेदसुकृतस्यपंथामितिदोषद्वयमेव । नतुयदीँश्रृणोत्यलकं श्रृणोतीत्युक्तोदोषइत्यवधारयति । नतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथानमित्येतदुक्तंभवतीति । तस्मात्परस्मैशंसनादि रूपचतुर्थत्यागस्योक्तदोषद्वयरूपानर्थफलकत्वात् । एवंतस्यानर्थफलकत्वंविद्वान्परस्मैआचार्यपित्रोरन्यस्मै । अग्निंनचि

सुकृतस्यपंथामिति नतस्यानूक्तेभागोस्तिनवेदसुकृतस्यपंथानमित्येतत्तदुक्तंभवतितस्मादेवंविद्वा न्नपरस्माअग्निंचिनुयान्नपरस्मैमहाव्रतेनस्तुवीतनपरस्माएतदहःशंसेत्कामंपित्रेवाचार्यायवाशंसे दात्मनएवास्यतत्कृतंभवतिसयश्चायमशरीरःप्रज्ञात्मायश्चासावादित्यएकमेतदित्यवोचाम तौय त्रविहीयेतेचंद्रमाइवादित्योदृश्यतेनरश्मयःप्रादुर्भवंति लोहिनीद्यौर्भवतियथामंजिष्ठाव्यस्तः

नुयात् । इष्टकानिर्मितचितावग्निंप्रतिष्ठाप्यतत्रहोमादिकंनकुर्यादितियावत् । नपरस्मैमहाव्रतेनतन्नाम्नास्तोत्रेणस्तुवीत । नपरस्मैएतदहःबृहतीसहस्ररूपमुक्थंशंसेत् । पित्रेवाआचार्यायवा । तयोरर्थेकामंयथेच्छंशंसेत् । अस्यतत्कृतंआचार्यपि त्रुद्देशेनशंसनंआत्मनेआत्मार्थमेवकृतंभवति । सयश्चायमशरीरःप्रज्ञात्माऽनिरुद्धः । यश्चासावादित्यःप्रद्युम्नः एततद्रूपद्व यमेकमित्यवोचाम । यद्यप्येतयोरैक्यविधानंप्रागेवकृतंतथापिप्रमेयांतरनिरूपणार्थंपुनरुक्तस्यैवानुवादोयं । तौअनिरुद्ध

प्रद्युम्नौ । देहेहृदयचक्षुषोःस्थितौ । यत्रयदाविहीयेतेशरीरादपगच्छतःतदाआदित्यश्चंद्रमाइवदृश्यतेद्रष्टुंशक्योभवति । आदित्यस्यरश्मयोनप्रादुर्भवंति । रश्मिप्रादुर्भावदर्शनमस्यनजायतइतियावत् । द्यौर्लोहिनीरक्तवर्णाभवतिदृश्यते । कथं । यथामंजिष्ठालोहिनीतथा । पायुर्गुदद्वारंव्यस्तोविवृतोभवति । अस्यशिरःकाककुलायगंधिकं काकस्यकुलायवद्गंधयुक्तंसत्वायतिवाति । वागतिगंधनयोः । व्यत्ययेनश्यन् । गच्छति । स्वगंधेनघ्राणमावृङ्क्तइतियावत् । एवमरिष्टदर्शनं यदाजायतेतदास्यपुरुषस्यात्मासंपरेतोमृतप्रायएव । कुतःचिरमिवनजीविष्यति । शतवर्षजीवनेपिचिरत्वमापेक्षिकमेव

पायुःकाककुलायगंधिकमस्यशिरोवायति संपरेतोस्यात्मानचिरमिवजीविष्यतीतिविद्यात्सयत्करणीयंमन्येतततत्कुर्वीत यदंतियच्चदूरकइतिसप्तजपेदादित्प्रत्नस्यरेतसइत्येका यत्रब्रह्मापवमानेति षळुद्वयंतमसस्परीत्येकाथापियत्रच्छिद्रइवादित्योदृश्यतेरथनाभिरिवाभिख्यायेतच्छिद्रांवाच्छायां

नमुख्यमितिज्ञापनायेवशब्दः । इतिविद्यात् । सएवंदृष्टारिष्टोयत्करणीयंपारलौकिकंमन्येतततत्सर्वंकुर्वीत । किंचयदंतियच्चदूरकइतिसप्तऋचोजपेत् । आदित्प्रत्नस्यरेतसइत्येकाऋक् । जप्तव्येतिशेषः । यत्रब्रह्मापवमानेतिषट्ऋचश्चजप्तव्याः । उद्वयंतमसस्परीत्येकाचजप्तव्या । एतज्जपेनचाकालमृत्युश्चेत्परिहृतोभवति । कालमृत्युश्चेदपरोक्षदर्शनद्वारामोक्षोभविष्यतीतिज्ञेयं । अथमृत्युसूचकानिअरिष्टांतराण्युच्यंते । यत्रयदाआदित्यःछिद्रःछिद्रवानिवदृश्यतेतस्यैवविवरणं रथना

भिश्वक्रमिवाभिख्यायेतदृश्येत आत्मनःछायांवाछिद्रांछिद्रवतींपश्येत् । तदपितदापिएवमेवात्मानंनचिरमिवजीविष्यतीत्ये
वविद्यात् । अथापिअन्यदपि । आदर्शेदर्पणेउदकेवा । आत्मानंआत्मप्रतिबिंबंजिह्मशिरसंवक्रशिरसंवा । अशिरसंशिरो
हीनंवापश्येत् । आत्मनःकन्याकेकनीनिके । विपर्यस्तेव्यत्यस्ते । ऊर्ध्वाधरीभावव्यत्यासेनेतियावत् । जिह्मेनजिह्मत्वेन
वक्रतयावा । दृश्येयातांतदप्येवमेवविद्यात् । अथापिअन्यदपि । अक्षिणीअपिधायअक्षिमूलमंगुल्याऽवष्टभ्येतियावत् ।

पश्येत्तदप्येवमेवविद्यादथाप्यादर्शेवोदकेवाजिह्मशिरसंवाऽशिरसंवात्मानंपश्येद्विपर्यस्ते
वाकन्याकेजिह्मेनवादृश्येयातांतदप्येवमेवविद्यादथाप्यपिधायाक्षिणीउपेक्षेततद्यथाबटरकाणि
संपतंतीवदृश्यंतेतानियदानपश्येत्तदप्येवमेवविद्यादथाप्यपिधायकर्णाउपशृणुयात्सएषोग्नेरि
वप्रज्वलतोरथस्येवोपब्दिस्तंयदानशृणुयात्तदप्येवमेवविद्यादथापियत्रनीलइवाग्निर्दृश्यतेयथा

उपेक्षेतउपसमीपएवईक्षेत । तत्तर्हियथाबटरकाणिवर्तुलाअर्चिषोंशास्तादृशाःसंपतंतीवदृश्यंतेस्वस्थात्मनां । तानिचबटर
कसदृशानियदानपश्येत्तदातदप्येवमेवविद्यात् । अथापिअन्यदपि । कर्णावपिधायकराभ्यामाच्छाद्योपशृणुयात् । सए
षतदाश्रूयमाणोध्वनिःप्रज्वलतोऽग्नेरुपब्दिःशब्दइव । आगच्छतोरथस्योपब्दिरिवचस्वस्थात्मनांभाति । सरस्वतीनिवित्
स्वाहावग्नुःउपब्दिरितिवाङ्नामसुपाठात् । तंतादृशंध्वनिंयदानशृणुयात्तदप्येवमेवविद्यात् । अथापि यत्रयदाअग्निर्नीलइ ॥ ६७ ॥

वदृश्यते । तस्यैवदृष्टांतमुखेनविवरणंयथामयूरग्रीवेति । अमेघेमेघरहितेव्योम्निविद्युतंअन्यैरदृश्यमानांपश्येत् । मेघेवा
विद्युतंअन्यैर्दृश्यमानामपिनपश्येत् । महामेघेवामरीचीःसूर्यरश्मीनिवपश्येत । तदप्येवमेवविद्यात् । अथापिअन्यच्च ।
यत्रयदाभूमिंज्वलंतीमिवपश्येततदप्येवमेवविद्यात् । इतिप्रत्यक्षदर्शनानि जाग्रदवस्थायांद्रष्टुंयोग्यानिदुर्निमित्तानि ।
अथस्वप्नाःमरणसूचकाःनिरूप्यंते । पुरुषंकृष्णंकृष्णवर्णंतथाकृष्णदंतंपश्यति । सचकृष्णःकृष्णदंतश्चपुरुषःएनंस्वप्नस्थंहं

मयूरग्रीवाऽमेघेवाविद्युतंपश्येन्मेघेवाविद्युतंनपश्येन्महामेघेवामरीचीरिवपश्येततदप्येवमेववि
द्यादथापियत्रभूमिंज्वलंतीमिवपश्येततदप्येवमेवविद्यादितिप्रत्यक्षदर्शनान्यथस्वप्नाःपुरुषंकृष्णं
कृष्णदंतंपश्यतिसएनंहंतिवराहएनंहंति मर्कटएनमास्कंदयत्याशुवायुरेनंप्रवहतिसुवर्णंखादि
त्वापगिरतिमध्वश्नातिबिसानिभक्षयत्येकपुंडरीकंधारयतिखरैर्वराहैर्युक्तैर्यातिकृष्णांधेनुंकृष्ण

तिताडयति । वराहोवाएनंहंति । मर्कटोवाएनमास्कंदयतिउपर्याक्रामते । आशुवायुरेनंप्रवहतिऊर्द्ध्वंप्रयाति । सुवर्णंखा
दित्वाअपगिरति छर्दति । मध्वश्नाति । अपूपसहितंबृहत्तमंमधुयदिभक्षयेत् । तथाबिसानिपद्मदलानिभक्षयति । एकपुं
डरीकंएकमेवरक्ताब्जंशिरसाधारयति । खरैर्वराहैर्वायुक्तैरथादिभिर्याति । कृष्णवत्सांकृष्णांधेनुं । नलदमालीनलदा
ख्यपुष्पविरचितमालाधारीसन् । दक्षिणामुखोभूत्वाव्राजयति । तदप्येवमेवविद्यादित्यन्वयः । सपुमान्एतेषांमध्ये

यदिकिंचित्पश्येत्तर्हिनत्सूचितापमृत्युपरिहारार्थंउपोष्य । स्थाल्यांपाकोयस्यतत्स्थालीपाकंपायसंश्रपयित्वापक्त्वा । रात्रीसूक्तेनप्रत्यृचंरात्रीसूक्तप्रतिपाद्यरात्रिशब्दवाच्यस्त्रीरूपभगवन्मूर्तिंदुर्गांचोद्दिश्यहुत्वा । अन्येनपृथक्पाचितेनोन्ननब्राह्मणान्भोजयित्वा । चरुंहविःशेषंस्वयंप्राश्नीयात् । तर्हिपायसेनेष्टोहरिःदुर्गाचापमृत्युंपरिहरतः । कालमृत्युश्चेज्ज्ञानाद्वारामोक्षंनयतइतिफलमात्रानुसंधेयं । एवंप्रासंगिकंप्रमेयंनिरूप्यप्रकृतमनुसरति ॥ सयइति । सप्रसिद्धोयःपरमा

वत्सांनलदमालीदक्षिणामुखोव्राजयति सयद्येतेषांकिंचित्पश्येदुपोष्यपायसंस्थालीपाकंश्रपयित्वारात्रीसूक्तेनप्रत्यृचंहुत्वान्येनान्नेनब्राह्मणान्भोजयित्वाचरुंस्वयंप्राश्नीयात्सयोतोश्रुतोगतोमतोनतोदृष्टोविज्ञातोनादिष्टः श्रोतामंताद्रष्टादेष्टाघोष्टाविज्ञाताप्रज्ञातासर्वेषांभूतानामंतरपुरुषःसमआत्मेतिविद्यात् ॥ ४ ॥

त्मा । अतःअतसातत्यगमने । देशतःकालतोगुणतश्चसंततत्वादतिपूर्णत्वादतशब्दवाच्यः । अतिशयेनातिशयितत्वाद्वातथोक्तः । तृतीयोतिशयइतिसूत्रादतिशयेनातिरतइति । अश्रुतःसाकल्येनश्रोतुमशक्यः । पूर्णत्वात् । अगतःसाकल्येनावगंतुमशक्यः । एवंसाकल्येनमंतुंद्रष्टुंविज्ञातुंआदेष्टुंचाशक्यत्वादमतोऽदृष्टोऽविज्ञातोऽनादिष्टश्च । सामान्यज्ञानविशेषज्ञानविवक्षयाप्रवृत्तत्वादगतोऽविज्ञातइत्यनयोरपौनरुक्त्यं । अनतःकस्याप्यप्रह्वः स्वतंत्रइतियावत् । स्वयंतुसर्वस्यश्रोतामंताद्रष्टा

आदेष्टाउपदेष्टा घोष्टाघोषंकुर्वन् । विज्ञाताविविधज्ञाता । प्रज्ञाताप्रकृष्टज्ञाता सर्वेषांभूतानाजीवानांअंतरोंतस्थः पूर्णत्वा त्पुरुषश्च । अंतरश्चासौपुरुषश्चेतितथोक्तः । तं विष्णुंसमःसर्वरूपेष्वेकप्रकारः । आत्मासर्वजीवनियामकश्चेतिविद्यात् । तेनचसंसारान्मुच्यतइतिग्राह्यं ॥ ४ ॥ अथखल्वियंवक्ष्यमाणा । सर्वस्यैवाचेसर्वस्यावाचः । उपनिषत् । रहस्यरूपा । लौकिकवैदिकसर्ववाग्विषयकाविद्योच्यते । विष्णुशब्दार्थप्रतिपादकत्वात्सर्ववाचां । एतद्विद्यापितथाभूतैवेति । यद्यपि

अथखल्वियंसर्वस्यैवाचउपनिषत्सर्वाह्येवेमाःसर्वस्यैवाचउपनिषदइमांत्वेवाचक्षतेपृथिव्यारूपंस्पर्शा अंतरिक्षस्योष्माणोदिवःस्वरा अग्नेरूपंस्पर्शावायोरूष्माणआदित्यस्यस्वरा ऋग्वेदस्य रूपंस्पर्शायजुर्वेदस्योष्माणःसामवेदस्यस्वरा श्चक्षुषोरूपंस्पर्शाःश्रोत्रस्योष्माणोमनसःस्वराः प्राणस्यरूपंस्पर्शाअपानस्योष्माणोव्यानस्यस्वरा अथखल्वियंदैवीवीणाभवतितदनुकृतिरसौमानुषी

सर्वाह्येवेमाःपूर्वोक्ताविद्याःविष्णुशब्दार्थत्वात्सर्वस्यैवाचेसर्वस्यावाचःउपनिषद्रूपाएव । तथापितदपेक्षयामुख्यतएवसर्ववाग्विषयकत्वादिमांवक्ष्यमाणांत्वेवसर्वस्याःवाचःउपनिषदितिसर्वेपिज्ञानिनआचक्षते । कासाविद्या । पृथिव्याःपृथिवीस्थितस्यविष्णोर्यत्पृथिवीनामकंरूपंतत्स्पर्शाः स्पर्शाक्षरप्रतिपाद्यं । अंतरिक्षस्यअंतरिक्षस्थितस्यविष्णोर्यदंतरिक्षनामकंरूपमित्यनुवर्तते । ततऊष्माणः ऊष्माक्षरप्रतिपाद्यं । एवमेवदिवःस्वराइत्यादिकमपिव्याख्येयं । एवमधिलोकमधिदैवमधिवेदमधींद्रियमधि

प्राणंपंचविधानिपृथिव्यादिनामकरूपत्रिकाणिस्पर्शाद्यक्षरदैवतानिज्ञेयानि । अथखलुविद्यांतरंनिरूप्यते । इयंदेहाख्यादै
वीदेवस्यविष्णोःसंबंधिनीवीणाभवति । तदनुकृतिस्तदनुकरणवतीतत्सदृशी । असौलोकसिद्धामानुषीवीणाभवति । उभ
योःसादृश्यमेवोपपादयति ॥ यथेत्यादिना । अस्याःदैववीणायाः । अमुष्याःमानुषवीणायाः । अंभणं । अभिरभिश
ब्दे । अस्मादधिकरणेल्युट् । शब्दोत्पत्तिस्थानमधोभागस्थमंतरवकाशोपेतंबृहदवयवांतरं । अस्यैअस्याः । अमुष्यैअमु

**वीणाभवति यथास्याःशिरएवममुष्याःशिरोयथास्याउदरमेवममुष्याअंभणंयथास्यैजिह्वैव
ममुष्यैवादनंयथास्यास्तंत्रयएवममुष्याअंगुलयोयथास्याःस्वराएवममुष्याःस्वरायथास्याःस्पर्शा
एवममुष्याःस्पर्शायथाह्येवेयंशब्दवतीतर्द्मवत्येवमसौशब्दवतीतर्द्मवतीयथाह्येवेयंलोमशेनचर्म
णापिहिताभवत्येवमसौलोमशेनचर्मणापिहितालोमशेनहस्मवैचर्मणापुरावीणाअपिदधतिस**

ष्याः । वादनं उपरितनभागस्थोऽवयवविशेषः । यथास्याअंगुलयएवममुष्यास्तंत्रयस्तंत्र्यएवांगुलिस्थानीयाइति । यथा
योग्यंयोजना । स्वराःध्वनिविशेषाः । एतदुभयत्रसमं । स्पर्शाःस्पर्शयोग्यावयवविशेषाः । शब्दवतीनादवती । तर्द्म
वती । तर्दहिंसायां । कर्णपीडनादिहिंसावती । यथाह्येवेयंदैवीवीणालोमशेनचर्मणा । अपिहिताआच्छादिता । एवंअसौ
लोमशेनचर्मणापिहिताभवति । एतच्चलोकेसुप्रसिद्धमित्याह । लोमशेनेति । वीणाः मानुषीर्लोमशेनरौरवादिचर्मणापुरा

वदनात्पूर्वं । पश्चाच्चेत्यपिग्राह्यं । अपिदधति । तद्रक्षणार्थंवादकाइतिशेषः । यःपुमान् । एतांदैवींवीणां वेद । ब्रह्मादिदेहान्
विष्णोर्वीणेतिभक्तितोजानाति । सश्रुतवदनोभवतिश्रुतमधीतशास्त्रंवदनेयस्यासौतथोक्तः । विद्यापूर्णमुखोभवतीतिया
वत् । भूमिप्रास्यकीर्तिः । भूमौप्रास्याप्रकर्षेणक्षिप्यमाणा व्यापिनीतियावत् । कीर्तिर्यस्यासौतथोक्तः । भूमिपूरितकी
र्तिमान्भवतीत्यर्थः । अस्यकीर्तिःभूमिप्राभूमिपूर्णाभवतीतिपूर्वटीकाकाराः । यत्रक्वचार्याःज्ञानवृद्धाःवाचोभाषंतेवाग्व्य
वहारंकुर्वंतितत्रैनंविदुः । नियमेनश्लाघंतइतिभावः । अथप्रसंगात्विद्याधिक्यलाभायजप्तव्यमंत्रनिरूपणंप्रतिजानंति ॥

**योहैतांदैवींवीणांवेदश्रुतवदनोभवतिभूमिप्रास्यकीर्तिर्भवतियत्रक्वचार्यावाचोभाषंतेविदुरेनंत
त्राथातोवाग्रसोयस्यांसंसद्यधीयानोवाभाषमाणोवानविरुरुचिषेत तत्रैतामृचंजपेदोष्ठापिधा
नानकुलीदंतैःपरिवृतापविः सर्वस्यैवाचईशानाचारुमामिहवादयेदितिवाग्रसः ॥ ५ ॥**

अथातइति । वाग्रसःवाक्सारोमंत्रविशेषोनिरूप्यते । एतज्जपस्यफलंसूचयन्जपंविधत्ते ॥ यस्यामिति । यस्यांसं
सदिअधीयानोवाभाषमाणोव्याचक्षाणःकथांकुर्वन्वानविरुरुचिषेत । सभास्थानांरोचनाविषयोनभवतिचेत् । संभावना
विषयत्वार्थेसन् । यथाकूलंपिपतिषति श्वामुमूर्षतीत्यादि । तत्रसभायांरोचिःप्राप्त्यर्थमेतामृचंजपेत् । तां पठति ॥
ओष्ठेति । पविरितिवाङ्नाम । पविर्भारतीत्यादितन्नामसुपाठात् । अतोवाचिसंस्थस्यस्त्रीरूपस्यभगवतःप्रतिपादिकेयमृक् ।
अयमर्थः । नेत्युपमार्थे । ओष्ठौ अपिधानेन अपिधानेइवआच्छादनवस्त्रवत्वर्ततेयस्याःसाओष्ठापिधानानेत्युच्यते । अत्रने

तिभिन्नमेवपदं । सामर्थ्यात्पिधानपदेनान्वेति । लीनाशेषकुत्सितत्वात्कुली । दंतैःपरिवृता । सर्वपालकत्वात्सर्वस्माद्विशिष्ट त्वाच्चपविः । सर्वस्यैवाचेसर्वस्यावाचईशानाईश्वरी । वाङ्नाम्नीभगवन्मूर्तिः । चारुयथाभवतितथामामिहसभायांवादये दिति । इत्येषाऋक्वाग्रसःवाचःसाररूपेत्यर्थः ॥ ५ ॥ अथशब्दःकात्स्न्र्ये । इदानींकृत्स्नशास्त्रार्थोभिधीयते । कृष्णहा रितः । कृष्णोनाम्ना । हरितपुत्रत्वाद्धारितः । अस्मैयोग्यजनाय । एतत्वक्ष्यमाणंवाग्ब्राह्मणंसर्ववाग्विषयंब्राह्मणं । इव व्यक्तमुपोदाहरति । उपदिशतिह । किंतत्संवत्सरःकालाभिमानीसंवसद्रतिदाताप्रजापतिर्ब्रह्माप्रजाःसृष्ट्वाव्यस्त्रंसत ।

अथहास्माएतत्कृष्णहारीतोवाग्ब्राह्मणमिवोपोदाहरतिप्रजापतिःप्रजाःसृष्ट्वाव्यस्त्रंसतसंवत्सरः सच्छंदोभिरात्मानंसमदधाद्यच्छंदोभिरात्मानंसमदधात्तस्मात्संहितातस्यैवाएतस्यैसंहितायैण कारोबलंषकारःप्राणआत्मासयोहैतौणकारषकारावनुसंहितमृचोवेदसबलांसप्राणांसंहितां

श्रांतोभवत् । ततःसब्रह्माश्रांतिपरिहारार्थं । छंदोभिःसर्ववेदैर्नारायणंस्तुत्वास्तुत्याप्रसन्नेनतेनैवात्मानंस्वदेहंसमदधात् । संधितवान् । संधायदेहस्यदार्ढ्यंचकारेतियावत् । यद्यस्मात् छंदोभिःस्तुतेनहरिणाआत्मानंसमदधात् । तस्मात्ब्रह्मणा स्वदेहेसंधितत्वादेवभगवान्संहितेत्युच्यते । तस्यैएतस्यैसंहितायैसंहितानाम्नोविष्णोर्बलंणकारः । णइत्याक्रियतइतिवि ष्णुनामगतणशब्देनप्रतिपाद्यतइत्यर्थः । तथाप्राणःरमाब्रह्माद्यखिलप्रणेतृत्वं । आत्माआत्मत्वं । गुणतोदेशतःकालतश्चा

॥ ७० ॥

ततत्वमित्येतत्षकारः । षइत्याक्रियतइति । विष्णुनामगतषशब्देनप्रतिपाद्यतइत्यर्थः । यःपुमान् । एतौणकारषकारौ । एतेनणइतिशब्देनाक्रियमाणंविष्णोःपूर्णबलं । षशब्देनाक्रियमाणंसर्वप्रणेतृत्वं । देशतःकालतोगुणतश्चाततत्वंच । ऋचोनु संहितं । ऋचइत्युपलक्षणं । सर्वासामपिवाचांसंहिताअनुसर्ववाक्संहितासु । तदर्थत्वेनवेद । अक्षरद्वयसंयोगरूपयासंहितयै तदेवसर्वत्रोच्यतइतिजानाति । सएवहिसंहितांसंहितानामकंविष्णुं । सबलांसप्राणांच । संपूर्णबलयुक्तं । सर्वप्रणेतृत्वशक्त्या दियुक्तंचवेद । नान्यः । एतच्चवेदनंआयुष्यंनित्यायूरूपमोक्षसाधनमितिविद्यात् । अथवाइतियोविद्यात्ससंसारान्मुक्तः

वेदायुष्यमितिविद्यात्सयदिविचिकित्सेत्सणकारंब्रवाणीँ ३ अणकाराँ ३ इति ॥ सणकारमेव ब्रूयात्सषकारंब्रवाणीँ३अषकाराँ ३इति ॥ सषकारमेवब्रूयात्तेयद्वयमनुसंहितमृचोधीमहेयच्चमांडू

सन् । आयुष्यंनित्यायुःप्राप्नुयादित्यर्थः ॥ सउपासकःसणकारंब्रवाणींअथवाअणकारांब्रवाणीतियदिविचिकित्सेत् । सर्वाः संहिताःणशब्दवाच्यविष्णुबलवाचकतानुसंधानपूर्वकंवदामिकिंवातद्रहितमितिसंशयंकुर्यात् । तर्हितत्रनिर्णयंब्रूमः । किमि ति । सणकारमेवब्रूयादिति । एवंसषकारंब्रवाणीं३अषकारांइतिसषकारमेवब्रूयादितिवाक्यमपिव्याख्येयं । सषकारंषशब्द वाच्यविष्णुप्राणात्मत्ववाचकतानुसंधानपूर्वकमित्यर्थः । तेएवंजानंतोवयमनुसंहितंसंहितायुक्तत्वेनऋचोयदधीमहे । यच्चमां डूकेयीयंमांडूकेयदृष्टमध्यायंस्वाध्यायंवेद । समस्तवेदपुराणोपलक्षणमेतत् । प्रब्रूमःअधीमहेशिष्येभ्यउपदिशामोवा । तेन

नोस्माकंणकारषकारावुपाप्तौ । णशब्दषशब्दार्थरूपोविष्णुरुपात्तः । अवाप्तोऽभूत् । णकारषकारव्याख्यानरूपत्वात्सर्ववाचां । इति ह्रस्वोमांडूकेयआहस्म । अस्मिन्नेवार्थेऋष्यंतरसंमतिमाह ॥ अथयद्वयमनुसंहितमिति । स्थविरःशाकल्यइत्युपलक्षणं । सर्वेपिऋषयएवमेवाहुरितिद्रष्टव्यं । तदेतत्प्रमेयंविद्वांसःकावषेयानामऋषयआहुर्हस्मवै । किमिति । वयंकिमर्थाःकिंप्रयोजनार्थिनःसंतोऽध्येष्यामहे । विष्णुनामार्थानुसंधानपूर्वकविष्णुमंत्रजपादेरेकस्यैवाधिकत्वाद्विष्णुनामव्यतिरि

केयीयमध्यायंप्रब्रूमस्तेननोणकारषकारावुपाप्ताविति हस्माहह्रस्वोमांडूकेयोथयद्वयमनुसंहितमृ
चोधीमहेयच्चमांडूकेयीयमध्यायंप्रब्रूमस्तेननोणकारषकारावुपाप्ताविति हस्माहस्थविरःशाकल्य
एतद्धस्मवैततविद्वांसआहुर्ऋषयःकावषेयाःकिमर्थावयमध्येष्यामहेकिमर्थावयंयक्ष्यामहेवाचि
हिप्राणंजुहुमःप्राणेवावाचंयोह्येवप्रभवःसएवाप्ययस्ताएताःसंहितानानंतेवासिनेप्रब्रूयान्नासं

क्तवेदाध्ययनेनापिकिंप्रयोजनमस्माकंभवेन्नकिमपीत्यर्थः । किमर्थावयंयक्ष्यामहे । यज्ञैर्वानःकिंप्रयोजनंभवेन्नकिमपीत्यर्थः । अथवाकिमर्थावयमध्येष्यामहे । किमर्थावयंयक्ष्यामहे । विष्णुनामार्थानुसंधानंविनाअन्यविषयकाध्ययनयज्ञादिकार्यैःकिमस्माकंप्रयोजनंनकिमपि । तथाचविष्णुनामार्थानुसंधानपूर्वकमेववेदानध्येष्यामहेयक्ष्यामहेचेतिभावः । अथवावाचिप्राणंजुहुमःविष्णवेनमइतिमंत्रमेवजपंतःप्राणवृत्तिंजपाख्यवाग्व्यापारेविनियोजयामइतियावत् । प्राणेवावाचंजुहुमइतिवर्तते ।

प्राणेवाचोहोमोनाममौनमेव । तथाचमौनेनविष्णुशब्दार्थंध्यायामोवेत्यर्थः । विष्णुविषयकमेवाध्ययनादिकंकार्यंनान्यविषयकमित्युक्तं । तत्कुतइत्यतआह ॥ योह्येवेति । योहिभगवान्प्रभवउत्पादकःसएवाप्ययःसंहारकर्तानान्यः । अतोजगज्जन्मादिकारणत्वेनविष्णोरेवप्राधान्यात्तद्विषयकमेवाध्ययनादिकंकार्यंनान्यदितिभावः । उपनिषत्प्रतिपाद्यार्थस्यातिरहस्यत्वंज्ञापयन्नुपसंहरति ॥ ताएताइति । संहिताःपूर्वोत्तरवर्णसंधिप्रतिपाद्यानिसंहितानामकानिभगवद्रूपाणि । अनंतेवासिनेअ

वत्सरवासिनेनाप्रवक्त्रइत्याचार्याआचार्याः ॥६॥ इत्यैतरेयोपनिषत्सुतृतीयारण्यकेद्वितीयोध्यायः
॥ ३ ॥ २ ॥ इतितृतीयारण्यकंसंपूर्णं ॥ ३ ॥

न्यविद्यासुस्वशिष्यत्वमप्राप्तायनप्रब्रूयात् । प्रथममेवनोपदिशेत् । नासंवत्सरवासिनेप्रब्रूयात् । अप्रवक्त्रेप्रवचनशक्तिहीनायचनप्रब्रूयादित्याचार्याःउपनिषदुपदेष्टारोमहिदासादयआहुरितिसंबंधः । द्विरुक्तिप्रयोजनंतुप्रागेवोक्तं । तदत्राप्यनुसंधेयं ॥ ६ ॥ **इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितश्रीमन्महैतरेयोपनिषद्भावप्रदीपेऽस्मद्गुरुवरश्रीमद्भारकरीवेंकटवराहाचार्यपूज्यपादाराधकैर्विरचितोतृतीयारण्यकेद्वितीयोध्यायःसमाप्तः ॥ ३ ॥ २ ॥**

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागर-
मुद्रणालये मुद्रयित्वा प्रकाशितः शाके १८२२.

॥ इतिऐतरेयोपनिषत्खंडार्थः संपूर्णः ॥